वंशीविभूषितकरान्नवनीरदाभात्पीताम्बरादरुणबिम्बफलाधरोष्ठात् ।

बृहत्स्तोत्ररत्नाकरः ।

(सचित्रः)

(१८३ स्तोत्रसंख्या)

मूल्यं १२ आणकाः ।

बृहत्स्तोत्ररत्नाकरः ।

(सचित्रः)

(स्तोत्रसंख्या १८३)

अयं
पाण्डुरङ्ग जावजी इत्येतैः
मुंबय्यां
स्रीयेऽङ्कनालये मुद्रयित्वा प्रकाशितः ।

एकादशावृत्तिः ।

शाकः १८५३, सन १९३२.

Published by Pandurang Jawaji, and Printed
by Ramchandra Yesu Shedge at
the Nirnaya-sagar Press,
26-28, Kolbhat Lane,
Bombay.

बृहत्स्तोत्ररत्नाकरानुक्रमणी ।

स्तोत्रनाम — पृ.

स्तोत्रनाम	पृ.

पांडुरंगस्तोत्राणि।

गंगादिनदीस्तोत्राणि।

सचित्रः

बृहत्स्तोत्ररत्नाकरः ।

कल्याणं वो विधत्तां करटमदधुनीलोलकल्लोलमाला-
खेलल्लोलंबकोलाहलमुखरितदिक्चक्रवालांतरालम् ।
मत्तं वेतंडरत्नं सततपरिचलत्कर्णतालप्ररोह-
द्धातांकूराजिहीर्षादरविवृतफणाशृंगभूषाभुजंगम् ॥

बृहत्स्तोत्ररत्नाकरः ।

मंगलम् ।

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ स जयति सिंधुरवदनो देवो यत्पादपंकजस्मरणम् । वासरमणिरिव तमसां राशीन्नाशयति विघ्नानाम् ॥ १ ॥ सुमुखश्चैकदंतश्च कपिलो गजकर्णकः । लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥ २ ॥ धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ ३ ॥ विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा । संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ ४ ॥ शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥ ५ ॥ व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् । पराशरात्मजं वंदे शुकतातं तपोनिधिम् ॥ ६ ॥ व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे । नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥ ७ ॥ अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः । अभाललोचनः शंभुर्भगवान् बादरायणः ॥ ८ ॥ इति ॥

गणेशस्तोत्राणि ।

१. गणेशन्यासः ।

श्रीगणेशाय नमः ॥ आचम्य प्राणायामं कृत्वा । दक्षिणहस्ते वक्रतुंडाय नमः । वामहस्ते शूर्पकर्णाय नमः । ओष्ठे विघ्नेशाय नमः । अधरोष्ठे चिंतामणये नमः । संपुटे गजाननाय नमः । दक्षिणपादे लंबोदराय नमः । वामपादे एकदंताय नमः । शिरसि एकदंताय नमः । चिबुके ब्रह्मणस्पतये नमः । दक्षिणनासिकायां विनायकाय नमः । वामनासिकायां ज्येष्ठराजाय नमः । दक्षिणनेत्रे विकटाय नमः । वामनेत्रे कपिलाय नमः । दक्षिणकर्णे धरणीधराय नमः । वामकर्णे आशापूरकाय नमः । नाभौ महोदराय नमः । हृदये धूम्रकेतवे नमः । ललाटे मयूरेशाय नमः । दक्षिणबाहौ स्वानंदवासकारकाय नमः । वामबाहौ सच्चित्सुखधाम्ने नमः ॥ इति गणेशन्यासः ॥

२. गणेशकवचम् ।

श्रीगणेशाय नमः । गौर्युवाच । एषोऽतिचपलो दैत्यान्बाल्येऽपि नाशयत्यहो । अग्रे किं कर्म कर्तेति न जाने मुनिसत्तम ॥१॥ दैत्या नानाविधा दुष्टाः साधुदेवद्रुहः खलाः । अतोऽस्य कंठे किंचित्त्वं रक्षार्थं बद्धुमर्हसि ॥ २ ॥ मुनिरुवाच ॥ ध्यायेत्सिंहगतं विनायकममुं दिग्बाहुमाद्ये युगे त्रेतायां तु मयूरवाहनममुं षड्बाहुकं सिद्धिदम् । द्वापरे

तु गजाननं युगभुजं रक्तांगरागं विभुं तुर्ये तु द्विभुजं सितांगरुचिरं सर्वार्थदं सर्वदा ॥ ३ ॥ विनायकः शिखां पातु परमात्मा परात्परः । अतिसुंदरकायस्तु मस्तकं सुमहोत्कटः ॥ ४ ॥ ललाटं कश्यपः पातु भ्रूयुगं तु महोदरः । नयने भालचंद्रस्तु गजास्यस्त्वोष्टपल्लवौ ॥ ५ ॥ जिह्वां पातु गणक्रीडश्चिबुकं गिरिजासुतः । वाचं विनायकः पातु दंतान् रक्षतु दुर्मुखः ॥ ६ ॥ श्रवणौ पाशपाणिस्तु नासिकां चिंतितार्थदः । गणेशस्तु मुखं कंठं पातु देवो गणंजयः ॥७॥ स्कंधौ पातु गजस्कंधः स्तनौ विघ्नविनाशनः । हृदयं गणनाथस्तु हेरंबो जठरं महान् ॥८॥ धराधरः पातु पार्श्वौ पृष्ठं विघ्नहरः शुभः । लिंगं गुह्यं सदा पातु वक्रतुंडो महाबलः ॥ ९ ॥ गणक्रीडो जानुजंघे ऊरू मंगलमूर्तिमान् । एकदंतो महाबुद्धिः पादौ गुल्फौ सदाऽवतु ॥ १० ॥ क्षिप्रप्रसादनो बाहू पाणी आशाप्रपूरकः । अंगुलीश्च नखान्पातु पद्महस्तोऽरिनाशनः ॥ ११ ॥ सर्वांगानि मयूरेशो विश्वव्यापी सदाऽवतु । अनुक्तमपि यत्स्थानं धूम्रकेतुः सदाऽवतु ॥ १२ ॥ आमोदस्त्वग्रतः पातु प्रमोदः पृष्ठतोऽवतु । प्राच्यां रक्षतु बुद्धीश आग्नेय्यां सिद्धिदायकः ॥ १३ ॥ दक्षिणस्यामुमापुत्रो नैर्ऋत्यां तु गणेश्वरः । प्रतीच्यां विघ्नहर्ताऽव्याद्वायव्यां गजकर्णकः ॥ १४ ॥ कौबेर्यां निधिपः पायादीशान्यामीशनंदनः ।

दिवाऽव्यादेकदंतस्तु रात्रौ संध्यासु विघ्नहृत् ॥ १५ ॥ राक्षसासुरवेतालग्रहभूतपिशाचतः । पाशांकुशधरः पातु रजःसत्त्वतमःस्मृतीः ॥ १६ ॥ ज्ञानं धर्मं च लक्ष्मीं च लज्जां कीर्तिं तथा कुलम् । वपुर्धनं च धान्यं च गृहान्दारान्सुतान् सखीन् ॥ १७ ॥ सर्वायुधधरः पौत्रान् मयूरेशोऽवतात्सदा । कपिलोऽजाविकं पातु गजाश्वान्विकटोऽवतु ॥१८॥ भूर्जपत्रे लिखित्वेदं यः कंठे धारयेत्सुधीः । न भयं जायते तस्य यक्षरक्षःपिशाचतः ॥१९॥ त्रिसंध्यं जपते यस्तु वज्रसारतनुर्भवेत् । यात्राकाले पठेद्यस्तु निर्विघ्नेन फलं लभेत् ॥ २० ॥ युद्धकाले पठेद्यस्तु विजयं चाप्नुयाद्द्रुतम् । मारणोच्चाटनाकर्षस्तंभमोहनकर्मणि ॥२१॥ सप्तवारं जपेदेतद्दिनानामेकविंशतिम् । तत्तत्फलमवाप्नोति साधको नात्र संशयः ॥ २२ ॥ एकविंशतिवारं च पठेत्तावद्दिनानि यः । कारागृहगतं सद्यो राज्ञा वध्यं च मोचयेत् ॥ २३ ॥ राजदर्शनवेलायां पठेदेतत्त्रिवारतः । स राजानं वशं नीत्वा प्रकृतीश्च सभां जयेत् ॥ २४ ॥ इदं गणेशकवचं कश्यपेन समीरितम् । मुद्गलाय च तेनाथ मांडव्याय महर्षये ॥ २५ ॥ मह्यं स प्राह कृपया कवचं सर्वसिद्धिदम् । न देयं भक्तिहीनाय देयं श्रद्धावते शुभम् ॥ २६ ॥ यस्यानेन कृता रक्षा न बाधाऽस्य भवे-

क्वचित् । राक्षसासुरवेतालदैत्यदानवसंभवा ॥ २७ ॥
इति श्रीगणेशपुराणे गणेशकवचं संपूर्णम् ॥

३. गणेशमानसपूजा ।

श्रीगणेशाय नमः॥ श्रीसर्वप्रदाय नमः ॥ गृत्समद उवाच।
विघ्नेशवीर्याणि विचित्रकाणि बंदीजनैर्मागधकैः स्मृतानि ।
श्रुत्वा समुत्तिष्ठ गजानन त्वं ब्राह्मे जगन्मंगलकं कुरुष्व
॥ १ ॥ एवं मया प्रार्थितविघ्नराजश्चित्तेन चोत्थाय
बहिर्गणेशः । तं निर्गतं वीक्ष्य नमंति देवाः शंभ्वादयो
योगिमुखास्तथाहम् ॥ २ ॥ शौचादिकं ते परिकल्पयामि
हेरंब वै दंतविशुद्धिमेवम् । वस्त्रेण संप्रोक्ष्य मुखारविंदं
देवं सभायां विनिवेशयामि ॥ ३ ॥ द्विजादिसर्वैरभिवं-
दितं च शुकादिभिर्मोदसुमोदकाद्यैः । संभाष्य चालोक्य
समुत्थितं तं सुमंडपं कल्प्य निवेशयामि ॥ ४ ॥ रत्नैः
सुदीप्तैः प्रतिबिंबितं तं पश्यामि चित्तेन विनायकं च ।
तत्रासनं रत्नसुवर्णयुक्तं संकल्प्य देवं विनिवेशयामि ॥५॥
सिद्ध्या च बुद्ध्या सह विघ्नराज पाद्यं कुरु प्रेमभरेण सर्वैः ।
सुवासितं नीरमथो गृहाण चित्तेन दत्तं च सुखोष्ण-
भावम् ॥६॥ ततः सुवस्त्रेण गणेशमादौ संप्रोक्ष्य दूर्वादि-
भिरर्चयामि । चित्तेन भावप्रिय दीनबंधो मनो विलीनं
कुरु ते पदाब्जे ॥७॥ कर्पूरकैलादिसुवासितं तु सुकल्पितं
तोयमथो गृहाण । आचम्य तेनैव गजानन त्वं कृपा-

कटाक्षेण विलोकयाशु ॥ ८ ॥ प्रवालमुक्ताफलहाटकाद्यैः सुसंस्कृतं ह्यंतरभावकेन । अनर्घ्यमर्घ्यं सफलं कुरुष्व मया प्रदत्तं गणराज ढुंढे ॥ ९ ॥ सौगंध्ययुक्तं मधुपर्कमाद्यं संकल्पितं भावयुतं गृहाण । पुनस्तथाचम्य विनायक त्वं भक्तांश्च भक्तेश सुरक्षयाशु ॥ १० ॥ सुवासितं चंपकजातिकाद्यैस्तैलं मया कल्पितमेव ढुंढे । गृहाण तेन प्रविमर्दयामि सर्वांगमेवं तव सेवनाय ॥ ११ ॥ ततः सुखोष्णेन जलेन चाहमनेकतीर्थाहृतकेन ढुंढे । चित्तेन शुद्धेन च स्नापयामि स्नानं मया दत्तमथो गृहाण ॥१२॥ ततः पयःस्नानमचिंत्यभाव गृहाण तोयस्य तथा गणेश । पुनर्दधिस्नानमनामय त्वं चित्तेन दत्तं च जलस्य चैव ॥ १३ ॥ ततो घृतस्नानमपारवंद्य सुतीर्थजं विघ्नहर प्रसीद । गृहाण चित्तेन सुकल्पितं तु ततो मधुस्नानमथो जलस्य ॥ १४ ॥ सुशर्करायुक्तमथो गृहाण स्नानं मया कल्पितमेव ढुंढे । ततो जलस्नानमघापहंतृ विघ्नेश मायाश्रमं वारयाशु ॥ १५ ॥ सुयक्षपंकस्थमथो गृहाण स्नानं परेशाधिपते ततश्च । कौमंडलीसंभवजं कुरुष्व विशुद्धमेवं परिकल्पितं तु ॥ १६ ॥ ततस्तु सूक्तैर्मनसा गणेशं संपूज्य दूर्वादिभिरल्पभावैः । अपारकैर्मंडलभूतब्रह्मणस्पत्यकैस्तं ह्यभिषेचयामि ॥१७॥ ततः सुवस्त्रेण तु प्रोञ्छनादि गृहाण चित्तेन मया सुकल्पितम् । ततो विशुद्धेन

जलेन ढुंढे ह्याचांतमेवं कुरु विघ्नराज ॥१८॥ अग्नौ विशुद्धे तु गृहाण वस्त्रे ह्यनर्घ्यमौल्ये मनसा मया ते । दत्ते परिच्छाद्य निजात्मदेहं ताभ्यां मयूरेश जनांश्च पालय ॥१९॥ आचम्य विघ्नेश पुनस्तथैव चित्तेन दत्तं मुखमुत्तरीयम् । गृहाण भक्तप्रतिपालक त्वं नमो यथा तारकसंयुतं तु ॥ २० ॥ यज्ञोपवीतं त्रिगुणस्वरूपं सौवर्णमेवं ह्यहिनाथभूतम् । भावेन दत्तं गुणनाथ तत्त्वं गृहाण भक्तोद्धृतिकारणाय ॥ २१ ॥ आचांतमेवं मनसा प्रदत्तं कुरुष्व शुद्धेन जलेन ढुंढे । पुनश्च कौमंडलकेन पाहि विश्वं प्रभो खेलकरं सदा ते ॥ २२ ॥ उद्यद्दिनेशाभमथो गृहाण सिंदूरकं ते मनसा प्रदत्तम् । सर्वांगसंलेपनमादराद्वै कुरुष्व हेरंब च तेन पूर्णम् ॥ २३ ॥ सहस्रशीर्षं मनसा मया त्वं दत्तं किरीटं तु सुवर्णजं वै । अनेकरत्नैः खचितं गृहाण ब्रह्मेश ते मस्तकशोभनाय ॥ २४ ॥ विचित्ररत्नैः कनकेन ढुंढे युतानि चित्तेन मया परेश । दत्तानि नानापदकुंडलानि गृहाण शूर्पश्रुतिभूषणाय ॥ २५ ॥ शुंडाविभूषार्थमनंतखेलिन् सुवर्णजं कंचुकमागृहाण । रत्नैश्च युक्तं मनसा मया यद्दत्तं प्रभो तत्सफलं कुरुष्व ॥ २६ ॥ सुवर्णरत्नैश्च युतानि ढुंढे सदैकदंताभरणानि कल्पय । गृहाण चूडाकृतये परेश दत्तानि दंतस्य च शोभनार्थम् ॥२७॥ रत्नैः सुवर्णेन कृतानि तानि गृहाण चत्वारि मया प्रकल्प्य ।

संभूषय त्वं कटकानि नाथ चतुर्भुजेषु ह्यज विघ्नहारिन् ॥ २८ ॥ विचित्ररत्नैः खचितं सुवर्णसंभूतकं गृह्य मया प्रदत्तम् । तथांगुलीष्वंगुलिकं गणेश चित्तेन संशोभय तत्परेश ॥२९॥ विचित्ररत्नैः खचितानि ढुंढे केयूरकाणि ह्यथ कल्पितानि । सुवर्णजानि प्रमथाधिनाथ गृहाण दत्तानि तु बाहुषु त्वम् ॥ ३० ॥ प्रवालमुक्ताफलरत्नजैस्त्वं सुवर्णसूत्रैश्च गृहाण कंठे । चित्तेन दत्ता विविधाश्च माला ऊरूदरे शोभय विघ्नराज ॥ ३१ ॥ चंद्रं ललाटे गणनाथ पूर्णं वृद्धिक्षयाभ्यां तु विहीनमाद्यम् । संशोभय त्वं वरसंयुतं ते भक्तिप्रिय त्वं प्रकटीकुरुष्व ॥ ३२ ॥ चिंतामणिं चिंतितदं परेश हृद्देशगं ज्योतिर्मयं कुरुष्व । मणिं सदानंदसुखप्रदं च विघ्नेश दीनार्थद पालयस्व ॥३३॥ नाभौ फणीशं च सहस्रशीर्षं संवेष्टनेनैव गणाधिनाथ । भक्तं सुभूषं कुरु भूषणेन वरप्रदानं सफलं परेश ॥ ३४ ॥ कटीतटे रत्नसुवर्णयुक्तां कांचीं सुचित्तेन च धारयामि । विघ्नेश ज्योतिर्गणदीपनीं ते प्रसीद भक्तं कुरु मां दयाब्धे ॥३५॥ हेरंब ते रत्नसुवर्णयुक्ते सुनूपुरे मंजिरके तथैव । सुकिंकिणीनादयुते स्वबुद्ध्या सुपादयोः शोभय मे प्रदत्ते ॥३६॥ इत्यादिनानाविधभूषणानि तवेच्छया मानसकल्पितानि । संभूषयाम्येव त्वदंगकेषु विचित्रधातुप्रभवाणि ढुंढे ॥ ३७ ॥ सुचंदनं रक्तममोघवीर्यं सुघर्षितं

ह्यष्टकगंधमुख्यैः । युक्तं मया कल्पितमेकदंत गृहाण ते त्वंगविलेपनार्थम् ॥३८॥ लिप्तेषु वैचित्र्यमथाष्टगंधैरंगेषु तेऽहं प्रकरोमि चित्रम् । प्रसीद चित्तेन विनायक त्वं ततः सुरक्तं रविमेव भाले ॥३९॥ घृतेन वै कुंकुमकेन रक्तान् सुतंदुलांस्ते परिकल्पयामि । भाले गणाध्यक्ष गृहाण पाहि भक्तान्सुभक्तिप्रिय दीनबंधो ॥ ४० ॥ गृहाण भो चंपक-मालतीनि जलपंकजानि स्थलपंकजानि । चित्तेन दत्तानि च मल्लिकानि पुष्पाणि नानाविधवृक्षजानि ॥ ४१ ॥ पुष्पोपरि त्वं मनसा गृहाण हेरंब मंदारशमीदलानि । मया सुचित्तेन च कल्पितानि ह्यपारकाणि प्रणवाकृते तु ॥ ४२ ॥ दूर्वांकुरान्वै मनसा प्रदत्तांस्त्रिपंचपत्रैर्युतकांश्च स्निग्धान् । गृहाण विघ्नेश्वर संख्यया त्वं हीनांश्च सर्वोपरि वक्रतुंड ॥ ४३ ॥ दशांगभूतं मनसा मया ते धूपं प्रदत्तं गणराज ढुंढे । गृहाण सौरभ्यकरं परेश सिद्ध्या च बुद्ध्या सह भक्तपाल ॥ ४४ ॥ दीपं सुवर्त्या युतमादरात्ते दत्तं मया मानसकं गणेश । गृहाण नानाविधजं घृतादि-तैलादिसंभूतममोघदृष्टे ॥ ४५ ॥ भोज्यं च लेह्यं गणराज पेयं चोष्यं च नानाविधषड्रसाढ्यम् । गृहाण नैवेद्यमथो मया ते सुकल्पितं पुष्टिपते महात्मन् ॥ ४६ ॥ सुवासितं भोजनमध्यभागे जलं मया दत्तमथो गृहाण । कमंडलुस्थं मनसा गणेश पिबस्व विश्वादिकतृप्तिकारिन् ॥४७॥ ततः

करोद्वर्तनकं गृहाण सौगंध्ययुक्तं मुखमार्जनार्थं । सुवासितेनैव सुतीर्थजेन सुकल्पितं नाथ गृहाण ढुंढे ॥ ४८ ॥ पुनस्तथाचम्य सुवासितं च दत्तं मया तीर्थजलं पिबस्व । प्रकल्प्य विघ्नेश ततः परं ते संप्रोंछनं हस्तमुखे करोमि । ॥ ४९ ॥ द्राक्षादिरंभाफलचूतकानि खार्जूरकार्कंधुकदाडिमानि । सुस्वादयुक्तानि मया प्रकल्प्य गृहाण दत्तानि फलानि ढुंढे ॥ ५० ॥ पुनर्जलेनैव करादिकं ते संक्षालयेऽहं मनसा गणेश । सुवासितं तोयमथो पिबस्व मया प्रदत्तं मनसा परेश ॥ ५१ ॥ अष्टांगयुक्तं गणनाथ दत्तं तांबूलकं ते मनसा मया वै । गृहाण विघ्नेश्वर भावयुक्तं सदा सकृत्तुंडविशोधनार्थम् ॥५२॥ ततो मया कल्पितके गणेश महासने रत्नसुवर्णयुक्ते । मंदारकूर्पासकयुक्तवस्त्रैरनर्घ्यसंछादितके प्रसीद ॥ ५३ ॥ ततस्त्वदीयावरणं परेश संपूजयामि मनसा यथावत् । नानोपचारैः परमप्रियैस्तु त्वत्प्रीतिकामार्थमनाथबंधो ॥५४॥ गृहाण लंबोदर दक्षिणां ते ह्यसंख्यभूतां मनसा प्रदत्ताम् । सौवर्णमुद्रादिकमुख्यभावां पाहि प्रभो विश्वमिदं गणेश ॥५५॥ राजोपचारान्विविधान् गृहाण हस्त्यश्वछत्रादिकमादराद्वै । चित्तेन दत्तान् गणनाथ ढुंढे ह्यपारसंख्यान् स्थिरजंगमांस्ते ॥५६॥ दानाय नानाविधरूपकांस्ते गृहाण दत्तान्मनसा मया वै । पदार्थभूतान् स्थिरजंगमांश्च हेरंब मां तारय

मोहभावात् ॥ ५७ ॥ मंदारपुष्पाणि शमीदलानि दूर्वांकुरांस्ते मनसा ददामि । हेरंब लंबोदर दीनपाल गृहाण भक्तं कुरु मां पदे ते ॥ ५८ ॥ ततो हरिद्रामबिरं गुलालं सिंदूरकं ते परिकल्पयामि । सुवासितं वस्तु सुवासभूतैर्गृहाण ब्रह्मेश्वर शोभनार्थम् ॥५९॥ ततः शुकाद्याः शिवविष्णुमुख्या इंद्रादयः शेषमुखास्तथान्ये । मुनींद्रकाः सेवकभावयुक्ताः सभासनस्थं प्रणमंति ढुंढिम् ॥ ६० ॥ वामांगके शक्तियुता गणेशं सिद्धिस्तु नानाविधसिद्धिभिस्तम् । अत्यंतभावेन सुसेवते तु मायास्वरूपा परमार्थभूता ॥६१॥ गणेश्वरं दक्षिणभागसंस्था बुद्धिः कलाभिश्च सुबोधिकाभिः । विद्याभिरेवं भजते परेश मायासु सांख्यप्रदचित्तरूपाः ॥६२॥ प्रमोदमोदादयः पृष्ठभागे गणेश्वरं भावयुता भजंते । भक्तेश्वरा मुद्गलशंभुमुख्याः शुकादयस्तं स्म पुरो भजंते ॥ ६३ ॥ गंधर्वमुख्या मधुरं जगुश्च गणेशगीतं विविधस्वरूपम् । नृत्यं कलायुक्तमथो पुरस्ताच्चक्रुस्तथा ह्यप्सरसो विचित्रम् ॥६४॥ इत्यादिनानाविधभावयुक्तैः संसेवितं विघ्नपतिं भजामि । चित्तेन ध्यात्वा तु निरंजनं वै करोमि नानाविधदीपयुक्तम् ॥ ६५ ॥ चतुर्भुजं पाशधरं गणेशं तथांकुशं दंतयुतं तमेवम् । त्रिनेत्रयुक्तं त्वभयंकरं तं महोदरं चैकरदं गजास्यम् ॥६६॥ सर्पोपवीतं गजकर्णधारं विभूतिभिः सेवितपादपद्मम् । ध्याये गणेशं

विविधप्रकारैः सुपूजितं शक्तियुतं परेशम् ॥ ६७ ॥ ततो जपं वै मनसा करोमि स्वमूलमंत्रस्य विधानयुक्तम् । असंख्यभूतं गणराजहस्ते समर्पयाम्येव गृहाण ढुंढे ॥ ६८ ॥ आरार्तिकां कर्पुरकादिभूतामपारदीपां प्रकरोमि पूर्णाम् । चित्तेन लंबोदर तां गृहाण ह्यज्ञानध्वांताघहरां निजानाम् । ॥ ६९ ॥ वेदेषु वैघ्नेश्वरकैः सुमंत्रैः सुमंत्रितं पुष्पदलं प्रभूतम् । गृहाण चित्तेन मया प्रदत्तमपारवृत्त्या त्वथ मंत्रपुष्पम् ॥७०॥ अपारवृत्त्या स्तुतिमेकदंत गृहाण चित्तेन कृतां गणेश । युक्तां श्रुतिस्मार्तभवैः पुराणैः सर्वैः परेशाधिपते मया ते ॥ ७१ ॥ प्रदक्षिणा मानसकल्पितास्ता गृहाण लंबोदर भावयुक्ताः । संख्याविहीना विविधस्वरूपा भक्तान्सदा रक्ष भवार्णवाद्वै ॥ ७२ ॥ नतिं ततो विघ्नपते गृहाण साष्टांगकाद्यां विविधस्वरूपाम् । संख्याविहीनां मनसा कृतां ते सिद्ध्या च बुद्ध्या परिपालयाशु ॥ ७३ ॥ न्यूनातिरिक्तं तु मया कृतं चेत्तदर्थमंते मनसा गृहाण । दूर्वांकुरान् विघ्नपते प्रदत्तान् संपूर्णमेवं कुरु पूजनं मे ॥ ७४ ॥ क्षमस्व विघ्नाधिपते मदीयान् सदापराधान् विविधस्वरूपान् । भक्तिं मदीयां सफलां कुरुष्व संप्रार्थयामि मनसा गणेश ॥ ७५ ॥ ततः प्रसन्नेन गजाननेन दत्तं प्रसादं शिरसाभिवंद्य । स्वमस्तके तं परिधारयामि चित्तेन विघ्नेश्वरमानतोस्मि ॥ ७६ ॥ उत्थाय विघ्नेश्वर एव तस्मा-

द्रुतस्ततस्त्वंतरधानशक्त्या । शिवादयस्तं प्रणिपत्य सर्वे गताः सुचित्तेन च चिंतयामि ॥ ७७ ॥ सर्वान्नमस्कृत्य ततोहमेव भजामि चित्तेन गणाधिपं तम् । स्वस्थानमागत्य महानुभावैर्भक्तैर्गणेशस्य च खेलयामि ॥ ७८ ॥ एवं त्रिकालेषु गणाधिपं तं चित्तेन नित्यं परिपूजयामि । तेनैव तुष्टः प्रददातु भावं विश्वेश्वरो भक्तिमयं तु मह्यम् ॥७९॥ गणेशपादोदकपानकं च उच्छिष्टगंधस्य सुलेपनं तु । निर्माल्यसंधारणकं सुभोज्यं लंबोदरस्यास्तु हि भुक्तशेषम् ॥ ८० ॥ यं यं करोम्येव तदेव दीक्षा गणेश्वरस्यास्तु सदा गणेश । प्रसीद नित्यं तव पादभक्तं कुरुष्व मां ब्रह्मपते दयालो ॥ ८१ ॥ ततस्तु शय्यां परिकल्पयामि मंदार-कूर्पासकवस्त्रयुक्ताम् । सुवासपुष्पादिभिरर्चितां ते गृहाण निद्रां कुरु विघ्नराज ॥ ८२ ॥ सिद्ध्या च बुद्ध्या सहितं गणेशं सुनिद्रितं वीक्ष्य तथाहमेव । गत्वा स्ववासं च करोमि निद्रां ध्यात्वा हृदि ब्रह्मपतिं तदीयः ॥ ८३ ॥ एतादृशं सौख्यममोघशक्ते देहि प्रभो मानसजं गणेश । मह्यं च तेनैव कृतार्थरूपो भवामि भक्तिरसलालसोऽहम् ॥ ८४ ॥ गार्ग्य उवाच । एवं नित्यं महाराज गृत्समदो महायशाः । चकार मानसीं पूजां योगींद्राणां गुरुः स्वयम् ॥८५॥ य एतां मानसीं पूजां करिष्यति नरोत्तमः । पठिष्यति सदा सोऽपि गाणपत्यो भविष्यति ॥८६॥ श्रावयि-

ष्यति यो मर्त्यः श्रोष्यते भावसंयुतः। स क्रमेण महीपाल ब्रह्मभूतो भविष्यति ॥८७॥ यं यमिच्छति तं तं वै सफलं तस्य जायते। अंते स्वानंदगः सोपि योगिवंद्यो भविष्यति ॥८८॥ इति श्रीमदांत्ये मौद्गल्ये मानसपूजा समाप्ता ॥

४. गणेशबाह्यपूजा ।

श्रीगणेशाय नमः । ऐल उवाच । बाह्यपूजां वद विभो गृत्समदप्रकीर्तिताम्। येन मार्गेण विघ्नेशं भजिष्यसि निरंतरम् ॥१॥ गार्ग्य उवाच। आदौ च मानसीं पूजां कृत्वा गृत्समदो मुनिः। बाह्यां चकार विधिवत्तां शृणुष्व सुखप्रदाम् ॥२॥ हृदि ध्यात्वा गणेशानं परिवारादिसंयुतम् । नासिकारंध्रमार्गेण तं बाह्यांगं चकार ह ॥ ३ ॥ आदौ वैदिकमंत्रं स गणानांत्वेति संपठन् । पश्चाच्छ्लोकं समुच्चार्य पूजयामास विघ्नपम् ॥४॥ गृत्समद उवाच। चतुर्बाहुं त्रिनेत्रं च गजास्यं रक्तवर्णकम्। पाशांकुशादिसंयुक्तं मायायुक्तं प्रचिंतयेत्॥५॥ आगच्छ ब्रह्मणां नाथ सुरासुरवरार्चित । सिद्धिबुद्ध्यादिसंयुक्त भक्तिग्रहणलालस ॥६॥ कृतार्थोऽहं कृतार्थोऽहं तवागमनतः प्रभो। विघ्नेशानुगृहीतोऽहं सफलो मे भवोऽभवत् ॥७॥ रत्नसिंहासनं स्वामिन् गृहाण गणनायक। तत्रोपविश्य विघ्नेश रक्ष भक्तान्विशेषतः ॥ ८ ॥ सुवासिताभिरद्भिश्च पादप्रक्षालनं प्रभो। शीतोष्णाम्भः करोमि ते गृहाण पाद्यमुत्तमम् ॥ ९ ॥

सर्वतीर्थाहृतं तोयं सुवासितं सुवस्तुभिः । आचमनं च तेनैव कुरुष्व गणनायक ॥ १० ॥ रत्नप्रवालमुक्ताद्यैरनर्घ्यैः संस्कृतं प्रभो । अर्घ्यं गृहाण हेरंब द्विरदानन तोषकम् ॥ ११ ॥ दधिमधुघृतैर्युक्तं मधुपर्कं गजानन । गृहाण भावसंयुक्तं दत्तं मया नमोऽस्तु ते ॥१२॥ पाद्ये च मधुपर्के च स्नाने वस्त्रोपधारणे । उपवीते भोजनांते पुनराचमनं कुरु ॥ १३ ॥ चंपकाद्यैर्गणाध्यक्ष वासितं तैलमुत्तमम् । अभ्यंगं कुरु सर्वेश लंबोदर नमोस्तु ते ॥१४॥ यक्षकर्दमकाद्यैश्च विघ्नेश भक्तवत्सल । उद्वर्तनं कुरुष्व त्वं मया दत्तैर्महाप्रभो ॥ १५ ॥ नानातीर्थजलैर्ढुंढे सुखोष्णभावरूपकैः । कमंडलूद्भवैः स्नानं कुरु मया समर्पितैः ॥१६॥ कामधेनुसमुद्भूतं पयः परमपावनम् । तेन स्नानं कुरुष्व त्वं हेरंब परमार्थवित् ॥१७॥ पंचामृतानां मध्ये तु जलैः स्नानं पुनः पुनः। कुरु त्वं सर्वतीर्थेभ्यो गङ्गादिभ्यः समाहृतैः ॥१८॥ दधि धेनुपयोद्भूतं मलापहरणं परम् । गृहाण स्नानकार्यार्थं विनायक दयानिधे ॥ १९ ॥ धेनुसमुद्भवं ढुंढे घृतं संतोषकारकम् । महामलापघातार्थं तेन स्नानं कुरु प्रभो ॥२०॥ सारघं संस्कृतं पूर्णं मधु मधुरसोद्भवम् । गृहाण स्नानकार्यार्थं विनायक नमोस्तु ते॥२१॥ इक्षुदण्डसमुद्भूतां शर्करां मलनाशिनीम् । गृहाण गणनाथ त्वं तया स्नानं समाचर ॥ २२ ॥ यक्षकर्दमकाद्यैश्च

स्नानं कुरु गणेश्वर । आंत्यं मलहरं शुद्धं सर्वसौगंध्यकारकम् ॥२३॥ ततो गंधाक्षतादींश्च दूर्वांकुरान् गजानन । समर्पयामि स्वल्पांस्त्वं गृहाण परमेश्वर ॥ २४ ॥ ब्रह्मणस्पत्यसूक्तैश्च ह्येकविंशतिवारकैः । अभिषेकं करोमि ते गृहाण द्विरदानन ॥ २५ ॥ तत आचमनं देव सुवासितजलेन च । कुरुष्व गणनाथ त्वं सर्वतीर्थभवेन वै ॥ २६ ॥ वस्त्रयुग्मं गृहाण त्वमनर्घ्यं रक्तवर्णकम् । लोकलज्जाहरं चैव विघ्ननाथ नमोस्तु ते ॥ २७ ॥ उत्तरीयं सुचित्रं वै नभस्तारांकितं यथा । गृहाण सर्वसिद्धीश मया दत्तं सुभक्तितः ॥ २८ ॥ उपवीतं गणाध्यक्ष गृहाण च ततः परम् । त्रैगुण्यमयरूपं तु प्रणवग्रंथिबंधनम् ॥२९॥ ततः सिंदूरकं देव गृहाण गणनायक । अंगलेपनभावार्थं सदानंदविवर्धनं ॥३०॥ नानाभूषणकानि त्वमंगेषु विविधेषु च । भासुरस्वर्णरत्नैश्च निर्मितानि गृहाण भो ॥ ३१ ॥ अष्टगंधसमायुक्तं गंधं रक्तं गजानन । द्वादशांगेषु ते ढुंढे लेपयामि सुचित्रवत् ॥ ३२ ॥ रक्तचंदनसंयुक्तानथवा कुंकुमैर्युतान् । अक्षतान् विघ्नराज त्वं गृहाण भालमंडले ॥३३॥ चंपकादिसुवृक्षेभ्यः संभूतानि गजानन । पुष्पाणि शमीमंदारदूर्वादीनि गृहाण च ॥३४॥ दशांगं गुग्गुलं धूपं सर्वसौरभकारकम् । गृहाण त्वं मया दत्तं विनायक महोदर ॥ ३५ ॥ नानाजातिभवं दीपं

गृहाण गणनायक । अज्ञानमलजं दोषं हरंतं ज्योतिरूपकम् ॥ ३६ ॥ चतुर्विधान्नसंपन्नं मधुरं लड्डुकादिकम् । नैवेद्यं ते मया दत्तं भोजनं कुरु विघ्नप ॥ ३७ ॥ सुवासितं गृहाणेदं जलं तीर्थसमाहृतम् । भुक्तिमध्ये च पानार्थं देवदेवेश ते नमः ॥ ३८ ॥ भोजनांते करोद्वर्तं यक्षकर्दमकेन च । कुरुष्व त्वं गणाध्यक्ष पिब तोयं सुवासितम् ॥ ३९ ॥ दाडिमं खर्जुरं द्राक्षां रंभादीनि फलानि वै । गृहाण देवदेवेश नानामधुरकाणि तु ॥ ४० ॥ अष्टांगं देव तांबूलं गृहाण मुखवासनम् । असकृद्विघ्नराज त्वं मया दत्तं विशेषतः ॥ ४१ ॥ दक्षिणां कांचनाद्यां तु नानाधातुसमुद्भवाम् । रत्नाद्यैः संयुतां ढुंढे गृहाण सकलप्रिय ॥ ४२ ॥ राजोपचारकाद्यानि गृहाण गणनायक । दानानि तु विचित्राणि मया दत्तानि विघ्नप ॥४३॥ तत आभरणं तेऽहमर्पयामि विधानतः । उपचारैर्विविधैश्च तेन तुष्टो भव प्रभो ॥ ४४ ॥ ततो दूर्वांकुरान् ढुंढे एकविंशतिसंख्यकान् । गृहाण न्यूनसिद्ध्यर्थं भक्तवात्सल्यकारणात् ॥४५॥ नानादीपसमायुक्तं नीराजनं गजानन । गृहाण भावसंयुक्तं सर्वाज्ञानाधिनाशन ॥ ४६ ॥ गणानां त्वेति मंत्रस्य जपं साहस्रकं परम् । गृहाण गणनाथ त्वं सर्वसिद्धिप्रदो भव ॥४७॥ आर्तिक्यं च सुकर्पूरं नानादीपमयं प्रभो । गृहाण ज्योतिषां नाथ तथा नीराजयास्य-

हम् ॥ ४८ ॥ पादयोस्ते तु चत्वारि नाभौ द्वे वदने प्रभो । एकं तु सप्तवारं वै सर्वांगेषु निरंजनम् ॥ ४९ ॥ चतुर्वेदभवैर्मंत्रैर्गाणपत्यैर्गजानन । मंत्रितानि गृहाण त्वं पुष्पपत्राणि विघ्नप ॥ ५० ॥ पंचप्रकारकैः स्तोत्रैर्गाणपत्यैर्गणाधिप । स्तौमि त्वां तेन संतुष्टो भव भक्तिप्रदायक ॥५१॥ एकविंशतिसंख्यं वा त्रिसंख्यं वा गजानन । प्रादक्षिण्यं गृहाण त्वं ब्रह्मन् ब्रह्मेशभावन ॥ ५२ ॥ साष्टांगां प्रणतिं नाथ एकविंशतिसंमिताम् । हेरंब सर्वपूज्य त्वं गृहाण तु मया कृताम् ॥ ५३ ॥ न्यूनातिरिक्तभावार्थं किंचिद्दूर्वांकुरान्प्रभो । समर्पयामि तेन त्वं सांगां पूजां कुरुष्व ताम् ॥ ५४ ॥ त्वया दत्तं स्वहस्तेन निर्माल्यं चिंतयाम्यहम् । शिखायां धारयाम्येव सदा सर्वप्रदं च तत् ॥५५॥ अपराधानसंख्यातान्क्षमस्व गणनायक । भक्तं कुरु च मां ढुंढे तव पादप्रियं सदा ॥ ५६ ॥ त्वं माता त्वं पिता मे वै सुहृत्संबंधिकादयः । त्वमेव कुलदेवश्च सर्वं त्वं मे न संशयः ॥५७॥ जाग्रत्स्वप्नसुषुप्तिभिर्देहवाङ्मानसैः कृतम् । सांसर्गिकेण यत्कर्म गणेशाय समर्पये ॥ ५८ ॥ बाह्यं नानाविधं पापं महोग्रं तल्लयं व्रजेत् । गणेशपादतीर्थस्य मस्तके धारणात्किल ॥ ५९ ॥ पादोदकं गणेशस्य पीतं नरेण तत्क्षणात् । सर्वांतर्गतजं पापं नश्यति गणनातिगम् ॥ ६० ॥ गणेशोच्छिष्टगंधं वै द्वादशांगेषु चर्चयेत् ।

गणेशतुल्यरूपः स दर्शनात्सर्वपापहा ॥ ६१ ॥ यदि गणेशपूजादौ गंधभस्मादिकं चरेत् । अथवोच्छिष्टगंधं तु नो चेत्तत्र विधिं चरेत् ॥ ६२ ॥ द्वादशांगेषु विघ्नेशं नाममंत्रेण चार्चयेत् । तेन सोऽपि गणेशेन समो भवति भूतले ॥६३॥ मूर्ध्नि गणेश्वरं चादौ ललाटे विघ्ननायकम् । दक्षिणे कर्णमूले तु वक्रतुंडं समर्चयेत् ॥ ६४ ॥ वामे कर्णस्य मूले वै चैकदंतं समर्चयेत् । कंठे लंबोदरं देवं हृदि चिंतामणिं तथा ॥ ६५ ॥ बाहौ दक्षिणके चैव हेरंबं वामबाहुके । विकटं नाभिदेशे तु विनायकं समर्चयेत् ॥ ६६ ॥ कुक्षौ दक्षिणगायां तु मयूरेशं समर्चयेत् । वामकुक्षौ गजास्यं वै पृष्ठे स्वानंदवासिनम् ॥६७॥ सर्वांगलेपनं शस्तं चित्रितं ह्यष्टगंधकैः । गाणेशानां विशेषेण सर्वभद्रस्य कारणात् ॥ ६८ ॥ ततोच्छिष्टं तु नैवेद्यं गणेशस्य भुनज्म्यहम् । भुक्तिमुक्तिप्रदं पूर्णं नानापापनिकृंतनम् ॥ ६९ ॥ गणेशस्मरणेनैव करोमि कालखंडनम् । गाणपत्यैश्च संवासः सदास्तु मे गजानन ॥ ७० ॥ गार्ग्य उवाच । एवं गृत्समदश्चैव चकार बाह्यपूजनम् । त्रिकालेषु महायोगी सदा भक्तिसमन्वितः ॥ ७१ ॥ तथा कुरु महीपाल गाणपत्यो भविष्यसि । यथा गृत्समदः साक्षात्तथा त्वमपि निश्चितम् ॥७२॥ इति श्रीमदांत्ये मौद्गल्ये बाह्यपूजा समाप्ता ॥

५. गणेशमहिम्नस्तोत्रम् ।

श्रीगणेशाय नमः ॥ अनिर्वाच्यं रूपं स्तवननिकरो यत्र गलितस्तथा वक्ष्ये स्तोत्रं प्रथमपुरुषस्यात्र महतः । यतो जातं विश्वं स्थितमपि सदा यत्र विलयः स कीदृग्गीर्वाणः सुनिगमनुतः श्रीगणपतिः ॥ १ ॥ गणेशं गाणेशाः शिवमिति च शैवाश्च विबुधा रविं सौरा विष्णुं प्रथमपुरुषं विष्णुभजकाः । वदंत्येकं शाक्ता जगदुदयमूलां परशिवां न जाने किं तस्मै नम इति परं ब्रह्म सकलम् ॥ २ ॥ तथेशं योगज्ञा गणपतिमिमं कर्म निखिलं समीमांसा वेदांतिन इति परं ब्रह्म सकलम् । अजां सांख्यो ब्रूते सकलगुणरूपां च सततं प्रकर्तारं न्यायस्त्वथ जगति बौद्धा धियमिति ॥ ३ ॥ कथं ज्ञेयो बुद्धेः परतर इयं बाह्यसरणिर्यथा धीर्यस्य स्यात्स च तदनुरूपो गणपतिः । महत्कृत्यं तस्य स्वयमपि महान् सूक्ष्ममणुवद्ध्वनिर्ज्योतिर्बिंदुर्गगनसदृशः किंच सदसत् ॥४॥ अनेकास्योपाराक्षिकरचरणोऽनंतहृदयस्तथा नानारूपो विविधवदनः श्रीगणपतिः । अनंताह्वः शक्त्या विविधगुणकर्मैकसमये त्वसंख्यातानंताभिमतफलदोऽनेकविषये ॥ ५ ॥ न यस्यांतो मध्यो न च भवति चादिः सुमहतामलिप्तः कृत्वेत्थं सकलमपि खंवत्स च पृथक् । स्मृतः संस्मर्तॄणां सकलहृदयस्थः प्रियकरो नमस्तस्मै देवाय सकलसुवंद्याय महते ॥६॥ गणेशाद्यं बीजं दहनव-

नितापल्लवयुतं मनुश्चैकार्णोऽयं प्रणवसहितोऽभीष्टफलदः । सबिंदुश्चांगाद्यां गणकऋषिछंदोऽस्य च निचृत्स देवः प्राग्बीजं विपदपि च शक्तिर्जपकृताम् ॥७॥ गकारो हेरंबः सगुण इति पुंनिर्गुणमयो द्विधाप्येको जातः प्रकृतिपुरुषो ब्रह्म हि गणः । स चेशश्चोत्पत्तिस्थितिलयकरोऽयं प्रमथको यतो भूतं भव्यं भवति पतिरीशो गणपतिः ॥ ८ ॥ गकारः कंठोर्ध्वं गजमुखसमो मर्त्यसदृशो णकारः कंठाधो जठरसदृशाकार इति च । अधोभावः कट्यां चरण इति हीशोऽस्य च तनुर्विभातीत्थं नाम त्रिभुवनसमं भूर्भुवः सुवः ॥ ९ ॥ गणेशेति त्र्यर्णात्मकमपि वरं नाम सुखदं सकृत्प्रोच्चैरुच्चारितमिति नृभिः पावनकरम् । गणेशस्यैकस्य प्रतिजपकरस्यास्य सुकृतं न विज्ञातो नाम्नः सकलमहिमा कीदृशविधः ॥ १० ॥ गणेशेत्याह्वं यः प्रवदति मुहुस्तस्य पुरतः प्रपश्यंस्तद्वक्त्रं स्वयमपि गणस्तिष्ठति तदा । स्वरूपस्य ज्ञानं त्वमुख इति नाम्नास्य भवति प्रबोधः सुप्तस्य त्वखिलमिह सामर्थ्यममुना ॥ ११ ॥ गणेशो विश्वेऽस्मिन्स्थित इह च विश्वं गणपतौ गणेशो यत्रास्ते धृतिमतिरमैश्वर्यमखिलम् । समुक्तं नामैकं गणपतिपदं मंगलमयं तदेकास्ये दृष्टे सकलविबुधास्येक्षणसमम् ॥ १२ ॥ बहुक्लेशैर्व्याप्तः स्मृत उत गणेशे च हृदये क्षणात्क्लेशान्मुक्तो भवति सहसा त्वभ्रचयवत् । वने विद्यारंभे युधि रिपु-

भये कुत्र गमने प्रवेशे प्राणांते गणपतिपदं चाशु विशति ॥ १३ ॥ गणाध्यक्षो ज्येष्ठः कपिल अपरो मंगलनिधिर्दयालुर्हेरंबो वरद इति चिंतामणिरजः । वरानीशो ढुंढिर्गजवदननामा शिवसुतो मयूरेशो गौरीतनय इति नामानि पठति ॥ १४॥ महेशोऽयं विष्णुः सकविरविरिंदुः कमलजः क्षितिस्तोयं वह्निः श्वसन इति खं त्वद्रिरुदधिः । कुजस्तारः शुक्रो गुरुरुडुबुधोऽगुश्च धनदो यमः पाशी काव्यः शनिरखिलरूपो गणपतिः ॥ १५ ॥ मुखं वह्निः पादौ हरिरपि विधाता प्रजननं रविर्नेत्रे चंद्रो हृदयमपि कामोऽस्य मदनः । करौ शक्रः कट्यामवनिरुदरं भाति दशनं गणेशस्यासन्वै क्रतुमयवपुश्चैव सकलम् ॥ १६ ॥ अनर्घ्यालंकारैररुणवसनैर्भूषिततनुः करींद्रास्यः सिंहासनमुपगतो भाति बुधराट् । स्मितास्यात्तन्मध्येप्युदितरविबिंबोपमरुचिः स्थिता सिद्धिर्वामे मतिरितरगा चामरकरा ॥ १७ ॥ समंतात्तस्यासन्प्रवरमुनिसिद्धासुरगणाः प्रशंसंतीत्यग्रे विविधनुतिभिः सांजलिपुटाः । बिडौजाद्यैर्ब्रह्मादिभिरनुवृतो भक्तनिकरैर्गणक्रीडामोदप्रमुदविकटाद्यैः सहचरैः ॥ १८ ॥ वशित्वाद्यष्टाष्टादशदिगखिलाह्लोलमनुवाग्धृतिः पादूः खड्गोंजनरसबलाः सिद्धय इमाः । सदा पृष्ठे तिष्ठंत्यनिमिषदृशस्तन्मुखलया गणेशं सेवंतेप्यतिनिकटसूपायनकराः ॥१९॥ मृगांकास्या रंभाप्रभृतिगणिका

यस्य पुरतः सुसंगीतं कुर्वन्त्यपि कुतुकगंधर्वसहिताः । मुदः पारो नात्रेत्यनुपमपदे दौर्विगलिता स्थिरं जातं चित्तं चरणमवलोक्यास्य विमलम् ॥ २० ॥ हरेणायं ध्यातस्त्रिपुरमथने चासुरवधे गणेशः पार्वत्या बलिविजय-कालेपि हरिणा । विधात्रा संसृष्टावुरगपतिना क्षोणिधरणे नरैः सिद्धौ मुक्तौ त्रिभुवनजये पुष्पधनुषा ॥ २१ ॥ अयं सुप्रासादे सुर इव निजानंदभुवने महान् श्रीमानाद्यो लघुतरगृहे रंकसदृशः । शिवद्वारे द्वास्थो नृप इव सदा भूपतिगृहे स्थितो भूत्वोमांके शिशुगणपतिर्लालनपरः ॥ २२ ॥ अमुष्मिन्संतुष्टे गजवदन एवापि विबुधे ततस्ते संतुष्टास्त्रिभुवनगताः स्युर्बुधगणाः । दयालुर्हेरंबो न च भवति यस्मिंश्च पुरुषे वृथा सर्वं तस्य प्रजननमतः सांद्र-तमसि ॥ २३ ॥ वरेण्यो भ्रूशुंडिर्भृगुगुरुकुजा मुद्गलमुखा ह्यपारास्तद्भक्ता जपहवनपूजास्तुतिपराः । गणेशोऽयं भक्त-प्रिय इति च सर्वत्र गदितं विभक्तिर्यत्रास्ते स्वयमपि सदा तिष्ठति गणः ॥ २४ ॥ मृदः काश्चिद्धातोश्छदविलिखिता वापि दृषदः स्मृता व्याजान्मूर्तिः पथि यदि बहिर्येन सहसा । अशुद्धोद्धा द्रष्टा प्रवदति तदाह्वां गणपते श्रुता शुद्धो मर्त्यो भवति दुरिताद्विस्मय इति ॥ २५ ॥ बहि-र्द्वारस्योर्ध्वं गजवदनवर्ष्मैधनमयं प्रशस्तं वा कृत्वा विवि-धकुशलैस्तत्र निहतम् । प्रभावात्तन्मूर्त्यां भवति सदनं

मंगलमयं विलोक्यानंदस्तां भवति जगतो विस्मय इति ॥२६॥ सिते भाद्रे मासे प्रतिशरदि मध्याह्नसमये मृदो मूर्तिं कृत्वा गणपतितिथौ ढुंढिसदृशीम् । समर्चंत्युत्साहः प्रभवति महान् सर्वसदने विलोक्यानंदस्तां प्रभवति नृणां विस्मय इति ॥२७॥ तथा ह्येकः श्लोको वरयति महिम्नो गणपतेः कथं स श्लोकेऽस्मिन् स्तुत इति भवेत्संप्रपतिते । स्मृतं नामास्यैकं सकृदिदमनंताह्वयसमं यतो यस्यैकस्य स्तवनसदृशं नान्यदपरम् ॥ २८ ॥ गजवदन विभोयद्वर्णितं वैभवं ते त्विह जनुषि ममेत्थं चारु तद्दर्शयाशु । त्वमसि च करुणायाः सागरः कृत्स्नदाताप्यति तव भृतकोहं सर्वदा चिंतकोऽस्मि ॥२९॥ सुस्तोत्रं प्रपठतु नित्यमेतदेवं स्वानंदं प्रति गमनेऽप्ययं सुमार्गः । संचिन्त्यं स्वमनसि तत्पदारविन्दं स्थाप्याग्रे स्तवनफलं नतीः करिष्ये ॥३०॥ गणेशदेवस्य माहात्म्यमेतद्यः श्रावयेद्वापि पठेच्च तस्य । क्लेशा लयं यांति लभेच्च शीघ्रं स्त्रीपुत्रविद्यार्थगृहं च मुक्तिम् ॥३१॥ इति श्रीपुष्पदंतविरचितं श्रीगणेशमहिम्नस्तोत्रं संपूर्णम् ॥

६. गणेशाष्टोत्तरशतनामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ यम उवाच । गणेश हेरंब गजाननेति महोदर स्वानुभवप्रकाशिन् । वरिष्ठ सिद्धिप्रिय बुद्धिनाथ वदंतमेवं त्यजत प्रभीताः ॥ १ ॥ अनेकविघ्नांतक

वक्रतुंड स्वसंज्ञवासिंश्च चतुर्भुजेति । कवीश देवांतकनाशकारिन्वदंतमेवं त्यजत प्रभीताः ॥ २ ॥ महेशसूनो गजदैत्यशत्रो वरेण्यसूनो विकट त्रिनेत्र । परेश पृथ्वीधर एकदंत वदंत० ॥ ३ ॥ प्रमोद मोदेति नरांतकारे षड्‌र्मिहंतर्गजकर्ण ढुंढे । द्वन्द्वारिसिन्धो स्थिरभावकारिन् वदंत० ॥४॥ विनायक ज्ञानविघातशत्रो पराशरस्यात्मज विष्णुपुत्र । अनादिपूज्याऽऽखुग सर्वपूज्य वदंत० ॥ ५ ॥ विघ्नेज्य लंबोदर धूम्रवर्ण मयूरपालेति मयूरवाहिन् । सुरासुरैः सेवितपादपद्म वदंत० ॥ ६ ॥ वरिन्महाखुध्वज शूर्पकर्ण शिवाज सिंहस्थ अनंतवाह । दितौज विघ्नेश्वर शेषनाभे वदंत० ॥ ७ ॥ अणोरणीयो महतो महीयो रवेर्ज योगेशज ज्येष्ठराज । निधीश मंत्रेश च शेषपुत्र वदंत० ॥ ८ ॥ वरप्रदातरदितेश्च सूनो परात्परज्ञानद तारवक्र । गुहाग्रज ब्रह्मप पार्श्वपुत्र वदंत० ॥९॥ सिन्धोश्च शत्रो परशुप्रपाणे शमीशपुष्पप्रिय विघ्नहारिन् । दूर्वाभरैरर्चित देवदेव वदंत० ॥ १० ॥ धियः प्रदातश्च शमिप्रियेति सुसिद्धिदातश्च सुशांतिदातः । अमेयमायामितविक्रमेति वदंत० ॥ ११ ॥ द्विधाचतुर्थीप्रिय कश्यपाच्च धनप्रद ज्ञानपदप्रकाश । चिन्तामणे चित्तिविहारकारिन् वदंत० ॥ १२ ॥ यमस्य शत्रो अभिमानशत्रो विधेर्ज हंतः कपिलस्य सूनो । विदेह स्वानंद अयोगयोग वदंत०

॥ १३ ॥ गणस्य शत्रो कमलस्य शत्रो समस्तभावज्ञ च भालचंद्र । अनादिमध्यांतमयप्रचारिन् वदंत० ॥ १४ ॥ विभो जगद्रूप गणेश भूमन् पुष्टेः पते आखुगतेतिबोधः। कर्तुश्च पातुश्च तु संहरेति वदंत० ॥१५॥ इदमष्टोत्तरशतं नाम्नां तस्य पठंति ये । शृण्वंति तेषु वै भीताः कुरुत मा प्रवेशनम् ॥ १६ ॥ भुक्तिमुक्तिप्रदं ढुंढेर्धनधान्यप्रवर्धनम् । ब्रह्मभूतकरं स्तोत्रं जपंतं नित्यमादरात् ॥ १७ ॥ यत्र कुत्र गणेशस्य चिह्नयुक्तानि वै भटाः । धामानि तत्र संभीताः कुरुत मा प्रवेशनम् ॥ १८ ॥ इति श्रीमदांत्ये मौद्गल्ये गणेशाष्टोत्तरशतनामस्तोत्रं समाप्तम् ।

७. संकष्टनाशनगणेशस्तोत्रम् ।

श्रीगणेशाय नमः ॥ नारद उवाच । प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् । भक्तावासं स्मरेन्नित्यमायुःकामार्थसिद्धये ॥ १ ॥ प्रथमं वक्रतुंडं च एकदंतं द्वितीयकम् । तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ॥ २ ॥ लंबोदरं पंचमं च षष्ठं विकटमेव च । सप्तमं विघ्नराजेंद्रं धूम्रवर्णं तथाष्टमम् ॥ ३ ॥ नवमं भालचंद्रं च दशमं तु विनायकम् । एकादशं गणपतिं द्वादशं तु गजाननम् ॥ ४ ॥ द्वादशैतानि नामानि त्रिसंध्यं यः पठेन्नरः । न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभो ॥ ५ ॥ विद्यार्थी लभते विद्यां धनार्थी लभते धनम् । पुत्रार्थी लभते

पुत्रान्मोक्षार्थी लभते गतिम् ॥ ६ ॥ जपेद्गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत् । संवत्सरेण सिद्धिं च लभते नात्र संशयः ॥ ७ ॥ अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् । तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः ॥८॥ इति श्रीनारदपुराणे संकष्टनाशनं नाम गणेशस्तोत्रं संपूर्णम् ॥

८. गणेशाष्टकम् ।

श्रीगणेशाय नमः ॥ सर्वे ऊचुः । यतोऽनंतशक्तेरनताश्च जीवा यतो निर्गुणादप्रमेया गुणास्ते । यतो भाति सर्वं त्रिधा भेदभिन्नं सदा तं गणेशं नमामो भजामः ॥ १ ॥ यतश्चाविरासीज्जगत्सर्वमेतत्तथाऽब्जासनो विश्वगो विश्वगोप्ता । तथेंद्रादयो देवसंघा मनुष्याः सदा तं गणेशं नमामो भजामः ॥ २ ॥ यतो वह्निभानू भवो भूर्जलं च यतः सागराश्चंद्रमा व्योम वायुः । यतः स्थावरा जंगमा वृक्षसंघाः सदा तं गणेशं नमामो भजामः ॥ ३ ॥ यतो दानवाः किन्नरा यक्षसंघा यतश्चारणा वारणाः श्वापदाश्च । यतः पक्षिकीटा यतो वीरुधश्च सदा तं गणेशं नमामो भजामः ॥ ४ ॥ यतो बुद्धिरज्ञाननाशो मुमुक्षोर्यतः संपदो भक्तसंतोषिकाः स्युः । यतो विघ्ननाशो यतः कार्यसिद्धिः सदा तं गणेशं नमामो भजामः ॥ ५ ॥ यतः पुत्रसंपद्यतो वांछितार्थो यतोऽभक्तविघ्नास्तथाऽनेकरूपाः । यतः शोकमोहौ यतः काम एव सदा तं गणेशं नमामो

भजामः ॥ ६ ॥ यतोऽनंतशक्तिः स शेषो बभूव धराधारणेऽनेकरूपे च शक्तः । यतोऽनेकधा स्वर्गलोका हि नाना सदा तं गणेशं नमामो भजामः ॥७॥ यतो वेदवाचो विकुंठा मनोभिः सदा नेति नेतीति यत्ता गृणंति । परब्रह्मरूपं चिदानंदभूतं सदा तं गणेशं नमामो भजामः ॥ ८ ॥ श्रीगणेश उवाच । पुनरूचे गणाधीशः स्तोत्रमेतत्पठेन्नरः । त्रिसंध्यं त्रिदिनं तस्य सर्वकार्यं भविष्यति ॥ ९ ॥ यो जपेदष्टदिवसं श्लोकाष्टकमिदं शुभम् । अष्टवारं चतुर्थ्यां तु सोऽष्टसिद्धीरवाप्नुयात् ॥१०॥ यः पठेन्मासमात्रं तु दशवारं दिनेदिने । स मोचयेद्बंधगतं राजवध्यं न संशयः ॥ ११ ॥ विद्याकामो लभेद्विद्यां पुत्रार्थी पुत्रमाप्नुयात् । वांछिताँल्लभते सर्वानेकविंशतिवारतः ॥ १२ ॥ यो जपेत्परया भक्त्या गजाननपरो नरः । एवमुक्त्वा ततो देवश्चांतर्धानं गतः प्रभुः ॥ १३ ॥ इति श्रीगणेशपुराणे उपासनाखंडे श्रीगणेशाष्टकं संपूर्णम् ।

९. एकदंतस्तोत्रम् ।

श्रीगणेशाय नमः ॥ मदासुरं सुशांतं वै दृष्ट्वा विष्णुमुखाः सुराः । भृग्वादयश्च मुनय एकदंतं समाययुः ॥१॥ प्रणम्य तं प्रपूज्यादौ पुनस्तं नेमुरादरात् । तुष्टुवुर्हर्षसंयुक्ता एकदंतं गणेश्वरम् ॥ २ ॥ देवर्षय ऊचुः । सदात्मरूपं सकलादिभूतममायिनं सोहमचिंत्यबोधम् । अनादिमध्यांतविहीनमेकं

हीनमेकं तमेकदंतं शरणं व्रजामः ॥ ३ ॥ अनंतचिद्रूपमयं गणेशं ह्यभेदभेदादिविहीनमाद्यम् । हृदि प्रकाशस्य धुरं स्वधीस्थं तमेकदंतं शरणं व्रजामः ॥ ४ ॥ विश्वादिभूतं हृदि योगिनां वै प्रत्यक्षरूपेण विभांतमेकम् । सदा निरालंबसमाधिगम्यं तमेकदंतं शरणं० ॥ ५ ॥ स्वबिंबभावेन विलासयुक्तं बिंबस्वरूपा रचिता स्वमाया । तस्यां स्ववीर्यं प्रददाति यो वै तमेकदंतं० ॥ ६ ॥ त्वदीयवीर्येण समर्थभूता माया तया संरचितं च विश्वम् । नादात्मकं ह्यात्मतया प्रतीतं तमेकदंतं श० ॥ ७ ॥ त्वदीयसत्ताधरमेकदंतं गणेशमेकं त्रयबोधितारम् । सेवंत आपुस्तमजं त्रिसंस्थास्तमेकदंतं० ॥८॥ ततस्त्वया प्रेरित एव नादस्तेनेदमेवं रचितं जगद्वै । आनंदरूपं समभावसंस्थं तमेक०॥९॥ तदेव विश्वं कृपया तवैव संभूतमाद्यं तमसा विभातम् । अनेकरूपं ह्यजमेकभूतं तमेक० ॥१०॥ ततस्त्वया प्रेरितमेव तेन सृष्टं सुसूक्ष्मं जगदेकसंस्थम् । सत्त्वात्मकं श्वेतमनंतमाद्यं तमेक० ॥११॥ तदेव स्वप्नं तपसा गणेशं संसिद्धिरूपं विविधं बभूव । सदैकरूपं कृपया तवापि तमेक० ॥ १२ ॥ संप्रेरितं तच्च त्वया हृदिस्थं तथा सुसृष्टं जगदंशरूपम् । तेनैव जाग्रन्मयमप्रमेयं तमेक० ॥१३ ॥ जाग्रत्स्वरूपं रजसा विभातं विलोकितं तत्कृपया यदैव । तदा विभिन्नं भवत्येकरूपं तमेक० ॥ १४ ॥ एवं च सृष्ट्वा

प्रकृतिस्वभावात्तदंतरे त्वं च विभासि नित्यम् । बुद्धिप्रदाता गणनाथ एकस्तमेक० ॥ १५ ॥ त्वदाज्ञया भानि ग्रहाश्च सर्वे नक्षत्ररूपाणि विभांति खे वै । आधारहीनानि त्वया धृतानि तमेक० ॥ १६ ॥ त्वदाज्ञया सृष्टिकरो विधाता त्वदाज्ञया पालक एव विष्णुः । त्वदाज्ञया संहरको हरोऽपि तमेक० ॥१७॥ यदाज्ञया भूर्जलमध्यसंस्था यदाज्ञयाऽपः प्रवहंति नद्यः । सीमां सदा रक्षति वै समुद्रस्तमेक० ॥ १८ ॥ यदाज्ञया देवगणो दिविस्थो ददाति वै कर्मफलानि नित्यम् । यदाज्ञया शैलगणोऽचलो वै तमेक० ॥ १९ ॥ यदाज्ञया शेष इलाधरो वै यदाज्ञया मोहप्रदश्च कामः । यदाज्ञया कालधरोऽर्यमा च तमेक० ॥ २० ॥ यदाज्ञया वाति विभाति वायुर्यदाज्ञयाऽग्निर्जठरादिसंस्थः । यदाज्ञया वै सचराचरं च तमेक० ॥ २१ ॥ सर्वांतरे संस्थितमेकगूढं यदाज्ञया सर्वमिदं विभाति । अनंतरूपं हृदि बोधकं वै तमेक० ॥ २२ ॥ यं योगिनो योगबलेन साध्यं कुर्वंति तं कः स्तवनेन स्तौति । अतः प्रणामेन सुसिद्धिदोऽस्तु तमेक० ॥ २३ ॥ गृत्समद उवाच । एवं स्तुत्वा च प्रह्लाद देवाः समुनयश्च वै । तूष्णींभावं प्रपद्येव ननृतुर्हर्षसंयुताः ॥ २४ ॥ स तानुवाच प्रीतात्मा ह्येकदंतः स्तवेन वै । जगाद तान्महाभागान्देवर्षीन्भक्तवत्सलः ॥ २५ ॥ एकदंत

थरतरत्संध्यावयस्याश्रिरं हेरंबस्य जयंति दंतकिरणाकीर्णाः शरीरत्विषः ॥ ७ ॥ शुंडाग्राकलितेन हेमकलशेनावर्जितेन क्षरन्नानारत्नचयेन साधकजनान्संभावयन्कोटिशः । दानामोदविनोदलुब्धमधुपप्रोत्सारणाविर्भवत्कर्णांदोलनखेलनो विजयते देवो गणग्रामणीः ॥ ८ ॥ हेरंबं प्रणमामि यस्य पुरतः शांडिल्यमूले श्रिया बिभ्रत्यांबुरुहे समं मधुरिपुस्ते शंखचक्रे वहन् । न्यग्रोधस्य तले सहाद्रिसुतया शंभुस्तया दक्षिणे बिभ्राणः परशुं त्रिशूलसितया देव्या धरण्या सह ॥ ९ ॥ पश्चात्पिप्पलमाश्रितो रतिपतिर्देवस्य रत्योत्पले बिभ्रत्या सममैक्षवं धनुरिषून्पौष्पान्वहन्पंच च । वामे चक्रगदाधरः स भगवान्क्रोडप्रियागोस्तले हस्तोद्यच्छुकशालिमंजरिकया देव्या धरण्या सह ॥ १० ॥ षट्कोणाश्रिषु षट्सु षड्गजमुखाः पाशांकुशाभीवरान्बिभ्राणाः प्रमदासखाः पृथुमहाशोणाश्मपुंजत्विषः । आमोदः पुरतः प्रमोदसुमुखौ तं चाभितो दुर्मुखः पश्चात्पार्श्वगतोऽस्य विघ्न इति यो यो विघ्नकर्तेति च ॥११॥ आमोदादिगणेश्वरप्रियतमास्तत्रैव नित्यं स्थिताः कांताश्लेषरसज्ञमंथरदृशः सिद्धिः समृद्धिस्ततः । कांतिर्या मदनावतीत्यपि तथा कल्पेषु या गीयते सान्या यापि मदद्रवा तदपरा द्राविण्यमूः पूजिताः ॥ १२ ॥ आश्लिष्टौ वसुधेत्यथो वसुमती ताभ्यां सितालोहितौ वर्षंतौ वसु

पार्श्वयोर्विलसतस्तौ शंखपद्मौ निधी। अंगान्यन्वथ मातरश्च परितः शक्रादयोऽब्जाश्रयास्तद्वाह्ये कुलिशादयः परिपतत्कालानलज्योतिषः ॥ १३ ॥ इत्थं विष्णुशिवादितत्त्वतनवे श्रीवक्रतुंडाय हुंकाराक्षिप्तसमस्तदैत्यपृतनाव्राताय दीप्तत्विषे। आनंदैकरसावबोधलहरीविध्वस्तसर्वोर्मये सर्वत्र प्रथमानमुग्धमहसे तस्मै परस्मै नमः ॥१४॥ सेवाहेवाकिदेवासुरनरनिकरस्फारकोटीरकोटीकाटिव्याटीकमानद्युमणिसममणिश्रेणिभावेणिकानाम्। राजन्नीराजनश्रीसुखचरणनखद्योतविद्योतमानः श्रेयः स्थेयः स देयान्मम विमलदृशो बंधुरं सिंधुरास्यः ॥ १५ ॥ एतेन प्रकटरहस्यमंत्रमालागर्भेण स्फुटतरसंविदा स्तवेन। यः स्तौति प्रचुरतरं महागणेशं तस्येयं भवति वशंवदा त्रिलोकी ॥१६॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीराघवचैतन्यविरचितं महागणपतिस्तोत्रं समाप्तम् ॥

विष्णुस्तोत्राणि ।

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदांतिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः ।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥

विष्णुस्तोत्राणि ।

११. नारायणवर्म ।

श्रीगणेशाय नमः ॥ राजोवाच । येन गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् । क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥ १ ॥ भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् । यथाततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥ २ ॥ श्रीशुक उवाच । वृतः पुरोहितस्त्वाष्ट्रो महेंद्रायानुपृच्छते । नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥ विश्वरूप उवाच । धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मुखः । कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः ॥ ४ ॥ नारायणमयं वर्म सन्नह्येद्भय आगते । दैवभूतात्मकर्मभ्यो नारायणमयः पुमान् ॥ ५ ॥ पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि । मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत् ॥ ६ ॥ ॐनमो नारायणायेति विपर्ययमथापि वा । करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ॥ ७ ॥ प्रणवादि यकारांतमंगुल्यंगुष्ठपर्वसु । न्यसेद्धृदय ॐकारं विकारमनु मूर्धनि ॥८॥ षकारं तु भ्रुवोर्मध्ये णकारं शिखया न्यसेत् । वेकारं नेत्रयोर्युंज्यान्नकारं सर्वसंधिषु ॥ ९ ॥ मकारमस्त्रमुद्दिश्य मंत्रमूर्तिर्भवेद्बुधः । सविसर्गं फडंतं तत्सर्वदिक्षु विनिर्दिशेत् ॥ १० ॥ ॐविष्णवे नमः ॥

इत्यात्मानं परं ध्यायेद्ध्येयं षट्शक्तिभिर्युतम् । विद्यातेजस्तपोमूर्तिमिमं मंत्रमुदाहरेत् ॥ ११ ॥ ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे। दरारिचर्मासिगदेपुचापपाशान्दधानोऽष्टगुणोऽष्टबाहुः ॥ १२ ॥ जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् । स्थलेषु मायावटुवामनोऽव्यात् त्रिविक्रमः खेऽवतु विश्वरूपः ॥ १३ ॥ दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः । विमुंचतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ १४ ॥ रक्षत्वसौ माऽध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः । रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजो माम् ॥ १५ ॥ मामुग्रधर्मादखिलात्प्रमादान्नारायणः पातु नरश्च हासात् । दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः कर्मबंधात् ॥ १६॥ सनत्कुमारोऽवतु कामदेवाद्धयाननो मां पथि देवहेलनात् । देवर्षिवर्यः पुरुषार्चनांतरात्कूर्मो हरिर्मां निरयादशेषात् ॥ १७ ॥ धन्वंतरिर्भगवान्पात्वपथ्याद्द्वंद्वाद्भयादृषभो निर्जितात्मा । यज्ञश्च लोकादवताज्जनांताद्बलो गणात्क्रोधवशादहींद्रः ॥ १८ ॥ द्वैपायनो भगवानप्रबोधाद्बुद्धस्तु पाषंडगणात्प्रमादात् । कल्किः कलेः कालमलात्प्रपातु धर्मावनायोरुकृतावतारः ॥ १९ ॥ मां केशवो गदया प्रातरव्याद्गोविंद आसंगव आत्तवेणुः । नारायणः

प्राह्ण उदात्तशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः ॥ २० ॥ देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो माम् । दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥ २१ ॥ श्रीवत्सधामाऽपररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः । दामोदरोऽव्यादनुसंध्यं प्रभाते विश्वेश्वरो भगवान्कालमूर्तिः ॥ २२ ॥ चक्रं युगांतानलतिग्मनेमि भ्रमत्समंताद्भगवत्प्रयुक्तम् । दंदग्धि दंदग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ॥२३॥ गदेऽशनिस्पर्शनविस्फुलिंगे निष्पिंढि निष्पिंढ्यजितप्रियासि । कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् ॥ २४ ॥ त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् । नरेंद्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कंपयन् ॥२५॥ त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिंधि छिंधि । चक्षूंषि चर्मन् शतचंद्र छादय द्विषामघोनां हर पापचक्षुषाम् ॥ २६ ॥ यन्नो भयं ग्रहेभ्योऽभूत्केतुभ्यो नृभ्य एव च । सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योऽघेभ्य एव च ॥ २७ ॥ सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् । प्रयांतु संक्षयं सद्यो येऽन्ये श्रेयःप्रतीपकाः ॥२८॥ गरुडो भगवान्स्तोत्रस्तोभश्छंदोमयः प्रभुः । रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनस्य वाहनम् ॥ २९ ॥ सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः । बुद्धींद्रियमनःप्राणान् पांतु पार्षद-

भूषणाः ॥ ३० ॥ यथा हि भगवानेव वस्तुतः सदसच्च यत् । सत्येनानेन नः सर्वे यांतु नाशमुपद्रवाः ॥ ३१ ॥ यथैकात्म्यानुभावानां विकल्परहितः स्वयम् । भूषणा-युधलिंगाख्या धत्ते शक्तीः स्वमायया ॥ ३२ ॥ तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः । पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३३ ॥ विदिक्षु दिक्षूर्ध्वमधः समं-तादंतर्बहिर्भगवान्नारसिंहः । प्रहापयँल्लोकभयं स्वनेन स्व-तेजसा ग्रस्तसमस्ततेजाः ॥ ३४ ॥ मघवन्निदमाख्यातं वर्म नारायणात्मकम् । विजेष्यस्यंजसा येन दंशितोऽसुरयू-थपान् ॥ ३५ ॥ एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा । पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते ॥ ३६ ॥ न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् । राजदस्युग्र-हादिभ्यो व्याध्यादिभ्यश्च कर्हिचित् ॥ ३७ ॥ इमां विद्यां पुरा कश्चित्कौशिको धारयन् द्विजः । योगधारणया स्वांगं जहौ स मरुधन्वनि ॥ ३८ ॥ तस्योपरि विमानेन गंधर्व-पतिरेकदा । ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ३९ ॥ गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शिराः । स वालखिल्यवचनादस्थीन्यादाय विस्मितः ॥ ४० ॥ प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् । य इदं शृणु-यात्काले यो धारयति चादृतः । तं नमस्यंति भूतानि मुच्यते सर्वतो भयात् ॥ ४१ ॥ श्रीशुक उवाच । एतां

विद्यामधिगतो विश्वरूपाच्छतक्रतुः । त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ ४२ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे नारायणवर्मकथनं नामाष्टमोऽध्यायः ॥

१२ विष्णुपंजरस्तोत्रम् ।

श्रीगणेशाय नमः । ॐ अस्य श्रीविष्णुपंजरस्तोत्रमंत्रस्य । नारद ऋषिः । अनुष्टुप् छंदः । श्रीविष्णुः परमात्मा देवता । अहं बीजम् । सोहं शक्तिः । ॐह्रीं कीलकम् । मम सर्वदेहरक्षणार्थं जपे विनियोगः । नारदऋषये नमः मुखे । श्रीष्णुपरमात्मदेवतायै नमः हृदये । अहं बीजं गुह्ये । सोहं शक्तिः पादयोः । ॐह्रीं कीलकं पादाग्रे । ॐह्रांह्रींह्रूंह्रैंह्रौंह्रः इति मंत्रः । ॐह्रां अंगुष्ठाभ्यां नमः । ॐह्रीं तर्जनीभ्यां नमः । ॐह्रूं मध्यमाभ्यां नमः । ॐह्रैं अनामिकाभ्यां नमः । ॐह्रौं कनिष्ठिकाभ्यां नमः । ॐह्रः करतलकरपृष्ठाभ्यां नमः । इति करन्यासः । अथ हृदयादिन्यासः । ॐह्रां हृदयाय नमः । ॐह्रीं शिरसे स्वाहा । ॐह्रूं शिखायै वषट् । ॐह्रैं कवचाय हुम् । ॐह्रौं नेत्रत्रयाय वौषट् । ॐह्रः अस्त्राय फट् । इति अंगन्यासः । अहंबीजप्राणायामं मंत्रत्रयेण कुर्यात् । अथ ध्यानम् । परं परस्मात्प्रकृतेरनादिमेकं निविष्टं बहुधा गुहायाम् । सर्वालयं सर्वचराचरस्थं नमामि विष्णुं जगदेकनाथम् ॥ १ ॥ ॐ विष्णुपंजरकं दिव्यं सर्वदुष्टनिवारणम् ।

उग्रतेजो महावीर्यं सर्वशत्रुनिकृंतनम् ॥ २ ॥ त्रिपुरं दह-
मानस्य हरस्य ब्रह्मणोदितम् । तदहं संप्रवक्ष्यामि
आत्मरक्षाकरं नृणाम् ॥ ३ ॥ पादौ रक्षतु गोविंदो जंघे
चैव त्रिविक्रमः । ऊरू मे केशवः पातु कटिं चैव जना-
र्दनः ॥ ४ ॥ नाभिं चैवाच्युतः पातु गुह्यं चैव तु वाम-
नः । उदरं पद्मनाभश्च पृष्ठं चैव तु माधवः ॥ ५ ॥ वाम-
पार्श्वं तथा विष्णुर्दक्षिणं मधुसूदनः । बाहू वै वासुदेवश्च
हृदि दामोदरस्तथा ॥ ६ ॥ कंठं रक्षतु वाराहः कृष्णश्च
मुखमंडलम् । माधवः कर्णमूले तु हृषीकेशश्च नासिके
॥ ७ ॥ नेत्रे नारायणो रक्षेल्ललाटं गरुडध्वजः । कपोलौ
केशवो रक्षेद्वैकुंठः सर्वतोदिशम् ॥ ८ ॥ श्रीवत्सांकश्च
सर्वेषामंगानां रक्षको भवेत् । पूर्वस्यां पुंडरीकाक्ष
आग्नेय्यां श्रीधरस्तथा ॥ ९ ॥ दक्षिणे नारसिंहश्च नैर्ऋत्यां
माधवोऽवतु । पुरुषोत्तमो मे वारुण्यां वायव्यां च
जनार्दनः ॥ १० ॥ गदाधरस्तु कौबेर्यामीशान्यां पातु
केशवः । आकाशे च गदा पातु पाताले च सुदर्शनम्
॥ ११ ॥ सन्नद्धः सर्वगात्रेषु प्रविष्टो विष्णुपंजरः ।
विष्णुपंजरविष्टोऽहं विचरामि महीतले ॥ १२ ॥ राजद्वा-
रेऽपथे घोरे संग्रामे शत्रुसंकटे । नदीषु च रणे चैव
चोरव्याघ्रभयेषु च ॥ १३ ॥ डाकिनीप्रेतभूतेषु भयं तस्य
न जायते । रक्ष रक्ष महादेव रक्ष रक्ष जनेश्वर ॥ १४ ॥

रक्षंतु देवताः सर्वा ब्रह्मविष्णुमहेश्वराः । जले रक्षतु वाराहः स्थले रक्षतु वामनः ॥ १५ ॥ अटव्यां नारसिंहश्च सर्वतः पातु केशवः । दिवा रक्षतु मां सूर्यो रात्रौ रक्षतु चंद्रमाः ॥ १६ ॥ पंथानं दुर्गमं रक्षेत्सर्वमेव जनार्दनः । रोगविघ्नहतश्चैव ब्रह्महा गुरुतल्पगः ॥ १७ ॥ स्त्रीहंता बालघाती च सुरापो वृषलीपतिः । मुच्यते सर्वपापेभ्यो यः पठेन्नात्र संशयः ॥ १८ ॥ अपुत्रो लभते पुत्रं धनार्थी लभते धनम् । विद्यार्थी लभते विद्यां मोक्षार्थी लभते गतिम् ॥ १९ ॥ आपदो हरते नित्यं विष्णुस्तोत्रार्थसंपदा । यस्त्विदं पठते स्तोत्रं विष्णुपंजरमुत्तमम् ॥ २० ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति । गोसहस्रफलं तस्य वाजपेयशतस्य च ॥ २१ ॥ अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः । सर्वकामं लभेदस्य पठनान्नात्र संशयः ॥ २२ ॥ जले विष्णुः स्थले विष्णुर्विष्णुः पर्वतमस्तके । ज्वालामालाकुले विष्णुः सर्वं विष्णुमयं जगत् ॥२३॥ इति श्रीब्रह्मांडपुराणे इंद्रनारदसंवादे श्रीविष्णुपंजरस्तोत्रं संपूर्णम् ॥

१३. श्रीमदच्युताष्टकम् ।

श्रीगणेशाय नमः ॥ अच्युताच्युत हरे परमात्मन् रामकृष्ण पुरुषोत्तम विष्णो । वासुदेव भगवन्ननिरुद्ध श्रीपते शमय दुःखमशेषम् ॥ १ ॥ विश्वमंगल विभो जगदीश

नंदनंदन नृसिंह नरेंद्र । मुक्तिदायक मुकुंद मुरारे श्रीपते शमय दुःखमशेषम् ॥ २ ॥ रामचंद्र रघुनायक देव दीननाथ दुरितक्षयकारिन् । यादवेंद्र यदुभूषण यज्ञ श्रीपते शमय दुःखमशेषम् ॥ ३ ॥ देवकीतनय दुःखदवाग्ने राधिकारमण रम्यसुमूर्ते । दुःखमोचन दयार्णव नाथ श्रीपते शमय दुःखमशेषम् ॥४॥ गोपिकावदनचंद्रचकोर नित्य निर्गुण निरंजन जिष्णो । पूर्णरूप जय शंकर शर्व श्रीपते शमय दुःखमशेषम् ॥ ५ ॥ गोकुलेश गिरिधारण धीर यामुनाच्छतटखेलन वीर । नारदादिमुनिवंदितपाद श्रीपते शमय दुःखमशेषम् ॥ ६ ॥ द्वारकाधिप दुरंतगुणाब्धे प्राणनाथ परिपूर्ण भवारे । ज्ञानगम्य गुणसागर ब्रह्मन् श्रीपते शमय दुःखमशेषम् ॥ ७ ॥ दुष्टनिर्दलन देव दयालो पद्मनाभ धरणीधर धर्मिन् । रावणांतक रमेश मुरारे श्रीपते शमय दुःखमशेषम् ॥ ८ ॥ अच्युताष्टकमिदं रमणीयं निर्मितं भवभयं विनिहंतुम् । यः पठेद्विषयवृत्तिनिवृत्तिर्जन्मदुःखमखिलं स जहाति ॥ ९ ॥ इति श्रीशंकराचार्यविरचितमच्युताष्टकस्तोत्रं समाप्तम् ॥

१४. अच्युताष्टकम् ।

श्रीगणेशाय नमः । अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम् । श्रीधरं माधवं गोपिकावल्लभं

जानकीनायकं रामचंद्रं भजे ॥ १ ॥ अच्युतं केशवं सत्यभामाधवं माधवं श्रीधरं राधिकाऽराधितम् । इंदिरा-मंदिरं चेतसा सुंदरं देवकीनंदनं नंदजं संदधे ॥ २ ॥ विष्णवे जिष्णवे शंखिने चक्रिणे रुक्मिणीरागिणे जान-कीजानये । बल्लवीवल्लभायार्चितायात्मने कंसविध्वंसिने वंशिने ते नमः ॥ ३ ॥ कृष्ण गोविंद हे राम नारायण श्रीपते वासुदेवाजित श्रीनिधे । अच्युतानंत हे माधवा-धोक्षज द्वारकानायक द्रौपदीरक्षक ॥ ४ ॥ राक्षसक्षो-भितः सीतया शोभितो दंडकारण्यभूपुण्यताकारणः । लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसंपूजितो राघवः पातु माम् ॥ ५ ॥ धेनुकारिष्टकाऽनिष्टकृद्द्वेषिणां केशिहा कंसहृद्वंशिकावादकः । पूतनाकोपकः सूरजाखेलनो बा-लगोपालकः पातु मां सर्वदा ॥ ६ ॥ विद्युदुद्योतवान्प्र-स्फुरद्वाससं प्रावृडंभोदवत्प्रोल्लसद्विग्रहम् । वन्यया मा-लया शोभितोरःस्थलं लोहितांघ्रिद्वयं वारिजाक्षं भजे ॥ ७ ॥ कुंचितैः कुंतलैर्भ्राजमानाननं रत्नमौलिं लसत्कुं-डलं गंडयोः । हारकेयूरकं कंकणप्रोज्वलं किंकिणीमंजुलं श्यामलं तं भजे ॥ ८ ॥ अच्युतस्याष्टकं यः पठेदिष्टदं प्रेमतः प्रत्यहं पूरुषः सस्पृहम् । वृत्ततः सुंदरं कर्तृ विश्वं-भरं तस्य वश्यो हरिर्जायते सत्वरम् ॥ ९ ॥ इति श्रीशंकराचार्यविरचितमच्युताष्टकं संपूर्णम् ॥

१५. आचार्यकृतषट्पदी ।

श्रीगणेशाय नमः ॥ अविनयमपनय विष्णो दमय मनः शमय विषयमृगतृष्णाम् । भूतदयां विस्तारय तारय संसारसागरतः ॥ १ ॥ दिव्यधुनीमकरंदे परिमलपरिभोगसच्चिदानंदे । श्रीपतिपदारविंदे भवभयखेदच्छिदे वंदे ॥ २ ॥ सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् । सामुद्रो हि तरंगः क्वचन समुद्रो न तारंगः ॥३॥ उद्धृतनग नगभिदनुज दनुजकुलामित्र मित्रशशिदृष्टे । दृष्टे भवति प्रभवति न भवति किं भवतिरस्कारः ॥ ४ ॥ मत्स्यादिभिरवतारैरवतारवताऽवता सदा वसुधाम् । परमेश्वर परिपाल्यो भवता भवतापभीतोऽहम् ॥ ५ ॥ दामोदर गुणमंदिर सुंदरवदनारविंद गोविंद । भवजलधिमथनमंदर परमं दरमपनय त्वं मे ॥ ६ ॥ नारायण करुणामय शरणं करवाणि तावकौ चरणौ । इति षट्पदी मदीये वदनसरोजे सदा वसतु ॥ ७ ॥ इति श्रीमच्छंकराचार्यविरचितं षट्पदीस्तोत्रं संपूर्णम् ॥

१६. विष्णुस्तवराजः ।

श्रीगणेशाय नमः ॥ पद्मोवाच । योगेन सिद्धविबुधैः परिभाव्यमानं लक्ष्म्यालयं तुलसिकाचितभक्तभृंगम् । प्रोत्तुंगरक्तनखरांगुलिपत्रचित्रं गंगारसं हरिपदांबुजमाश्रयेऽहम् ॥ १ ॥ गुंफन्मणिप्रचयघट्टितराजहंससिंजत्सु-

नूपुरयुतं पदपद्मवृंदम् । पीतांबरांचलविलोलचलत्पताकं स्वर्णत्रिवक्रवलयं च हरेः स्मरामि ॥ २ ॥ जंघे सुपर्णगलनीलमणिप्रवृद्धे शोभास्पदारुणमणिद्युतिचंचुमध्ये । आरक्तपादतललंबनशोभमाने लोकेक्षणोत्सवकरे च हरेः स्मरामि ॥ ३ ॥ ते जानुनी मखपतेर्भुजमूलसंगरंगोत्सवावृततडिद्वसने विचित्रे । चंचत्पतत्रिमुखनिर्गतसामगीतविस्तारितात्मयशसी च हरेः स्मरामि ॥ ४ ॥ विष्णोः कटिं विधिकृतांतमनोजभूमिं जीवांडकोशगणसंगदुकूलमध्याम् । नानागुणप्रकृतिपीतविचित्रवस्त्रां ध्याये निबद्धवसनां खगपृष्ठसंस्थाम् ॥ ५ ॥ शांतोदरं भगवतस्त्रिवलिप्रकाशमावर्तनाभिविकसद्विधिजन्मपद्मम् । नाडीनदीगणरसोत्थसितांत्रसिंधुं ध्यायेंऽडकोशनिलयं तनुलोमरेखम् ॥ ६ ॥ वक्षः पयोधितनयाकुचकुंकुमेन हारेण कौस्तुभमणिप्रभया विभातम् । श्रीवत्सलक्ष्म हरिचंदनजप्रसूनमालोचितं भगवतः सुभगं स्मरामि ॥ ७ ॥ बाहू सुवेषसदनौ वलयांगदादिशोभास्पदौ दुरितदैत्यविनाशदक्षौ । तौ दक्षिणौ भगवतश्च गदासुनाभतेजोर्जितौ सुललितौ मनसा स्मरामि ॥ ८ ॥ वामौ भुजौ मुररिपोर्धृतपद्मशंखौ श्यामौ करींद्रकरवन्मणिभूषणाढ्यौ । रक्तांगुलिप्रचयचुंबितजानुमध्यौ पद्मालयाप्रियकरौ रुचिरौ स्मरामि ॥ ९ ॥ कंठं मृणालममलं मुखपंकजस्य

लेखात्रयेण वनमालिकया निवीतम्। किंवा विमुक्तिव-शमंत्रकसत्फलस्य वृंतं चिरं भगवतः सुभगं स्मरामि ॥ १० ॥ वक्त्रांबुजं दशनहासविकासरम्यं रक्ताधरौष्ठवर-कोमलवाक्सुधाढ्यम् । सन्मानसोद्भवचलेक्षणपत्रचित्रं लोकाभिरामममलं च हरेः स्मरामि ॥ ११ ॥ सूरात्मजा-वसथगंधमिदं सुनासं भ्रूपल्लवं स्थितिलयोदयकर्मदक्षम्। कामोत्सवं च कमलाहृदयप्रकाशं संचिंतयामि हरिवक्त्र-विलासदक्षम् ॥ १२ ॥ कर्णौ लसन्मकरकुंडलगंधलोलौ नानादिशां च नभसश्च विकासगेहम्। लोलालकप्रचयचुं-बनकुंचिताग्रौ लग्नौ हरेर्मणिकिरीटतटे स्मरामि ॥ १३ ॥ भालं विचित्रतिलकं प्रियचारुगंधगोरोचनारचनया लल-नाक्षिसख्यम्। ब्रह्मैकधाम मणिकांतकिरीटजुष्टं ध्याये मनोनयनहारकमीश्वरस्य ॥ १४ ॥ श्रीवासुदेवचिकुरं कुटिलं निबद्धं नानासुगंधिकुसुमैः स्वजनादरेण। दीर्घं रमाहृदयगाशमनं धुनंतं ध्यायेऽम्बुवाहरुचिरं हृदयाब्ज-मध्ये ॥ १५ ॥ मेघाकारं सोमसूर्यप्रकाशं सुभ्रून्नासं शक्रचापैकमानम्। लोकातीतं पुंडरीकायताक्षं विद्युच्चैलं चाश्रयेऽहं त्वपूर्वम् ॥ १६ ॥ दीनं हीनं सेवया दैवगत्या पापैस्तापैः पूरितं मे शरीरम्। लोभाक्रांतं शोकमोहादि-विद्धं कृपादृष्ट्या पाहि मां वासुदेव ॥ १७ ॥ ये भक्त्याद्यां ध्यायमानां मनोज्ञां व्यक्तिं विष्णोः षोडशश्लोकपुष्पैः।

स्तुत्वा नत्वा पूजयित्वा विधिज्ञाः शुद्धा मुक्ता ब्रह्मसौख्यं प्रयांति ॥ १८ ॥ पद्मेरितमिदं पुण्यं शिवेन परिभाषितम् । धन्यं यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं परम् ॥ १९ ॥ पठंति ये महाभागास्ते मुच्यंतेंऽहसोऽखिलात् । धर्मार्थकाममोक्षाणां परत्रेह फलप्रदम् ॥ २० ॥ इति श्रीकल्किपुराणेऽनुभागवते भविष्ये पद्माप्रोक्तो विष्णुस्तवराजः संपूर्णः ॥

१७. नारायणस्तोत्रम् ।

श्रीगणेशाय नमः ॥ नारायण नारायण जय गोविंद हरे । नारायण नारायण जय गोपाल हरे ॥ ध्रु० ॥ करुणापारावारा वरुणालयगंभीरा । नारायण० ॥ १ ॥ घननीरदसंकाशा कृतकलिकल्मषनाशा । नारायण० ॥ २ ॥ यमुनातीरविहारा धृतकौस्तुभमणिहारा । नारायण० ॥ ३ ॥ पीतांबरपरिधाना सुरकल्याणनिधाना । नारायण० ॥ ४ ॥ मंजुलगुंजाभूषा मायामानुषवेषा । नारायण० ॥ ५ ॥ राधाऽधरमधुरसिका रजनीकरकुलतिलका । नारायण० ॥ ६ ॥ मुरलीगानविनोदा वेदस्तुतभूपादा । नारायण० ॥ ७ ॥ बर्हिनिबर्हापीडा नटनाटकफणिक्रीडा । नारायण० ॥ ८ ॥ वारिजभूषाभरणा राजिवरुक्मिणीरमणा । नारायण० ॥ ९ ॥ जलरुहदलनिभनेत्रा जगदारंभकसूत्रा । नारायण० ॥ १० ॥ पातकरजनीसंहर करुणालय मामुद्धर । नारायण० ॥ ११ ॥ अघबकक्षयकंसारे केशव

कृष्ण मुरारे । नारायण० ॥ १२ ॥ हाटकनिभपीतांबर अभयं कुरु मे मावर । नारायण० ॥१३॥ दशरथराजकुमारा दानवमदसंहारा । नारायण० ॥१४॥ गोवर्धनगिरिरमणा गोपीमानसहरणा । नारायण० ॥ १५ ॥ सरयूतीरविहारा सज्जनऋषिमंदारा । नारायण० ॥ १६ ॥ विश्वामित्रमखत्रा विविधपरासुचरित्रा । नारायण० ॥ १७ ॥ ध्वजवज्रांकुशपादा धरणीसुतसहमोदा । नारायण० ॥ १८ ॥ जनकसुताप्रतिपाला जय जय संस्मृतिलीला । नारायण० ॥ १९ ॥ दशरथवाग्धृतिभारा दंडकवनसंचारा । नारायण० ॥ २० ॥ मुष्टिकचाणूरसंहारा मुनिमानसविहारा । नारायण० ॥२१॥ वालिविनिग्रहशौर्या वरसुग्रीवहितार्या । नारायण० ॥ २२ ॥ मां मुरलीकरधीवर पालय पालय श्रीधर । नारायण० ॥ २३ ॥ जलनिधिबंधनधीरा रावणकंठविदारा । नारायण० ॥ २४ ॥ ताटीमददलनाढ्या नटगुणविविधधनाढ्या । नारायण० ॥ २५ ॥ गौतमपत्नीपूजन करुणाघनावलोकन । नारायण० ॥२६॥ संभ्रमसीताहारा साकेतपुरविहारा । नारायण० ॥ २७ ॥ अचलोद्धृतिचंचत्कर भक्तानुग्रहतत्पर । नारायण० ॥ २८ ॥ नैगमगानविनोदा रक्षःसुतप्रह्लादा । नारायण० ॥ २९ ॥ भारतियतिवरशंकर नानामृतमखिलांतर । नारायण नारायण जय गोपाल हरे ॥ ३० ॥ इति श्रीमच्छंकराचार्यविरचितं नारायणस्तोत्रं संपूर्णम् ॥

१८. विष्णोरष्टाविंशतिनामस्तोत्रम् ।

श्रीगणेशाय नमः॥ अर्जुन उवाच । किं नु नामसहस्राणि जपते च पुनः पुनः । यानि नामानि दिव्यानि तानि चाचक्ष्व केशव ॥१॥ श्रीभगवानुवाच । मत्स्यं कूर्मं वराहं च वामनं च जनार्दनम् । गोविंदं पुंडरीकाक्षं माधवं मधुसूदनं ॥२॥ पद्मनाभं सहस्राक्षं वनमालिं हलायुधम् । गोवर्धनं हृषीकेशं वैकुंठं पुरुषोत्तमम् ॥३॥ विश्वरूपं वासुदेवं रामं नारायणं हरिम् । दामोदरं श्रीधरं च वेदांगं गरुडध्वजम् ॥४॥ अनंतं कृष्णगोपालं जपतो नास्ति पातकम् । गवां कोटिप्रदानस्य अश्वमेधशतस्य च ॥ ५ ॥ कन्यादानसहस्राणां फलं प्राप्नोति मानवः । अमायां वा पौर्णमास्यामेकादश्यां तथैव च ॥ ६ ॥ संध्याकाले स्मरन्नित्यं प्रातःकाले तथैव च । मध्याह्ने च जपन्नित्यं सर्वपापैः प्रमुच्यते ॥७॥ इति श्रीकृष्णार्जुनसंवादे विष्णोरष्टाविंशतिनामस्तोत्रं संपूर्णम्॥

१९. मुकुंदमाला ।

श्रीगणेशाय नमः ॥ वंदे मुकुंदमरविंददलायताक्षं कुंदेंदुशंखदशनं शिशुगोपवेषम् । इंद्रादिदेवगणवंदितपादपीठं वृंदावनालयमहं वसुदेवसूनुम् ॥ १ ॥ श्रीवल्लभेति वरदेति दयापरेति भक्तप्रियेति भवलुंठनकोविदेति । नाथेति नागशयनेति जगन्निवासेत्यालापिनं प्रतिदिनं कुरु मां मुकुंद ॥ २ ॥ जयतु जयतु देवो देवकीनंदनोऽयं जयतु

जयतु कृष्णो वृष्णिवंशप्रदीपः । जयतु जयतु मेघश्यामलः कोमलांगो जयतु जयतु पृथ्वीभारनाशो मुकुंदः ॥ ३ ॥ मुकुंद मूर्ध्ना प्रणिपत्य याचे भवंतमेकांतमियंतमर्थम् । अविस्मृतिस्त्वच्चरणारविंदे भवे भवे मेऽस्तु भवत्प्रसादात् ॥४॥ श्रीगोविंदपदांभोजमधुनो महदद्भुतम् । यत्पायिनो न मुंचंति मुंचंति यदपायिनः ॥ ५ ॥ नाहं वंदे तव चरणयोर्द्वंद्वमद्वंद्वहेतोः कुंभीपाकं गुरुमपि हरे नामकं नापनेतुम् । रम्यारामामृदुतनुलतानंदनेनापि रंतुं भावे भावे हृदयभवने भावयेयं भवंतम् ॥ ६ ॥ नास्था धर्मे न वसुनिचये नैव कामोपभोगे यद्यद्भव्यं भवतु भगवन्पूर्वकर्मानुरूपम् । एतत्प्रार्थ्यं मम बहु मतं जन्मजन्मांतरेऽपि त्वत्पादांभोरुहयुगगता निश्चला भक्तिरस्तु ॥ ७ ॥ दिवि वा भुवि वा ममास्तु वासो नरके वा नरकांतक प्रकामम् । अवधीरितशारदारविंदौ चरणौ ते मरणेऽपि चिंतयामि ॥ ८ ॥ सरसिजनयने सशंखचक्रे मुरभिदि मा विरमस्व चित्त रंतुम् । सुखतरमपरं न जातु जाने हरिचरणस्मरणामृतेन तुल्यम् ॥ ९ ॥ मा भैर्मंदमनो विचिंत्य बहुधा यामीश्चिरं यातना नैवामी प्रभवंति पापरिपवः स्वामी ननु श्रीधरः । आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥ १० ॥ भवजलधिगतानां द्वंद्ववाताहतानां सुतदुहितृ-

कलत्रत्राणभाराद्दितानाम् । विषमविषयतोये मज्जतामप्लवानां भवति शरणमेको विष्णुपोतो नराणाम् ॥ ११ ॥ रजसि निपतितानां मोहजालावृतानां जननमरणदोलादुर्गसंसर्गगाणाम् । शरणमशरणानामेक एवातुराणां कुशलपथनियुक्तश्चक्रपाणिर्नराणाम् ॥ १२ ॥ अपराधसहस्रसंकुलं पतितं भीमभवार्णवोदरे । अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥ १३ ॥ मा मे स्त्रीत्वं मा च मे स्यात्कुभावो मा मूर्खत्वं मा कुदेशेषु जन्म । मिथ्यादृष्टिर्मा च मे स्यात्कदाचिज्जातौ जातौ विष्णुभक्तो भवेयम् ॥१४॥ कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् । करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ॥ १५ ॥ यत्कृतं यत्करिष्यामि तत्सर्वं न मया कृतम् । त्वया कृतं तु फलभुक्त्वमेव मधुसूदन ॥ १६ ॥ भवजलधिमगाधं दुस्तरं निस्तरेयं कथमहमिति चेतो मा स्म गाः कातरत्वम् । सरसिजदृशि देवे तावकी भक्तिरेका नरकभिदि निषण्णा तारयिष्यत्यवश्यम् ॥१७॥ तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले दारावर्ते तनयसहजग्राहसंघाकुले च । संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्पादांभोजे वरद भवतो भक्तिभावं प्रदेहि ॥ १८ ॥ पृथ्वी रेणुरणुः पयांसि कणिकाः फल्गुः स्फुलिंगो लघुस्तेजो निःश्वसनं मरुत्तनुतरं रंध्रं सुसूक्ष्मं नभः । क्षुद्रा

रुद्रपितामहप्रभृतयः कीटाः समस्ताः सुरा दृष्टे यत्र स तावको विजयते श्रीपादधूलीकणः ॥१९॥ आम्नायाभ्यसनान्यरण्यरुदितं वेदव्रतान्यन्वहं भेदच्छेदफलानि पूर्तविधयः सर्वं हुतं भस्मनि । तीर्थानामवगाहनानि च गजस्नानं विना यत्पदद्वंद्वांभोरुह संस्मृतिं विजयते देवः स नारायणः ॥ २० ॥ आनंद गोविंद मुकुंद राम नारायणानंत निरामयेति । वक्तुं समर्थोऽपि न वक्ति कश्चिदहो जनानां व्यसनानि मोक्षे ॥ २१ ॥ क्षीरसागरतरंगसीकरासारतारकितचारुमूर्तये । भोगिभोगशयनीयशायिने माधवाय मधुविद्विषे नमः ॥ २२ ॥ इति श्रीकुलशेखरेण राज्ञा विरचिता मुकुंदमाला संपूर्णा ॥

२०. श्रीविष्णोः षोडशनामस्तोत्रम् ।

श्रीगणेशाय नमः॥ औषधे चिन्तयेद्विष्णुं भोजने च जनार्दनम् । शयने पद्मनाभं च विवाहे च प्रजापतिम् ॥ १ ॥ युद्धे चक्रधरं देवं प्रवासे च त्रिविक्रमम् । नारायणं तनुत्यागे श्रीधरं प्रियसंगमे ॥ २ ॥ दुःस्वप्ने स्मर गोविन्दं संकटे मधुसूदनम् । कानने नारसिंहं च पावके जलशायिनम् ॥ ३ ॥ जलमध्ये वराहं च पर्वते रघुनन्दनम् । गमने वामनं चैव सर्वकार्येषु माधवम् ॥ ४ ॥ षोडशैतानि नामानि प्रातरुत्थाय यः पठेत् । सर्वपापविनिर्मुक्तो

विष्णुलोके महीयते ॥ ५ ॥ इति श्रीविष्णोः षोडशनामस्तोत्रं संपूर्णम् ॥

२१. विष्णुशतनामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ नारद उवाच । ॐ वासुदेवं हृषीकेशं वामनं जलशायिनम् । जनार्दनं हरिं कृष्णं श्रीवक्षं गरुडध्वजम् ॥ १ ॥ वाराहं पुंडरीकाक्षं नृसिंहं नरकांतकम् । अव्यक्तं शाश्वतं विष्णुमनंतमजमव्ययम् ॥ २ ॥ नारायणं गदाध्यक्षं गोविंदं कीर्तिभाजनम् । गोवर्धनोद्धरं देवं भूधरं भुवनेश्वरम् ॥ ३ ॥ वेत्तारं यज्ञपुरुषं यज्ञेशं यज्ञवाहकम् । चक्रपाणिं गदापाणिं शंखपाणिं नरोत्तमम् ॥ ४ ॥ वैकुंठं दुष्टदमनं भूगर्भं पीतवाससम् । त्रिविक्रमं त्रिकालज्ञं त्रिमूर्तिं नंदकेश्वरम् ॥ ५ ॥ रामं रामं हयग्रीवं भीमं रौद्रं भवोद्भवम् । श्रीपतिं श्रीधरं श्रीशं मंगलं मंगलायुधम् ॥ ६ ॥ दामोदरं दमोपेतं केशवं केशिसूदनम् । वरेण्यं वरदं विष्णुमानंदं वसुदेवजम् ॥ ७ ॥ हिरण्यरेतसं दीप्तं पुराणं पुरुषोत्तमम् । सकलं निष्कलं शुद्धं निर्गुणं गुणशाश्वतम् ॥ ८ ॥ हिरण्यतनुसंकाशं सूर्यायुतसमप्रभम् । मेघश्यामं चतुर्बाहुं कुशलं कमलेक्षणम् ॥ ९ ॥ ज्योतीरूपमरूपं च स्वरूपं रूपसंस्थितम् । सर्वज्ञं सर्वरूपस्थं सर्वेशं सर्वतोमुखम् ॥ १० ॥ ज्ञानं कूटस्थमचलं ज्ञानदं परमं प्रभुम् । योगीशं योगनिष्णातं योगिनं

योगरूपिणम् ॥ ११ ॥ ईश्वरं सर्वभूतानां वंदे भूतमयं प्रभुम् । इति नामशतं दिव्यं वैष्णवं खलु पापहम् ॥ १२ ॥ व्यासेन कथितं पूर्वं सर्वपापप्रणाशनम् । यः पठेत्प्रातरुत्थाय स भवेद्वैष्णवो नरः ॥ १३ ॥ सर्वपापविशुद्धात्मा विष्णुसायुज्यमाप्नुयात् । चांद्रायणसहस्राणि कन्यादानशतानि च ॥ १४ ॥ गवां लक्षसहस्राणि मुक्तिभागी भवेन्नरः । अश्वमेधायुतं पुण्यं फलं प्राप्नोति मानवः ॥ १५ ॥ इति श्रीविष्णुपुराणे विष्णुशतनामस्तोत्रं संपूर्णम् ।

२२. परमेश्वरस्तुतिसारस्तोत्रम् ।

श्रीगणेशाय नमः ॥ त्वमेकः शुद्धोऽसि त्वयि निगमबाह्यामलमयं प्रपंचं पश्यंति भ्रमपरवशाः पापनिरताः । बहिस्तेभ्यः कृत्वा स्वपदशरणं मानय विभो गजेंद्रे दृष्टं ते शरणद वदान्यं स्वपददम् ॥ १ ॥ न सृष्टेस्ते हानिर्यदि हि कृपयातोऽवसि च मां त्वयानेके गुप्ता व्यसनमिति तेऽस्ति श्रुतिपथे । अतो मामुद्धर्तुं घटय मयि दृष्टिं सुविमलां न रिक्तां मे याञ्चां स्वजनरत कर्तुं भव हरे ॥ २ ॥ कदाऽहं भोः स्वामिन्नियतमनसा त्वां हृदि भजन्नभद्रे संसारे ह्यनवरतदुःखेऽतिविरसः । लभेयं तां शांतिं परममुनिभिर्या ह्यधिगता दयां कृत्वा मे त्वं वितर परशांतिं भव हरे ॥ ३ ॥ विधाता चेद्विश्वं सृजति सृजतां मे शुभकृतिं विधुश्चेत्पाता माऽवतु जनिमृतेर्दुःखजलधेः । हरः संहर्ता

संहरतु मम शोकं सजनकं यथाऽहं मुक्तः स्यां किमपि तु तथा ते विदधताम् ॥ ४ ॥ अहं ब्रह्मानंदस्त्वमपि च तदाख्यः सुविदितस्ततोऽहं भिन्नो नो कथमपि भवत्तः श्रुतिदृशा । तथा चेदानीं त्वं त्वयि मम विभेदस्य जननीं स्वमायां संवार्य प्रभव मम भेदं निरसितुम् ॥ ५ ॥ कदाऽहं हे स्वामिन् जनिमृतिमयं दुःखनिविडं भवं हित्वा सत्येऽनवरतसुखे स्वात्मवपुषि । रमे तस्मिन्नित्यं निखिलमुनयो ब्रह्मरसिका रमंते यस्मिंस्ते कृतसकलकृत्या यतिवराः ॥ ६ ॥ पठंत्येके शास्त्रं निगममपरे तत्परतया यजंत्यन्ये त्वां वै ददति च पदार्थांस्तव हितान् । अहं तु स्वामिंस्ते शरणमगमं संसृतिभयाद्यथा ते प्रीतिः स्याद्धितकर तथा त्वं कुरु विभो ॥ ७ ॥ अहं ज्योतिर्नित्यो गगनमिव तृप्तः सुखमयः श्रुतिः सिद्धोऽद्वैतः कथमपि न भिन्नोऽस्मि विधुतः । इति ज्ञाते तत्त्वे भवति च परः संसृतिलयादतस्तत्त्वज्ञानं मयि विघटयेस्त्वं हि कृपया ॥ ८ ॥ अनादौ संसारे जनिमृतिमये दुःखितमना मुमुक्षुः सन्कश्चिद्भजति हि गुरुं ज्ञानपरमम् । ततो ज्ञात्वा यं वै तुदति न पुनः क्लेशनिवहैर्भजेऽहं तं देवं भवति च परो यस्य भजनात् ॥ ९ ॥ विवेको वैराग्यं न च शमदमाद्याः षडपरे मुमुक्षा मे नास्ति प्रभवति कथं ज्ञानममलम् । अतः संसाराब्धे-

स्तरणसरणिं मामुपदिशन् स्वबुद्धिं श्रौतीं मे वितर भगवं-स्त्वं हि कृपया ॥ १० ॥ कदाऽहं भो स्वामिन्निगममतिवेद्यं शिवमयं चिदानंदं नित्यं श्रुतिहृतपरिच्छेदनिवहम् । त्वमर्थाभिन्नं त्वामभिरम इहात्मन्यविरतं मनीषामेवं मे सफलय वदान्य स्वकृपया ॥ ११ ॥ यदर्थं सर्वं वै प्रियमसुधनादि प्रभवति स्वयं नान्यार्थो हि प्रिय इति च वेदे प्रविदितम् । स आत्मा सर्वेषां जनिमृतिमतां वेदगदित-स्ततोऽहं तं वेद्यं सततममलं यामि शरणम् ॥ १२ ॥ मया त्यक्तं सर्वं कथमपि भवे स्वात्मनि मतिस्त्वदीया माया मां प्रति तु विपरीतं कृतवती । ततोऽहं किं कुर्यां नहि मम मतिः क्वापि चरति दयां कृत्वा नाथ स्वपदशरणं देहि शिवदम् ॥ १३ ॥ नगा दैत्याः कीशा भवजलधिपारं हि गमितास्त्वया चान्ये स्वामिन्किमिति समयेऽस्मिन्छ-यितवान् । न हेलां त्वं कुर्यास्त्वयि निहितसर्वे मयि विभो नहि त्वाऽहं हित्वा कमपि शरणं चान्यमगमम् ॥ १४ ॥ अनंताद्या विज्ञानगुणजलधेस्तेंऽतमगमन्नतः पारं यायात्त-व गुणगणानां कथमयम् । गृणन्यावद्धित्वा जनिमृतिहरं याति परमां गतिं योगिप्राप्यामिति मनसि बुद्ध्वाहमनवम् ॥ १५ ॥ इति श्रीमन्मौक्तिकरामोदासीनशिष्यब्रह्मानंद-विरचितं परमेश्वरस्तुतिसारस्तोत्रं संपूर्णम् ॥

२३. भगवच्छरणस्तोत्रम्।

श्रीगणेशाय नमः ॥ सच्चिदानंदरूपाय भक्तानुग्रहकारिणे। मायानिर्मितविश्वाय महेशाय नमो नमः ॥ १ ॥ रोगा हरंति सततं प्रबलाः शरीरं कामादयोऽप्यनुदिनं प्रदहंति चित्तम्। मृत्युश्च नृत्यति सदा कलयन्दिनानि तस्मात्त्वमद्य शरणं मम दीनबंधो ॥ २ ॥ देहो विनश्यति सदा परिणामशीलश्चित्तं च खिद्यति सदा विषयानुरागि। बुद्धिः सदा हि रमते विषयेषु नांतस्तस्मात्त्वमद्य शरणं मम दीनबंधो ॥ ३ ॥ आयुर्विनश्यति यथामघटस्थतोयं विद्युत्प्रभेव चपला बत यौवनश्रीः। वृद्धा प्रधावति यथा मृगराजपत्नी तस्मात्त्वमद्य शरणं मम दीनबंधो ॥४॥ आयाद्व्ययो मम भवत्यधिको विनीते कामादयो हि बलिनो विबलाः शमाद्याः। मृत्युर्यदा तुदति मां बत किं वदेयं तस्मात्० ॥५॥ तप्तं तपो नहि कदापि मयेह तन्वा वाण्या तथा नहि कदापि तपश्च तप्तम्। मिथ्याभिभाषणपरेण न मानसं हि तस्मात्० ॥ ६ ॥ स्तब्धं मनो मम सदा नहि याति सौम्यं चक्षुश्च मे न तव पश्यति विश्वरूपम्। वाचा तथैव न वदेन्मम सौम्यवाणीं तस्मात्० ॥ ७ ॥ सत्त्वं न मे मनसि याति रजस्तमोभ्यां विद्धे तदा कथमहो शुभकर्मवार्ता। साक्षात्परंपरतया सुखसाधनं तत्तस्मात्० ॥ ८ ॥ पूजा कृता

नहि कदापि मया त्वदीया मंत्रं त्वदीयमपि मे न जपे-द्गसज्ञा । चित्तं न मे स्मरति ते चरणौ ह्यवाप्य तस्मात्० ॥ ९ ॥ यज्ञो न मेऽस्ति हुतिदानदयादियुक्तो ज्ञानस्य साधनगणो न विवेकमुख्यः । ज्ञानं क्व साधनगणेन विना क्व मोक्षस्तस्मात्० ॥ १० ॥ सत्संगतिर्हि विदिता तव भक्तिहेतुः साऽप्यद्य नास्ति बत पंडितमानिनो मे । तामंतरेण नहि सा क्व च बोधवार्ता तस्मात्० ॥ ११ ॥ दृष्टिर्न भूतविषया समताभिधाना वैषम्यमेव तदियं विषयीकरोति । शांतिः कुतो मम भवेत्समता न चेत्स्यात्त-स्मात्० ॥ १२ ॥ मैत्री समेषु न च मेऽस्ति कदापि नाथ दीने तथा न करुणा मुदिता च पुण्ये । पापेऽनुपेक्षणवतो मम मुत्कथं स्यात्तस्मात्० ॥ १३ ॥ नेत्रादिकं मम बहि-र्विषयेषु सक्तं नांतर्मुखं भवति तामविहाय तस्य । क्वांत-र्मुखत्वमपहाय सुखस्य वार्ता तस्मात्० ॥ १४ ॥ त्यक्तं गृहाद्यपि मया भवतापशांत्यै नासीदसौ हृतहृदो मम मायया ते । सा चाधुना किमु विधास्यति नेति जाने तस्मात्० ॥ १५ ॥ प्राप्ता धनं गृहकुटुंबगजाश्वदारा राज्यं यदैहिकमथेंद्रपुरश्च नाथ । सर्वं विनश्वरमिदं न फलाय कस्मै तस्मात्० ॥ १६ ॥ प्राणान्निरुध्य विधिना न कृतो हि योगो योगं विनाऽस्ति मनसः स्थिरता कुतो मे । तां वै विना मम न चेतसि शांतिवार्ता तस्मात्० ॥ १७ ॥

ज्ञानं यथा मम भवेत्कृपया गुरूणां सेवां तथा न विधिनाकरवं हि तेषाम्। सेवापि साधतनया विदितास्ति चित्ते तस्मात्० ॥ १८ ॥ तीर्थादिसेवनमहाविधिना हि नाथ नाकारि येन मनसो मम शोधनं स्यात्। शुद्धिं विना न मनसोऽवगमापवर्गौ तस्मात्० ॥ १९ ॥ वेदांतशीलनमपि प्रमितिं करोति ब्रह्मात्मनः प्रमितिसाधनसंयुतस्य। नैवास्ति साधनलवो मयि नाथ तस्मात्तस्मात्० ॥ २० ॥ गोविंद शंकर हरे गिरिजेश मेश शंभो जनार्दन गिरीश मुकुंद साम्ब। नान्या गतिर्मम कथंचन वां विहाय तस्मात्प्रभो मम गतिः कृपया विधेया ॥ २१ ॥ एतत्स्तवं भगवदाश्रयणाभिधानं ये मानवाः प्रतिदिनं प्रणताः पठंति। ते मानवा भवरतिं परिभूय शांतिं गच्छंति किंच परमात्मनि भक्तिमद्धा ॥ २२ ॥ इति श्रीमन्मौक्तिकरामोदासीनशिष्यब्रह्मानंदविरचितं भगवच्छरणस्तोत्रं संपूर्णम् ॥

२४ हरिनाममालास्तोत्रम्।

श्रीगणेशाय नमः ॥ गोविंदं गोकुलानंदं गोपालं गोपिवल्लभम्। गोवर्धनोद्धरं धीरं तं वंदे गोमतीप्रियम् ॥ १ ॥ नारायणं निराकारं नरवीरं नरोत्तमम्। नृसिंहं नागनाथं च तं वंदे नरकांतकम् ॥ २ ॥ पीतांबरं पद्मनाभं पद्माक्षं पुरुषोत्तमम्। पवित्रं परमानंदं तं वंदे परमेश्वरम् ॥ ३ ॥

राघवं रामचंद्रं च रावणारिं रमापतिम् । राजीवलोचनं रामं तं वंदे रघुनंदनम् ॥ ४ ॥ वामनं विश्वरूपं च वासुदेवं च विट्ठलम् । विश्वेश्वरं विभुं व्यासं तं वंदे वेदवल्लभम् ॥ ५ ॥ दामोदरं दिव्यसिंहं दयालुं दीननायकम् । दैत्यारिं देवदेवेशं तं वंदे देवकीसुतम् ॥६॥ मुरारिं माधवं मत्स्यं मुकुंद मुष्टिमर्दनम् । मुंजकेशं महाबाहुं तं वंदे मधुसूदनम् ॥ ७ ॥ केशवं कमलाकांतं कामेशं कौस्तुभप्रियम् । कौमोदकीधरं कृष्णं तं वंदे कौरवांतकम् ॥ ८ ॥ भूधरं भुवनानंदं भूतेशं भूतनायकम् । भावनैकं भुजंगेशं तं वंदे भावनाशनम् ॥ ९ ॥ जनार्दनं जगन्नाथं जगज्जाड्यविनाशकम् । जामदग्न्यं वरं ज्योतिस्तं वंदे जलशायिनम् ॥ १० ॥ चतुर्भुजं चिदानंदं चाणूरमल्लमर्दनम् । चराचरगतं देवं तं वंदे चक्रपाणिनम् ॥ ११ ॥ श्रियःकरं श्रियो नाथं श्रीधरं श्रीवरप्रदम् । श्रीवत्सलधरं सौम्यं तं वंदे श्रीसुरेश्वरम् ॥ १२ ॥ योगीश्वरं यज्ञपतिं यशोदानंददायकम् । यमुनाजलकल्लोलं तं वंदे यदुनायकम् ॥१३॥ शालिग्रामशिलाशुद्धं शंखचक्रोपशोभितम् । सुरासुरसदासेव्यं तं वंदे साधुवल्लभम् ॥ १४ ॥ त्रिविक्रमं तपोमूर्तिं त्रिविधाघौघनाशनम् । त्रिस्थलं तीर्थराजेंद्रं तं वंदे तुलसीप्रियम् ॥ १५ ॥ अनंतमादिपुरुषमच्युतं च वरप्रदम् । आनंदं च सदानंदं तं वंदे चाघनाशनम् ॥ १६ ॥ लीलया

धृतभूभारं लोकसत्त्वैकवंदितम् । लोकेश्वरं च श्रीकांतं तं वंदे लक्ष्मणप्रियम् ॥ १७ ॥ हरिं च हरिणाक्षं च हरिनाथं हरिप्रियम् । हलायुधसहायं च तं वंदे हनुमत्पतिम् ॥ १८ ॥ हरिनाथकृता माला पवित्रा पापनाशिनी । बलिराजेंद्रेण चोक्ता कंठे धार्या प्रयत्नतः ॥ १९ ॥ इति बलिराजेंद्रेणोक्तं हरिनाममालास्तोत्रं संपूर्णम् ॥

२५. शालिग्रामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ अस्य श्रीशालिग्रामस्तोत्रमंत्रस्य श्रीभगवानृषिः । नारायणो देवता । अनुष्टुप् छंदः । श्रीशालिग्रामस्तोत्रमंत्रजपे विनियोगः । युधिष्ठिर उवाच । श्रीदेवदेव देवेश देवतार्चनमुत्तमम् । तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे पुरुषोत्तम ॥ १ ॥ श्रीभगवानुवाच । गंडक्यां चोत्तरे तीरे गिरिराजस्य दक्षिणे । दशयोजनविस्तीर्णा महाक्षेत्रवसुंधरा ॥ २ ॥ शालिग्रामो भवेद्देवो देवी द्वारावती भवेत् । उभयोः संगमो यत्र मुक्तिस्तत्र न संशयः ॥ ३ ॥ शालिग्रामशिला यत्र यत्र द्वारावती शिला । उभयोः संगमो यत्र मुक्तिस्तत्र न संशयः ॥ ४ ॥ आजन्मकृतपापानां प्रायश्चित्तं य इच्छति । शालिग्रामशिलावारि पापहारि पिबेन्नरः ॥ ५ ॥ अकालमृत्युहरणं सर्वव्याधिविनाशनम् । विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ॥६॥ शंखमध्ये स्थितं तोयं भ्रामितं केशवोपरि ।

अंगलग्नं मनुष्याणां ब्रह्महत्यादिकं दहेत् ॥ ७ ॥ स्नानो- दकं पिबेन्नित्यं चक्रांकितशिलोद्भवम् । प्रक्षाल्य शुद्धं त- त्तोयं ब्रह्महत्यां व्यपोहति ॥ ८ ॥ अग्निष्टोमसहस्राणि वाज- पेयशतानि च । सम्यक् फलमवाप्नोति विष्णोर्नैवेद्यभ- क्षणात् ॥ ९ ॥ नैवेद्ययुक्तां तुलसीं च मिश्रितां विशेषतः पादजलेन विष्णोः । योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यम् ॥ १० ॥ खंडिता स्फुटिता भिन्ना वह्निदग्धा तथैव च । शालिग्रामशिला यत्र तत्र दोषो न विद्यते ॥ ११ ॥ न मंत्रः पूजनं नैव न तीर्थं न च भावना । न स्तुतिर्नोपचारश्च शालिग्रामशिलार्चने ॥ १२ ॥ ब्रह्महत्यादिकं पापं मनोवाक्कायसंभवम् । शीघ्रं नश्यति तत्सर्वं शालिग्रामशिलार्चनात् ॥ १३ ॥ नानावर्ण- मयं चैव नानाभोगेन वेष्टितम् । तथा वरप्रसादेन लक्ष्मीकांतं वदाम्यहम् ॥ १४ ॥ नारायणोद्भवो देवश्चक्र- मध्ये च कर्मणा । तथा वरप्रसादेन लक्ष्मीकांतं वदाम्य- हम् ॥ १५ ॥ कृष्णे शिलातले यत्र सूक्ष्मं चक्रं च दृश्यते। सौभाग्यं संततिं धत्ते सर्वसौख्यं ददाति च ॥ १६ ॥ वासुदेवस्य चिह्नानि दृष्ट्वा पापैः प्रमुच्यते । श्रीधरः सुकरे वामे हरिद्वर्णस्तु दृश्यते ॥ १७ ॥ वाराहरूपिणं देवं कूर्मां- गैरपि चिह्नितम् । गोपदं तत्र दृश्येत वाराहं वामनं तथा ॥ १८ ॥ पीतवर्णं तु देवानां रक्तवर्णं भयानकम् । नार-

आनंदप्लवमानबोधमधुरामोदच्छटामेदुरं तं भूमानमुपास्महे परिणतं दंतावलास्यात्मना ॥ १ ॥ तारश्रीपरशक्तिकामवसुधारूपानुगं यं विदुस्तस्मै स्तात्प्रणतिर्गणाधिपतये यो रागिणाभ्यर्थ्यते । आमन्त्र्य प्रथमं वरेति वरदेत्यार्तेन सर्वं जनं स्वामिन्मे वशमानयेति सततं स्वाहादिभिः पूजितः ॥ २ ॥ कल्लोलांचलचुंबितांबुदतताविक्षुद्रवांभोनिधौ द्वीपे रत्नमये सुरद्रुमवनामोदैकमेदस्विनि । मूले कल्पतरोर्महामणिमये पीठेऽक्षरांभोरुहे षट्कोणाकलितत्रिकोणरचनासत्कर्णिकेऽमुं भजे ॥ ३ ॥ चक्रप्रासरसालकार्मुकगदासद्बीजपूरद्विजव्रीह्यग्रोत्पलपाशपंकजकरं शुंडाग्रजाग्रद्घटम् । आश्लिष्टं प्रियया सरोजकरया रत्नस्फुरद्भूषया माणिक्यप्रतिमं महागणपतिं विश्वेशमाशास्महे ॥ ४ ॥ दानांभःपरिमेदुरप्रसृमरव्यालंबिरोलंबभृत्सिंदूरारुणगंडमंडलयुगव्याजात्प्रशस्तिद्वयम् । त्रैलोक्येष्टविधानवर्णसुभगं यः पद्मरागोपमं धत्ते स श्रियमातनोतु सततं देवो गणानां पतिः ॥ ५ ॥ भ्राम्यन्मंदरघूर्णनापरवशक्षीराब्धिवीचिच्छटासच्छायाश्चलचामरव्यतिकरश्रीगर्वसर्वंकषाः । दिक्कांताघनसारचंदनरसासाराः श्रयंतां मनः स्वच्छंदप्रसरप्रलिप्तवियतो हेरंबदंतत्विषः॥ ६ ॥ मुक्ताजालकरंबितप्रविकसन्माणिक्यपुंजच्छटा कांताः कंबुकदंबचुंबितवनांभोजप्रवालोपमाः । ज्योत्स्नापूरतरंगमं-

उवाच। स्तोत्रेण च प्रसन्नोऽस्मि सुराः सर्षिगणाः किल।
वृणुध्वं वरदोऽहं वो दास्यामि मनसीप्सितम् ॥ २६ ॥
भवत्कृतं मदीयं वै स्तोत्रं प्रीतिप्रदं मम । भविष्यति
न संदेहः सर्वसिद्धिप्रदायकम् ॥ २७ ॥ यं यमिच्छति
तं तं वै दास्यामि स्तोत्रपाठतः । पुत्रपौत्रादिकं सर्वं
लभते धनधान्यकम् ॥ २८ ॥ गजाश्वादिकमत्यंतं
राज्यभोगं लभेद्ध्रुवम्। भुक्तिं मुक्तिं च योगं वै लभते
शांतिदायकम् ॥ २९ ॥ मारणोच्चाटनादीनि राज्यबंधा-
दिकं च यत्। पठतां शृण्वतां नृणां भवेच्च बंधहीनता
॥ ३० ॥ एकविंशतिवारं च श्लोकांश्चैवैकविंशतिम्।
पठते नित्यमेवं च दिनानि त्वेकविंशतिम् ॥३१॥ न तस्य
दुर्लभं किंचित्त्रिषु लोकेषु वै भवेत्। असाध्यं साधये-
न्मर्त्यः सर्वत्र विजयी भवेत् ॥ ३२ ॥ नित्यं यः पठते
स्तोत्रं ब्रह्मभूतः स वै नरः। तस्य दर्शनतः सर्वे देवाः
पूता भवंति वै ॥ ३३ ॥ एवं तस्य वचः श्रुत्वा प्रहृष्टा
देवतर्षयः। ऊचुः करपुटाः सर्वे भक्तियुक्ता गजाननम्
॥ ३४ ॥ इति श्रीएकदंतस्तोत्रं संपूर्णम् ॥

१०. महागणपतिस्तोत्रम्[1]।

श्रीगणेशाय नमः ॥ योगं योगविदां विधूतविविधव्यासंग-
शुद्धाशयप्रादुर्भूतसुधारसप्रसृमरध्यानास्पदाध्यासिनाम्।

---

1 अस्य टीका काव्यमालायां द्रष्टव्या।

सिंहोऽभवद्देवो मोक्षदं च प्रकीर्तितम् ॥ १९ ॥ शंखचक्र-गदाकूर्माः शंखो यत्र प्रदृश्यते । शंखवर्णश्च देवानां वामे देवस्य लक्षणम् ॥ २० ॥ दामोदरं तथा स्थूलं मध्ये चक्रं प्रतिष्ठितम् । पूर्णद्वारेण संकीर्णा पीतरेखा च दृश्यते ॥ २१ ॥ छत्राकारे भवेद्राज्यं वर्तुले च महाश्रियः । कपटे च महा-दुःखं शूलाग्रे तु रणं ध्रुवम् ॥ २२ ॥ ललाटे शेषभोगस्तु शिरोपरि सुकांचनम् । चक्रकांचनवर्णानां वामदेवस्य लक्षणम् ॥ २३ ॥ वामपार्श्वे च वै चक्रे कृष्णवर्णस्तु पिंग-लम् । लक्ष्मीनृसिंहदेवानां पृथग्वर्णस्तु दृश्यते ॥ २४ ॥ लंबोष्ठे च दरिद्रं स्यात्पिंगले हानिरेव च । लग्नचक्रे भवे-द्व्याधिर्विदारे मरणं ध्रुवम् ॥ २५ ॥ पादोदकं च निर्माल्यं मस्तके धारयेत्सदा । विष्णोर्दृष्टं भवेद्दिव्यं तुलसीदल-मिश्रितम् ॥ २६ ॥ कल्पकोटिसहस्राणि वैकुंठे वसते सदा । शालिग्रामशिलाबिंदुर्हत्याकोटिविनाशनः ॥ २७ ॥ तस्मात्संपूजयेद्ध्यात्वा पूजितं चापि सर्वदा । शालिग्राम-शिलास्तोत्रं यः पठेच्च द्विजोत्तमः ॥ २८ ॥ स गच्छेत्परमं स्थानं यत्र लोकेश्वरो हरिः । सर्वपापविनिर्मुक्तो विष्णु-लोकं स गच्छति ॥ २९ ॥ दशावतारा देवानां पृथग्वर्णस्तु दृश्यते । ईप्सितं लभते राज्यं विष्णुपूजामनुक्रमात् ॥ ३० ॥ कोट्यो हि ब्रह्महत्यानामगम्यागम्यकोटयः । ताः सर्वा नाशमायांति विष्णुनैवेद्यभक्षणात् ॥ ३१ ॥ विष्णोः पादो-

दकं पीत्वा कोटिजन्माघनाशनम्। तस्मादष्टगुणं पापं भूमौ बिंदुनिपातनात् ॥३२॥ इति श्रीशालिग्रामस्तोत्रं संपूर्णम् ॥

२६. अच्युतनामाष्टकम्।

श्रीगणेशाय नमः ॥ अच्युतं केशवं विष्णुं हरिं सत्यं जनार्दनम्। हंसं नारायणं चैवमेतन्नामाष्टकं पठेत् ॥ १ ॥ त्रिसंध्यं यः पठेन्नित्यं दारिद्र्यं तस्य नश्यति। शत्रुसैन्यं क्षयं याति दुःस्वप्नः सुखदो भवेत् ॥ २ ॥ गंगायां मरणं चैव दृढा भक्तिस्तु केशवे। ब्रह्मविद्याप्रबोधश्च तस्मान्नित्यं पठेन्नरः ॥ ३ ॥ इति श्रीवामनपुराणे विष्णोर्नामाष्टकस्तोत्रं संपूर्णम् ॥

२७. विष्णुपादादिकेशांतवर्णनस्तोत्रम्।

श्रीगणेशाय नमः ॥ लक्ष्मीभर्तुर्भुजाग्रे कृतवसति सितं यस्य रूपं विशालं नीलाद्रेस्तुंगशृंगस्थितमिव रजनीनाथबिम्बं विभाति। पायान्नः पांचजन्यः स सकुलदितिजत्रासनैः पूरयन्स्वैर्निध्वानैर्नीरदौघध्वनिपरिभवदैरंबरं कंबुराजः ॥ १ ॥ आहुर्यस्य स्वरूपं क्षणमुखमखिलं सूरयः कालमेतं ध्वांतस्यैकांतमंतं यदपि च परमं सर्वधाम्नां च धाम। चक्रं तच्चक्रपाणेर्दितिजतनुगलद्रक्तधाराक्तधारं शश्वन्नो विश्ववंद्यं वितरतु विपुलं शर्म घर्मांशुशोभम् ॥ २ ॥

---

१ अस्य टीका काव्यमालाया द्वितीयगुच्छके द्रष्टव्या.

अव्यान्निर्घातघोरो हरिभुजपवनामर्शनाध्मातमूर्तेरस्मान्विस्मेरनेत्रत्रिदशनुतिवचःसाधुकारैः सुतारः । सर्वं संहर्तुमिच्छोररिकुलभुवनं स्फारविस्फारनादः संयत्कल्पांतसिंधौ शरसलिलघटावार्मुचः कार्मुकस्य ॥ ३ ॥ जीमूतश्यामभासा मुहुरपि भगवद्बाहुना मोहयंती युद्धेषूद्धूयमाना झटिति तडिदिवालक्ष्यते यस्य मूर्तिः । सोऽसिस्त्रासाकुलाक्षत्रिदशवपुरिपुः शोणितास्वाददृप्तो नित्यानंदाय भूयान्मधुमथनमनोनंदको नंदको नः ॥ ४ ॥ कम्राकारा मुरारेः करकमलतलेनानुरागाद्गृहीता सम्यग्वृत्ता स्थिताग्रे सपदि न सहते दर्शनं या परेषाम् । राजंती दैत्यजीवासवमदमुदिता लोहितालेपनार्द्रा कामं दीप्तांशुकांता प्रदिशतु दयितेवास्य कौमोदकी नः ॥ ५ ॥ यो विश्वप्राणभूतस्तनुरपि च हरेर्यानकेतुस्वरूपो यं संचिंत्यैव सद्यः स्वयमुरगवधूवर्गगर्भाः पतंति । चंचच्चंडोरुतुंडत्रुटितफणिवसारक्तपंकांकितास्यं वंदे छंदोमयं तं खगपतिममलस्वर्णवर्णं सुपर्णम् ॥ ६ ॥ विष्णोर्विश्वेश्वरस्य प्रवरशयनकृत्सर्वलोकैकधर्ता सोऽनंतः सर्वभूतः पृथुविमलयशाः सर्ववेदैश्च वेद्यः । पाता विश्वस्य शश्वत्सकलसुररिपुध्वंसनः पापहंता सर्वज्ञः सर्वसाक्षी सकलविषभयात्पातु भोगीश्वरो नः ॥ ७ ॥ वाग्भूगौर्यादिभेदैर्विदुरिह मुनयो यां यदीयैश्च पुंसां कारुण्यार्द्रैः कटाक्षैः सकृदपि पतितैः संपदः स्युः

समग्राः। कुंदेंदुस्वच्छमंदस्मितमधुरमुखांभोरुहां सुंदरांगीं वंदे वंद्यामशेषैरपि मुरभिदुरोमंदिरामिंदिरां ताम् ॥ ८ ॥ या सूते सत्त्वजालं सकलमपि सदा संनिधानेन पुंसो धत्ते या सत्त्वयोगाच्चरमचरमिदं भूतये भूतजातम्। धात्रीं स्थात्रीं जनित्रीं प्रकृतिमविकृतिं विश्वशक्तिं विधात्रीं विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां प्रणौमि ॥ ९ ॥ येभ्योऽसूयद्भिरुच्चैः सपदि पदमुरु त्यज्यते दैत्य-वर्गैर्येभ्यो धर्तुं च मूर्ध्ना स्पृहयति सततं सर्वगीर्वाणवर्गः। नित्यं निर्मूलयेयुर्निचिततरममी भक्तिनिघ्नात्मनां नः पद्मा-क्षस्याङ्घ्रिपद्मद्वयतलनिलयाः पांसवः पापपंकम् ॥ १० ॥ रेखा लेखाभिवंद्याश्चरणतलगताश्चक्रमत्स्यादिरूपाः स्नि-ग्धाः सूक्ष्माः सुजाता मृदुललिततरक्षामसूत्रायमाणाः। दद्युर्नो मंगलानि भ्रमरभरजुषा कोमलेनाब्धिजायाः कम्रेणाम्रेड्यमानाः किसलयमृदुना पाणिना चक्रपाणेः ॥ ११ ॥ यस्मादाक्रामतो द्यां गरुडमणिशिलाकेतदंडायमा-नादाश्च्योतंती बभासे सुरसरिदमला वैजयंतीव कांता। भूमिष्ठो यस्तथान्यो भुवनगृहबृहत्स्तंभशोभां दधानः पातामेतौ पयोजोदरललिततलौ पंकजाक्षस्य पादौ ॥१२॥ आक्रामन्भ्यां त्रिलोकीमसुरसुरपती तत्क्षणादेव नीतौ या-भ्यां वैरोचनींद्रौ युगपदपि विपत्संपदोरेकधामा। ताभ्यां ताम्रोदराभ्यां मुहुरहमजितस्यांचिताभ्यामुभाभ्यां प्रा-

ज्यैश्वर्यप्रदाभ्यां प्रणतिमुपगतः पादपंकेरुहाभ्याम् ॥१३॥
येभ्यो वर्णश्चतुर्थश्चरमत उदभूदादिसर्गे प्रजानां साहस्री
चापि संख्या प्रकटमभिहिता सर्ववेदेषु येषाम् । व्याप्ता
विश्वंभरा यैरतिचिततनोर्विश्वमूर्तेर्विराजो विष्णोस्तेभ्यो
महद्भ्यः सततमपि नमोऽस्त्वंघ्रिपंकेरुहेभ्यः ॥ १४ ॥
विष्णोः पादद्वयाग्रे विमलनखमणिभ्राजिता राजते या
राजीवस्येव रम्या हिमजलकणिकालंकृताग्रा दलाली । अ-
स्माकं विस्मयार्हाण्यखिलमुनिजनप्रार्थनीयानि सेयं दद्या-
दाद्यानवद्या ततिरतिरुचिरा मंगलान्यंगुलीनाम् ॥ १५ ॥
यस्यां दृष्ट्वामलायां प्रतिकृतिममराः स्वां भवंत्यानमंतः
सेंद्राः सांद्रीकृतेर्ष्याः स्वपरसुरकुलाशंकयाकंकवंतः । सा
सद्यः सातिरेकां सकलसुखकरीं संपदं साधयेन्नश्चंचच्चार्व-
शुचक्रा चरणनलिनयोश्चक्रपाणेर्नखाली ॥ १६ ॥ पा-
दांभोजन्मसेवासमवनतसुरव्रातभास्वत्किरीटप्रत्युप्तोच्चाव-
चाश्मप्रवरकरगणैश्चित्रितं यद्विभाति । नम्रांगाणां हरेर्नो
हरिदुपलमहाकूर्मसौंदर्यहारिच्छायं श्रेयःप्रदायि प्रपदयुग-
मिदं प्रापयेत्पापमंतम् ॥१७॥ श्रीमत्यौ चारुवृत्ते करपरिम-
लनानंदहृष्टे रमायाः सौंदर्याढ्येंद्रनीलोपलरचितमहादंड-
योः कांतिचौरे । सूरींद्रैः स्तूयमाने सुरकुलसुखदे सूदिता-
रातिसंघे जंघे नारायणीये मुहुरपि जयतामस्मदंहो हरंत्यौ
॥ १८ ॥ सम्यक् साह्यं विधातुं सममपि सततं जंघयोः

खिन्नयोर्ये भारीभूतोरुदंडद्वयभरणकृतोत्तंभभावं भजेते। न्चित्तादर्शं निधातुं सहितमिव सतां ते समुद्गायमाने वृत्ताकारे विधत्तां हृदि मुदमजितस्यानिशं जानुनी नः ॥ १९ ॥ देवो भीतिं विधातुः सपदि विदधतौ कैटभाख्यं मधुं चावारोप्यारूढगर्वावधिजलधि ययोरेव दैत्यौ जघान। वृत्तावन्योन्यतुल्यौ चतुरमुपचयं बिभ्रतावभ्रनीलावूरू चारू हरेस्तौ मुदमतिशयिनीं मानसे नो विधत्ताम् ॥ २० ॥ पीतेन द्योतते यच्चतुरपरिहितेनांबरेणात्युदारं जातालंकारयोगं जलमिव जलधेर्वाडवाग्निप्रभाभिः। एतत्पातित्यदाम्नो जघनमतिघनादेनसो माननीयं सातत्येनैव चेतो विषयमवतरत्पातु पीतांबरस्य ॥ २१ ॥ यस्या दाम्ना त्रिधाम्नो जघनकलितया भ्राजतेऽगं यथाब्धेर्मध्यस्थो मंदराद्रिर्भुजगपतिमहाभोगसंनद्धमध्यः। कांची सा कांचनाभा मणिवरकिरणैरुल्लसद्भिः प्रदीप्ता कल्यां कल्याणदात्रीं मम मतिमनिशं कम्ररूपां करोतु ॥ २२ ॥ उन्नम्रं कम्रमुच्चैरुपचितमुदभूद्यत्र पत्रैर्विचित्रैः पूर्वं गीर्वाणपूज्यं कमलजमधुपस्यास्पदं तत्पयोजम्। तस्मिन्नीलाश्मनीलैस्तरलरुचिजलैः पूरिते केलिबुद्ध्या नालीकाक्षस्य नाभीसरसि वसतु मच्चित्तहंसश्चिराय ॥ २३ ॥ पातालं यस्य नालं वलयमपि दिशां पत्रपंक्तिं नगेंद्रान्विद्वांसः केसरालीर्विदुरिह विपुलां कर्णिकां स्वर्णशैलम्। भूया-

द्रायत्स्वयंभूमधुकरभवनं भूमयं कामदं नो नालीकं नाभिपद्माकरभवमुरु तन्नागशब्दस्य शौरेः ॥ २४ ॥ कांत्यंभःपूरपूर्णे लसदसितवलीभंगभास्वत्तरंगे गंभीराकारनाभीचतुरतरमहावर्तशोभिन्युदारे । क्रीडत्वानद्धहेमोदरनविनमहावाडवाग्निप्रभाढ्ये कामं दामोदरीयोदरसलिलनिधौ चित्तमत्स्यश्चिरं नः ॥ २५ ॥ नाभीनालीकमूलादधिकपरिमलोन्मोहितानामलीनां माला नीलेव यांती स्फुरति रुचिमती वक्रपद्मोन्मुखी या । रम्या सा रोमराजिर्महितरुचिमती मध्यभागस्य विष्णोश्चित्तस्था माविरंसीच्चिरतरमुचितां साधयंती श्रियं नः ॥ २६ ॥ आदौ कल्पस्य यस्मात्प्रभवति नियतं विश्वमेतद्विकल्पैः कल्पांते यस्य चांतः प्रविशति सकलं स्थावरं जंगमं च । अत्यंताचिंत्यमूर्तेश्चिरतरमजितस्यांतरिक्षस्वरूपे तस्मिन्नस्माकमंतःकरणमतिमुदा क्रीडतात्क्रोडभागे ॥ २७ ॥ संस्तीर्णं कौस्तुभांशुप्रसरकिसलयैर्मुग्धमुक्ताफलाढ्यं श्रीवत्सोल्लासि फुल्लप्रतिवनवनमालांशुराजद्भुजांतम् । वक्षः श्रीवृक्षकांतं मधुकरनिकरश्यामलं शार्ङ्गपाणेः संसाराध्वश्रमार्तैरुपवनमिव यत्सेवितं तत्प्रपद्ये ॥ २८ ॥ कांतं वक्षो नितांतं विदधदिव गलं कालिमा कालशत्रोरिंदोर्बिंबं यथांको मधुप इव तरोर्मंजरीं राजते यः । श्रीमान्नित्यं विधेयादविरलमिलितः कौस्तुभश्रीप्रतानैः श्रीवत्सः

श्रीपतेः स श्रिय इव दयितो वत्स उच्चैः श्रियं नः ॥२९॥ संभूयांभोधिमध्यात्सपदि सहजया यः श्रिया संनिधत्ते नीले नारायणोरःस्थलगगनतले हारतारोपसेव्ये। आशाः सर्वाः प्रकाशा विदधदपिदधच्चात्मभासान्यतेजां-स्याश्चर्यस्याकरो नो द्युमणिरिव मणिः कौस्तुभः सोऽस्तु भूत्यै ॥ ३० ॥ या वायावानुकूल्यात्सरति मणिरुचा भासमाना समाना साकं सा कंपमंसे वसति विदधती वासुभद्रं सुभद्रम्। सारं सारंगसंघैर्मुखरितकुसुमा मेच-कांता च कांता माला मालालितास्मान्न विरमतु सुरैर्वै-र्योजयंती जयंती ॥ ३१ ॥ हारस्योरुप्रभाभिः प्रतिवन-वनमालांशुभिः प्रांशुभिर्यच्छ्रीभिश्चाप्यंगदानां शबलित-रुचिभिर्निष्कभाभिश्च भाति। वाहुल्येनैव बद्धांजलिपु-टमजितस्याभियाचामहे तद्बंधार्तिं बाधतां नो बहुवि-हितकरीं बंधुरं बाहुमूलम् ॥ ३२ ॥ विश्वत्राणैकदीक्षास्त-दनुगुणगणक्षत्रनिर्माणदक्षाः कर्तारो दुर्निरूपाः स्फुट-गुरुयशसां कर्मणामद्भुतानाम्। शार्ङ्गं बाणं कृपाणं फल-कमरिगदे पद्मशंखौ सहस्रं बिभ्राणाः शस्त्रजालं मम ददतु हरेर्बाहवो मोहहानिम् ॥ ३३ ॥ कंठाकल्पोद्गतैर्यैः कनकमयलसत्कुंडलोत्थैरुदारैरुद्द्योतैः कौस्तुभस्याप्युरु-भिरुपचितश्चित्रवर्णो विभाति। कंठाश्लेषे रमायाः करवल-यपदैर्मुद्रिते भद्ररूपे वैकुंठीयेऽत्र कंठे वसतु मम मतिः

कुंठभावं विहाय ॥ ३४ ॥ पश्चानंदप्रदाता परिलसदरुणश्रीपरीताग्रभागः काले काले च कंबुप्रवरशशधरापूरणे यः प्रवीणः । वक्त्राकाशांतरस्थस्तिरयति नितरां दंततारौघशोभां श्रीभर्तुर्दंतवासो द्युमणिरघतमोनाशनायास्त्वसौ नः ॥ ३५ ॥ नित्यं स्नेहातिरेकान्निजकमितुरलं विप्रयोगाक्षमाया वक्त्रेंदोरंतराले कृतवसतिरिवाभाति नक्षत्रराजिः । लक्ष्मीकांतस्य कांताकृतिरतिविलसन्मुग्धमुक्ताफलश्रीर्दंताली संततं सा नतिनुतिनिरतान्रक्षतादक्षता नः ॥ ३६ ॥ ब्रह्मन्ब्रह्मण्यजिह्मां मतिमपि कुरुषे देव संभावये त्वां शंभो शक्र त्रिलोकीमवसि किममरैर्नारदाद्याः सुखं वः । इत्थं सेवावनम्रं सुरमुनिनिकरं वीक्ष्य विष्णोः प्रसन्नस्यास्येंदोरास्रवंती वरवचनसुधा ह्लादयेन्मानसं नः ॥ ३७ ॥ कर्णस्थस्वर्णकम्रोज्ज्वलमकरमहाकुंडलप्रोतदीप्यन्माणिक्यश्रीप्रतानैः परिमिलितमलिश्यामलं कोमलं यत् । प्रोद्यत्सूर्यांशुराजन्मरकतमुकुराकारचोरं सुरारेर्गाढामागामिनीं नो गमयतु विपदं गंडयोर्मंडलं तत् ॥ ३८ ॥ वक्त्रांभोजे लसंतं मुहुरधरमणिं पक्वबिंबाभिरामं दृष्ट्वा द्रष्टुं शुकस्य स्फुटमवतरतस्तुंडदंडायते नः । घोणः शोणीकृतात्मा श्रवणयुगलसत्कुंडलोऽस्रैर्मुरारेः प्राणाख्यस्यानिलस्य प्रसरणसरणिः प्राणदानाय नः स्तात् ॥ ३९ ॥ दिक्कालौ वेदयंतौ जगति मुहुरिमौ संचरंतौ रवींदू

त्रैलोक्यालोकदीपावभिदधति ययोरेव रूपं मुनींद्राः। अस्मानब्जप्रभे ते प्रचुरतरकृपानिर्भरं प्रेक्षमाणे पातामाताम्रशुक्लासितरुचिरुचिरे पद्मनेत्रस्य नेत्रे ॥ ४० ॥ लक्ष्माकारालकालिस्फुरदलिकशशांकार्धसंदर्शमीलन्नेत्रांभोजप्रबोधोत्सुकनिभृततरालीनभृंगच्छदाभे । लक्ष्मीनाथस्य लक्षीकृतविबुधगणापांगबाणासनार्धच्छाये नो भूतिभूरिप्रसवकुलशते भ्रूलते पालयेताम् ॥ ४१ ॥ पातात्पातालपातात्पतगपतिगतेर्भ्रूयुगं भुग्नमध्यं येनेषच्चालितेन स्वपदनियमिताः सासुरा देवसंघाः । नृत्यल्लालाटरंगे रजनिकरतनोरर्धखंडावदाते कालव्यालद्वयं वा विलसति समया बालिका मातरं नः ॥ ४२ ॥ रूक्षस्मारेक्षुचापच्युतशरनिकरक्षीणलक्ष्मीकटाक्षप्रोत्फुल्लत्पद्ममालाविलसितमहितस्फाटिकेशानलिंगम् । भूयाद्भूयो विभूत्यै मम भुवनपतेर्भ्रूलताद्वंद्वमध्यादुत्थं तत्पुंड्रमूर्ध्वं जनिमरणतमःखंडनं मंडनं च ॥ ४३ ॥ पीठीभूतालकांते कृतमुकुटमहादेवलिंगप्रतिष्ठे लालाटे नाट्यरंगे विकटतरतटे कैटभारेश्चिराय । प्रोद्घाट्यैवात्मतंद्रीप्रकटपटकुटीं प्रस्फुरंतीं स्फुटांगं पट्टीयं भावनाख्यां चटुलमति नटी नाटिकां नाटयेन्नः ॥ ४४ ॥ मालालीवालिधाम्नः कुवलयकलिता श्रीपतेः कुंतलाली कालिंद्यारुह्य मूर्ध्नो गलति हरशिरः स्वर्धुनीस्पर्धया नु । राहुर्वा याति वक्त्रं सकल-

शशिकलाभ्रांतिलोलांतरात्मा लोकैरालोच्यते या प्रदिशतु सकलैः साखिलं मंगलं नः ॥ ४५ ॥ सुप्ताकाराः प्रसुप्ते भगवति विबुधैरप्यदृष्टस्वरूपा व्याप्तव्योमांतरालास्तरलरुचिजलारंजिताः स्पष्टभासः । देहच्छायोद्गमाभा रिपुवपुरगुरुप्लोषरोषाग्निधूम्याः केशाः केशिद्विषो नो विदधतु विपुलक्लेशपाशप्रणाशम् ॥ ४६ ॥ यत्र प्रत्युप्तरत्नप्रवरपरिलसद्भूरिरोचिःप्रतानस्फूर्त्या मूर्तिर्मुरारेर्द्युमणिशतचितव्योमवद्दुर्निरीक्ष्या । कुर्वत्पारेपयोधि ज्वलदकृत सहाभास्वदौर्वाग्निशंकां शश्वन्नः शर्म दिश्यात्कलिकलुषतमःपाटनं तत्किरीटम् ॥ ४७ ॥ भ्रांत्वा भ्रांत्वा यदंतस्त्रिभुवनगुरुरप्यब्दकोटीरनेका गंतुं नांतं समर्थो भ्रमर इव पुनर्नाभिनालीकनालात् । उन्मज्जन्नूर्जितश्रीस्त्रिभुवनमपरं निर्ममे तत्सदृक्षं देहांभोभिः स देयान्निरवधिरमृतं दैत्यविद्वेषिणो नः ॥ ४८ ॥ मत्स्यः कूर्मो वराहो नरहरिणपतिर्वामनो जामदग्न्यः काकुत्स्थः कंसघाती मनसिजविजयो यश्च कल्की भविष्यन् । विष्णोरंशावतारा भुवनहितकरा धर्मसंस्थापनार्थाः पायासुर्मां त एते गुरुतरकरुणाभारखिन्नाशया ये ॥४९॥ यस्माद्वाचो निवृत्ताः सममपि मनसा लक्षणामीक्षमाणाः स्वार्थालाभात्परार्थव्यपगमकथनश्लाघिनो वेदवादाः । नित्यानंदं स्वसंविन्निरवधिममृतं स्वांतसंक्रांतबिंबच्छायापत्यापि नित्यं सुखयति यमिनो यत्तद्-

व्यान्महो नः ॥५०॥ आ पादादा च शीर्ष्णो वपुरिदमनघं वैष्णवं यः स चित्ते धत्ते नित्यं निरस्ताखिलकलिकलुषे संततांतःप्रमोदः । जुह्वज्जिह्वाकृशानौ हरिचरितहविः-स्तोत्रमंत्रानुपाठैस्तत्पादांभोरुहाभ्यां सततमपि नमस्कुर्महे निर्मलाभ्याम् ॥ ५१ ॥ इति भगवत्पादश्रीशंकराचार्यकृतं विष्णुपादादिकेशान्तवर्णनस्तोत्रं समाप्तम् ॥

२८. श्रीविष्णुमहिम्नः स्तोत्रप्रारंभः ।

श्रीगणेशाय नमः ॥ महिम्नस्ते पारं विधिहरफणीन्द्रप्रभृतयो विदुर्नाद्याप्यज्ञश्चलमतिरहं नाथ नु कथम् । विजानीयामद्धा नलिननयनात्मीयवचसो विशुद्ध्यै वक्ष्यामीषदपि तु तथापि स्वमतितः ॥१॥ यदाहुर्ब्रह्मैके पुरुषमितरे कर्म च परेऽपरे बुद्धं चान्ये शिवमपि च धातारमपरे । तथा शक्तिं केचिद्गणपतिमुतार्कं च सुधियो मतीनां वै भेदात्त्वमसि तदशेषं मम मतिः ॥२॥ शिवः पादांभस्ते शिरसि धृतवानादरयुतं तथा शक्तिश्चासौ तव तनुजतेजोमयतनुः । दिनेशं चैवामुं तव नयनमूचुस्तु निगमास्त्वदन्यः को ध्येयो जगति किल देवो वद विभो ॥३॥ क्वचिन्मत्स्यः कूर्मः क्वचिदपि वराहो नरहरिः क्वचित्खर्वो रामो दशरथसुतो नंदतनयः । क्वचिद्बुद्धः कल्किर्विहरसि कुमारापहतये स्वतंत्रोऽजो नित्यो विभुरपि तवाक्रीडनमिदम् ॥ ४ ॥ हृताम्नायेनोक्तं स्तवनवरमाकर्ण्य विधिना द्रुतं मात्स्यं

धृत्वा वपुरजरशंखासुरमथो । क्षयं नीत्वा मृत्योर्निगमगणमुद्धृत्य जलधेरशेषं संगुप्तं जगदपि च वेदैकशरणम् ॥ ५ ॥ निमज्जंतं वार्धौ नगवरमुपालोक्य सहसा हितार्थं देवानां कमठवपुषाऽविश्य गहनम् । पयोराशिं पृष्ठे तमजित सलीलं धृतवतो जगद्धातुस्तेऽभूत्किमु सुलभभाराय गिरिकः ॥ ६ ॥ हिरण्याक्षः क्षोणीमविशदसुरो नक्रनिलयं समादायामर्त्यैः कमलजमुखैरंबरगतैः । स्तुतेनानंतात्मन्नचिरमवभाति स्वविधृता त्वया दंष्ट्राग्रेऽसाववनिरखिला कंदुक इव ॥ ७ ॥ हरिः क्वास्तीत्युक्ते दनुजपतिनाऽऽपूर्य निखिलं जगन्नादैः स्तंभान्नरहरिशरीरेण करजैः । समुत्पत्याशूरावसुरवरमादारितवतस्तवाख्याता भूमन्किमु जगति नो सर्वगतता ॥ ८ ॥ त्रिलोक्याजं द्वारं कपटलघुकायं सुररिपुर्निषिद्धोपि प्रादादसुरगुरुणात्मीयमखिलम् । प्रसन्नस्तद्भक्त्या त्यजसि किल नाद्यापि भवनं बलेर्भक्ताधीन्यं तव विदितमेवामरपते ॥ ९ ॥ समाधावासक्तं नृपतितनयैर्वीक्ष्य पितरं हतं बाणै रोषात्कुरुतरमुपादाय परशुम् । विना क्षत्रं विष्णो क्षितितलमशेषं कृतवतोऽसकृत्किं भूभारोद्धरणपटुता ते न विदिता ॥ १० ॥ समाराध्योमेशं त्रिभुवनमिदं वासवमुखं वशे चक्रे चक्रिन्नगणयदनीशं जगदिदम् । गतोऽसौ लंकेशस्त्वचिरमथ ते बाणविषयं न केनाप्तं त्वत्तः फलमविनयस्यासुररिपो ॥ ११ ॥

क्वचिद्दिव्यं शौर्यं क्वचिदपि रणे कापुरुषता क्वचिद्गीताज्ञानं क्वचिदपि परस्त्रीविहरणम् । क्वचिन्मृत्स्नाशित्वं क्वचिदपि च वैकुंठविभवश्चरित्रं ते नूनं शरणद विमोहाय कुधियाम् ॥ १२ ॥ न हिंस्यादित्येतद्ध्रुवमवितथं वाक्यमबुधैर्यथाग्नीषोमीयं पशुमिति तु विप्रैर्निगदितम् । तवैतन्नास्थानेऽसुरगणविमोहाय गदतः समृद्धिर्नीचानां नयकर हि दुःखाय जगतः ॥ १३ ॥ विभागे वर्णानां निगमनिचये चावनितले विलुप्ते संजातो द्विजवरगृहे शंभलपुरे । समारुह्याश्वश्वं लसदसिकरो म्लेच्छनिकरान्निहंतास्युन्मत्तान्किल कलियुगांते युगपते ॥ १४ ॥ गभीरे कासारे जलचरवराकृष्टचरणो रणेऽशक्तो मज्जन्नभयद जलेऽचिंतयदसौ । यदा नागेंद्रस्त्वां सपदि पदपाशादपगतो गतः स्वर्गं स्थानं भवति विपदां ते किमु जनः ॥ १५ ॥ सुतैः पृष्टो वेधाः प्रतिवचनदानेऽप्रभुरसावथात्मन्यात्मानं शरणमगमत्त्वां त्रिजगताम् । ततस्तेऽस्तातंका ययुरथ मुदं हंसवपुषा त्वया ते सार्वज्ञं प्रथितममरेशेह किमु नो ॥ १६ ॥ समाविद्धो मातुर्वचनविशिखैराशु विपिनं तपश्चक्रे गत्वा तव परम तोषाय परमम् । ध्रुवो लेभे दिव्यं पदमचलमल्पेऽपि वयसि किमस्त्यस्मिँल्लोके त्वयि वरद तुष्टे दुरधिगम् ॥ १७ ॥ वृकाद्भीतस्तूर्णं स्वजनभयभिस्त्वां पशुपतिर्भ्रमँल्लोकान्सर्वान्शरणमुपया-

तोऽथ दनुजः । स्वयं भस्मीभूतस्तव वचनभंगोद्गतमती रमेशाहो माया तव दुरनुमेयाऽखिलजनैः ॥ १८ ॥ हृतं दैत्यैर्दृष्ट्वाऽमृतघटमजय्यैस्तु नयतः कटाक्षैः संमोहं युवतिवरवेषेण दितिजान् । समग्रं पीयूषं सुभग सुरपूगाय ददतः समस्यापि प्रायस्तव खलु हि भृत्येष्वभिरतिः ॥ १९ ॥ समाकृष्टा दुष्टैर्द्रुपदतनयाऽलब्धशरणा सभायां सर्वात्मंस्तव शरणमुच्चैरुपगता । समक्षं सर्वेषामभवदचिरं चीरनिचयः स्मृतेस्ते साफल्यं नयनविषयं नो किमु सताम् ॥ २० ॥ वदंत्येके स्थानं तव वरद वैकुंठमपरे गवां लोकं लोकं फणिनिलयपातालमितरे । तथान्ये क्षीरोदं हृदयनलिनं चापि तु सतां न मन्ये तत्स्थानं त्वहमिह च यत्रासि न विभो ॥ २१ ॥ शिवोऽहं रुद्राणामहममरराजो दिविषदां मुनीनां व्यासोऽहं सुरवर समुद्रोऽस्मि सरसाम् । कुबेरो यक्षाणामिति तव वचो मंदमतये न जाने तज्जातं जगति ननु यन्नासि भगवन् ॥ २२ ॥ शिरो नाको नेत्रे शशिदिनकरावंबरमुरो दिशः श्रोत्रे वाणी निगमनिकरस्ते कटिरिला । अकूपारो बस्तिश्चरणमपि पातालमिति वै स्वरूपं तेऽज्ञात्वा नृतनुमवजानंति कुधियः ॥ २३ ॥ शरीरं वैकुंठं हृदयनलिनं वाससदनं मनोवृत्तिस्तार्क्ष्यो मतिरियमथो सागरसुता । विहारस्तेऽवस्थात्रितयमसवः पार्षदगणो न पश्यत्यज्ञा त्वामिह बहिरहो याति जनता

॥२४॥ सुघोरं कांतारं विशति च तडागं सुगहनं तथोत्तुंगं शृंगं सपदि च समारोहति गिरेः । प्रसूनार्थं चेतोंबुजम-मलमेकं त्वयि विभो समर्प्याज्ञस्तूर्णं बत न च सुखं विंदति जनः ॥ २५ ॥ कृतैकांतावासा विगतनिखिलाशाः शमपरा जितश्वासोच्छ्वासास्त्रुटितभवपाशाः सुयमिनः । परं ज्योतिः पश्यंत्यनघ यदि पश्यंतु मम तु श्रियाश्लिष्टं भूयान्नयनविषयं ते किल वपुः ॥ २६ ॥ कदा गंगोत्तुंगाम-लतरतरंगाच्छपुलिने वसन्नाशापाशादखिलखलदाशाद-पगतः । अये लक्ष्मीकांतांबुजनयन तातामरपते प्रसीदे-त्याजल्पन्नमरवर नेष्यामि समयम् ॥ २७ ॥ कदा शृंगैः स्फीते मुनिगणपरीते हिमनगे द्रुमावीते शीते सुरमधु-रगीते प्रतिवसन् । क्वचिद्ध्यानासक्तो विषयसुविरक्तो भव-हरं स्मरँस्ते पादाब्जं जनिहर समेष्यामि विलयम् ॥२८॥ सुधापानं ज्ञानं न च विपुलदानं न निगमो न यागो नो योगो न च निखिलभोगोपरमणम् । जपो नो नो तीर्थव्रत-मिह न चोग्रं त्वयि तपो विना भक्तिं तेऽलं भवभयविना-शाय मधुहन् ॥२९॥ नमः सर्वेष्टाय श्रुतिशिखरदृष्टाय च नमो नमोऽसंश्लिष्टाय त्रिभुवननिविष्टाय च नमः । नमो विस्पष्टाय प्रणवपरिमृष्टाय च नमो नमस्ते सर्वात्मन्पुनरपि पुनस्ते मम नमः ॥ ३० ॥ कणान्कश्चिद्वृष्टेर्गणननिपुणस्तूर्ण-म्रवनेस्तथाशेषान्पांसूनमित कलयेच्चापि तु जनः । नभः

पिंडीकुर्याद्दशिरमपि चेच्चर्सवदिदं तथापीशासौ ते कलयितुमलं नाखिलगुणान् ॥३१॥ क्व माहात्म्यं सीमोज्झितमविषयं वेदवचसां विभो ते मे चेतः क्वच विविधतापाहतमिदम् । मयेदं यत्किंचिद्गदितमथ बाल्येन तु गुरो गृहाणैतच्छुद्धार्पितमिह न हेयं हि महताम् ॥३२॥ इति हरिस्तवनं सुमनोहरं परमहंसजनेन समीरितम् । सुगमसुन्दरसारपदास्पदं तदिदमस्तु हरेरनिशं मुदे ॥३३॥ गदारथांगांबुजकंबुधारिणो रमासमाश्लिष्टतनोस्तनोतु नः । बिलेशयाधीशशरीरशायिनः शिवं स्तवोऽजस्रमयं परं हरेः ॥३४॥ पठेदिमं यस्तु नरः परं स्तवं समाहितोघौघवनप्रभंजनम् । स विंदतेऽत्राखिलभोगसंपदो महीयते विष्णुपथे ततो ध्रुवम् ॥ ३५॥ इति श्रीमत्परमहंसस्वामिब्रह्मानन्दविरचितं श्रीविष्णुमहिम्नः स्तोत्रं संपूर्णम् ॥

२९. श्रीहरिस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जगज्जालपालं वचत्कंठमालं शरच्चंद्रभालं महादैत्यकालम् । नभोनीलकायं दुरावारमायं सुपद्मासहायं भजेऽहं भजेऽहम् ॥ १ ॥ सदांभोधिवासं गलत्पुष्पहासं जगत्संनिवासं शतादित्यभासम् । गदाचक्रशस्त्रं लसत्पीतवस्त्रं हसच्चारुवक्त्रं भजे० ॥ २ ॥ रमाकंठहारं श्रुतिव्रातसारं जलांतर्विहारं धराभारहारम् । चिदानंदरूपं मनोज्ञस्वरूपं धृतानेकरूपं भजे० ॥ ३ ॥

जराजन्महीनं परानंदपीनं समाधानलीनं सदैवानवीनम् । जगज्जन्महेतुं सुरानीककेतुं त्रिलोकैकसेतुं भजे० ॥ ४ ॥ कृताम्नायगानं खगाधीशयानं विमुक्तेर्निदानं हरारातिमानम् । स्वभक्तानुकूलं जगद्वृक्षमूलं निरस्तार्तशूलं भजे०॥५॥ समस्तामरेशं द्विरेफाभकेशं जगद्बिंबलेशं हृदाकाशदेशम् । सदा दिव्यदेहं विमुक्ताखिलेहं सुवैकुंठगेहं भजे० ॥६॥ सुरालीबलिष्ठं त्रिलोकीवरिष्ठं गुरूणां गरिष्ठं स्वरूपैकनिष्ठम् । सदा युद्धधीरं महावीरधीरं भवांभोधितीरं भजे० ॥७॥ रमाधामभागं तलानम्रनागं कृताधीनयागं गतारागरागम् । मुनींद्रैः सुगीतं सुरैः संपरीतं गुणौघैरतीतं भजे० ॥८॥ इदं यस्तु नित्यं समाधाय चित्तं पठेदष्टकं कष्टहारं मुरारेः । स विष्णोर्विशोकं ध्रुवं याति लोकं जराजन्मशोकं पुनर्विंदते नो ॥ ९ ॥ इति श्रीपरमहंसस्वामिब्रह्मानंदविरचितं श्रीहरिस्तोत्रं संपूर्णम् ॥

३०. श्रीहरिनामाष्टकम् ।

श्रीगणेशाय नमः ॥ श्रीकेशवाच्युत मुकुंद रथांगपाणे गोविंद माधव जनार्दन दानवारे । नारायणामरपते त्रिजगन्निवास जिह्वे जपेति सततं मधुराक्षराणि ॥ १ ॥ श्रीदेवदेव मधुसूदन शार्ङ्गपाणे दामोदरार्णवनिकेतन कैटभारे । विश्वंभराभरण भूषितभूमिपाल जिह्वे० ॥ २ ॥ श्रीपद्मलोचन गदाधर पद्मनाभ पद्मेश पद्मपद पावन

पद्मपाणे । पीतांबरांबररुचे रुचिरावतार जिह्वे० ॥ ३ ॥ श्रीकांत कौस्तुभधरार्तिहराब्जपाणे विष्णो त्रिविक्रम महीधर धर्मसेतो । वैकुंठवास वसुधाधिप वासुदेव जिह्वे० ॥ ४ ॥ श्रीनारसिंह नरकांतक कांतमूर्ते लक्ष्मीपते गरुडवाहन शेषशायिन् । केशिप्रणाशन सुकेश किरीटमौले जिह्वे० ॥ ५ ॥ श्रीवत्सलांछन सुरर्षभ शंखपाणे कल्पांतवारिधिविहार हरे मुरारे । यज्ञेश यज्ञमय यज्ञभुगादिदेव जिह्वे० ॥ ६ ॥ श्रीराम रावणरिपो रघुवंशकेतो सीतापते दशरथात्मज राजसिंह । सुग्रीवमित्र मृगवेधन चापपाणे जिह्वे० ॥ ७ ॥ श्रीकृष्ण वृष्णिवर यादव राधिकेश गोवर्धनोद्धरण कंसविनाश शौरे । गोपाल वेणुधर पांडुसुतैकबंधो जिह्वे० ॥ ८ ॥ इत्यष्टकं भगवतः सततं नरो यो नामांकितं पठति नित्यमनन्यचेताः । विष्णोः परं पदमुपैति पुनर्न जातु मातुः पयोधररसं पिबतीह सत्यम् ॥ ९ ॥ इति श्रीपरमहंसस्वामिब्रह्मानंदविरचितं श्रीहरिनामाष्टकं संपूर्णम् ॥

३१. श्रीहरिशरणाष्टकम् ।

श्रीगणेशाय नमः ॥ ध्येयं वदंति शिवमेव हि केचिदन्ये शक्तिं गणेशमपरे तु दिवाकरं वै । रूपैस्तु तैरपि विभासि यतस्त्वमेकस्तस्मात्त्वमेव शरणं मम शंखपाणे ॥ १ ॥ नो सोदरो न जनको जननी न जाया नैवात्मजो न च

कुलं विपुलं बलं वा। संदृश्यते न किल कोऽपि सहायको मे तस्मा० ॥ २ ॥ नोपासिता मदमपास्य मया महांतस्तीर्थानि चास्तिकधिया नहि सेवितानि। देवार्चनं च विधिवन्न कृतं कदापि तस्मा० ॥ ३ ॥ दुर्वासना मम सदा परिकर्षयंति चित्तं शरीरमपि रोगगणा दहंति। संजीवनं च परहस्तगतं सदैव तस्मा० ॥ ४ ॥ पूर्वं कृतानि दुरितानि मया तु यानि स्मृत्वाखिलानि हृदयं परिकंपते मे। ख्याता च ते पतितपावनता तु यस्मात्तस्मा० ॥ ५ ॥ दुःखं जराजननजं विविधाश्च रोगाः काकश्वसूकरजनिर्निरये च पातः। ते विस्मृतेः फलमिदं विततं हि लोके तस्मा० ॥ ६ ॥ नीचोऽपि पापवलितोऽपि विनिंदितोऽपि ब्रूयात्तवाहमिति यस्तु किलैकवारम्। तं यच्छसीश निजलोकमिति व्रतं ते तस्मा० ॥ ७ ॥ वेदेषु धर्मवचनेषु तथागमेषु रामायणेऽपि च पुराणकदंबके वा। सर्वत्र सर्वविधिना गदितस्त्वमेव तस्मा० ॥ ८ ॥ इति श्रीपरमहंसस्वामिब्रह्मानंदविरचितं श्रीहरिशरणाष्टकं संपूर्णम् ॥

३२. श्रीदीनबंध्वष्टकम्।

श्रीगणेशाय नमः ॥ यस्मादिदं जगदुदेति चतुर्मुखाद्यं यस्मिन्नवस्थितमशेषमशेषमूले। यन्नोपयाति विलयं च तमस्तमंते दृग्गोचरो भवतु मेऽद्य स दीनबंधुः ॥ १ ॥

चक्रं सहस्रकरचारु करारविंदे गुर्वी गदा दरवरश्च विभाति यस्य । पक्षींद्रपृष्ठपरिरोपितपादपद्मो दृग्गोचरो० ॥ २ ॥ येनोद्धृता वसुमती सलिले निमग्ना नग्ना च पांडववधूः स्थगिता दुकूलैः । संमोचितो जलचरस्य मुखाद्गजेंद्रो दृग्गो० ॥ ३ ॥ यस्यार्द्रदृष्टिवशतस्तु सुराः समृद्धिं कोपेक्षणेन दनुजा विलयं व्रजंति । भीताश्चरंति च यतोऽर्कयमानिलाद्या दृग्गो० ॥ ४ ॥ गायंति सामकुशला यमजं मखेषु ध्यायंति धीरमतयो यतयो विविक्ते । पश्यंति योगिपुरुषाः पुरुषं शरीरे दृग्गो० ॥ ५ ॥ आकाररूपगुणयोगविवर्जितोऽपि भक्तानुकंपननिमित्तगृहीतमूर्तिः । यः सर्वगोऽपि कृतशेषशरीरशय्यो दृग्गो० ॥ ६ ॥ यस्यांघ्रिपंकजमनिद्रमुनींद्रवृंदैराराध्यते भवदवानलदाहशांत्यै । सर्वापराधमविचिंत्य ममाखिलात्मा दृग्गो० ॥ ७ ॥ यन्नामकीर्तनपरः श्वपचोऽपि नूनं हित्वाखिलं कलिमलं भुवनं पुनाति । दग्ध्वा ममाघमखिलं करुणेक्षणेन दृग्गो० ॥८॥ दीनबंध्वष्टकं पुण्यं ब्रह्मानंदेन भाषितम् । यः पठेत्प्रयतो नित्यं तस्य विष्णुः प्रसीदति ॥ ९ ॥ इति श्रीपरमहंसस्वामिब्रह्मानंदविरचितं श्रीदीनबंध्वष्टकं संपूर्णम् ॥

३३. श्रीगोविंदाष्टकम् ।

श्रीगणेशाय नमः ॥ चिदानंदाकारं श्रुतिसरससारं समरसं निराधाराधारं भवजलधिपारं परगुणम् । रमाग्रीवा-

हारं व्रजवनविहारं हरनुतं सदा तं गोविंदं परमसुख-
कंदं भजत रे ॥ १ ॥ महांभोधिस्थानं स्थिरचरनिदानं
दिविजपं सुधाधारापानं विहगपतियानं यमरतम्। मनोज्ञं
सुज्ञानं मुनिजननिधानं ध्रुवपदं सदा० ॥ २ ॥ धिया
धीरैर्ध्येयं श्रवणपुटपेयं यतिवरैर्महावाक्यैर्ज्ञेयं त्रिभुवन-
विधेयं विधिपरम्। मनोमानामेयं सपदि हृदि नेयं नव-
तनुं सदा० ॥ ३ ॥ महामायाजालं विमलवनमालं मल-
हरं सुभालं गोपालं निहतशिशुपालं शशिमुखम्। कला-
तीतं कालं गतिहयमरालं मुररिपुं सदा० ॥ ४ ॥ नभोबिं-
बस्फीतं निगमगणगीतं समगतिं सुरौघे संप्रीतं दितिज-
विपरीतं पुरिशयम्। गिरां पंथातीतं स्वदितनवनीतं
नयकरं सदा० ॥ ५ ॥ परेशं पद्मेशं शिवकमलजेशं शिव-
करं द्विजेशं देवेशं तनुकुटिलकेशं कलिहरम्। खगेशं ना-
गेशं निखिलभुवनेशं नगधरं सदा० ॥ ६ ॥ रमाकांतं कांतं
भवभयभयांतं भवसुखं दुराशांतं शातं निखिलहृदि भांतं
भुवनपम्। विवादांतं दांतं दनुजनिचयांतं सुचरितं सदा०
॥ ७ ॥ जगज्ज्येष्ठं श्रेष्ठं सुरपतिकनिष्ठं क्रतुपतिं बलिष्ठं
भूयिष्ठं त्रिभुवनवरिष्ठं वरवहम्। स्वनिष्ठं धर्मिष्ठं गुरुगुण-
गरिष्ठं गुरुवरं सदा० ॥८॥ गदापाणेरेतद्दुरितदलनं दुःख-
शमनं विशुद्धात्मा स्तोत्रं पठति मनुजो यस्तु सततम्। स
भुक्त्वा भोगौघं चिरमिह ततोऽपास्तवृजिनो वरं विष्णोः

स्थानं व्रजति खलु वैकुंठभुवनम् ॥९॥ इति श्रीपरमहंस-स्वामिब्रह्मानंदविरचितं श्रीगोविंदाष्टकं संपूर्णम् ॥

३४. रमापत्यष्टकम्।

श्रीगणेशाय नमः ॥ जगदादिमनादिमजं पुरुजं शरदंबर-तुल्यतनुं वितनुम्। धृतकंजरथांगगदं विगदं प्रणमामि रमाधिपतिं तमहम् ॥ १ ॥ कमलाननकंजरतं विरतं हृदि योगिजनैः कलितं ललितम्। कुजनैः सुजनैरलभं सुलभं प्रण० ॥ २ ॥ मुनिवृंदहृदिस्थपदं सुपदं निखिलाध्वरभा-गभुजं सुभुजम्। हृतवासवमुख्यमदं विमदं प्रण० ॥३॥ हृतदानवदृप्तबलं सुबलं स्वजनास्तसमस्तमलं विमलम्। समपास्तगजेंद्रदरं सुदरं प्रण० ॥४॥ परिकल्पितसर्वकलं विकलं सकलागमगीतगुणं विगुणम्। भवपाशनिराकरणं शरणं प्रण० ॥५॥ मृतिजन्मजराशमनं कमनं शरणागत-भीतिहरं दहरम्। परितुष्टरमाहृदयं सुदयं प्रण० ॥ ६ ॥ सकलावनिबिंबधरं स्वधरं परिपूरितसर्वदिशं सुदृशम्। गतशोकमशोककरं सुकरं प्रण० ॥७॥ मथितार्णवराजरसं सरसं ग्रहिताखिललोकहृदं सुहृदम्। प्रथिताद्भुतशक्ति-गणं सुगणं प्रण० ॥ ८ ॥ सुखराशिकरं भवबंधहरं परमा-ष्टकमेतदनन्यमतिः। पठतीह तु योऽनिशमेव नरो लभते खलु विष्णुपदं स परम् ॥ ९ ॥ इति श्रीपरमहंसस्वामि-ब्रह्मानंदविरचितं श्रीरमापत्यष्टकं संपूर्णम् ॥

३५. कमलापत्यष्टकम् ।

श्रीगणेशाय नमः ॥ भुजगतल्पगतं घनसुंदरं गरुडवाहनमंबुजलोचनम् । नलिनचक्रगदाकरमव्ययं भजत रे मनुजाः कमलापतिम् ॥ १ ॥ अलिकुलासितकोमलकुंतलं विमलपीतदुकूलमनोहरम् । जलधिजाश्रितवामकलेवरं भजत० ॥ २ ॥ किमु जपैश्च तपोभिरुताध्वरैरपि किमुत्तमतीर्थनिषेवणैः । किमुत शास्त्रकदंबविलोकनैर्भजत० ॥ ३ ॥ मनुजदेहमिमं भुवि दुर्लभं समधिगम्य सुरैरपि वांछितम् । विषयलंपटतामपहाय वै भजत० ॥ ४ ॥ न वनिता न सुतो न सहोदरो नहि पिता जननी न च बांधवः । व्रजति साकमनेन जनेन वै भजत० ॥ ५ ॥ सकलमेव चलं सचराचरं जगदिदं सुतरां धनयौवनम् । समवलोक्य विवेकदृशा द्रुतं भजत० ॥ ६ ॥ विविधरोगयुतं क्षणभंगुरं परवशं नवमार्गमलाकुलम् । परिनिरीक्ष्य शरीरमिदं स्वकं भजत० ॥ ७ ॥ मुनिवरैरनिशं हृदि भावितं शिवविरिंचिमहेंद्रनुतं सदा । मरणजन्मजराभयमोचनं भजत० ॥ ८ ॥ हरिपदाष्टकमेतदनुत्तमं परमहंसजनेन समीरितम् । पठति यस्तु समाहितचेतसा व्रजति विष्णुपदं स नरो ध्रुवम् ॥ ९ ॥ इति श्रीमत्परमहंसस्वामिब्रह्मानन्दविरचितं कमलापत्यष्टकं समाप्तम् ॥

३६. संकटनाशनविष्णुस्तोत्रम्।

श्रीगणेशाय नमः॥ नारद उवाच । पुनर्दैत्यं समायांतं दृष्ट्वा देवाः सवासवाः। भयप्रकंपिताः सर्वे विष्णुं स्तोतुं प्रचक्रमुः॥ १ ॥ देवा ऊचुः। नमो मत्स्यकूर्मादिनानास्वरूपैः सदा भक्तकार्योद्यतायार्तिहंत्रे । विधात्रादिसर्गस्थितिध्वंसकर्त्रे गदाशंखपद्मारिहस्ताय तेऽस्तु॥२॥ रमावल्लभायासुराणां निहंत्रे भुजंगारियानाय पीतांबराय। मखादिक्रियापाककर्त्रे विकर्त्रे शरण्याय तस्मै नताः स्मो नताः स्मः॥३॥ नमो दैत्यसंतापितामर्त्यदुःखाचलध्वंसदंभोलये विष्णवे ते। भुजंगेशतल्पेशयायार्कचंद्रद्विनेत्राय तस्मै नताः स्मो नताः स्मः॥ ४ ॥ नारद उवाच। संकष्टनाशनं नाम स्तोत्रमेतत्पठेन्नरः । स कदाचिन्न संकष्टैः पीड्यते कृपया हरेः॥ ५ ॥ इति श्रीपद्मपुराणे पृथुनारदसंवादे संकष्टनाशनं नाम विष्णुस्तोत्रं संपूर्णम्॥

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ॥

शिवस्तोत्राणि ।

३७. शिवकवचम् ।

श्रीगणेशाय नमः ॥ अस्य श्रीशिवकवचस्तोत्रमंत्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छंदः । श्रीसदाशिवरुद्रो देवता । ह्रीं शक्तिः । रं कीलकम् । श्रीं ह्रीं क्लीं बीजम् । श्रीसदाशिवप्रीत्यर्थे शिवकवचस्तोत्रजपे विनियोगः । अथ न्यासः । ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐह्रां सर्वशक्तिधाम्ने ईशानात्मने अंगुष्ठाभ्यां नमः । ॐनमो भगवते ज्वलज्ज्वालामालिने ॐनं रिं नित्यतृप्तिधाम्ने तत्पुरुषात्मने तर्जनीभ्यां नमः । ॐनमो भगवते ज्वलज्ज्वालामालिने ॐ मं रुं अनादिशक्तिधाम्ने अघोरात्मने मध्यमाभ्यां नमः । ॐनमो भगवते ज्वलज्ज्वालामालिने ॐशिं रैं स्वतंत्रशक्तिधाम्ने वामदेवात्मने अनामिकाभ्यां नमः । ॐनमो भगवते ज्वलज्ज्वालामालिने ॐ वां रौं अलुप्तशक्तिधाम्ने सद्योजातात्मने कनिष्ठिकाभ्यां नमः । ॐनमो भगवते ज्वलज्ज्वालामालिने ॐ यं रः अनादिशक्तिधाम्ने सर्वात्मने करतलकरपृष्ठाभ्यां नमः । एवं हृदयादि । अथ ध्यानम् । वज्रदंष्ट्रं त्रिनयनं कालकंठमरिंदमम् । सहस्रकरमत्युग्रं वंदे शंभुमुमापतिम् ॥ १ ॥ अथापरं सर्वपुराणगुह्यं निःशेषपापौघहरं पवित्रम् । जयप्रदं सर्वविपत्प्रमोचनं वक्ष्यामि शैवं कवचं हिताय ते ॥ २ ॥ ऋषभ उवाच ।

नमस्कृत्वा महादेवं विश्वव्यापिनमीश्वरम् । वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम् ॥ ३ ॥ शुचौ देशे समासीनो यथावत्कल्पितासनः । जितेंद्रियो जितप्राणश्चिंतयेच्छिवमव्ययम् ॥ ४ ॥ हृत्पुंडरीकांतरसन्निविष्टं स्वतेजसा व्याप्तनभोवकाशम् । अतींद्रियं सूक्ष्ममनंतमाद्यं ध्यायेत्परानंदमयं महेशम् ॥ ५ ॥ ध्यानावधूताखिलकर्मबंधश्चिरं चिदानंदनिमग्नचेताः । षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम् ॥ ६ ॥ मां पातु देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे । तन्नाम दिव्यं वरमंत्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥ ७ ॥ सर्वत्र मां रक्षतु विश्वमूर्तिर्ज्योतिर्मयानंदघनश्चिदात्मा । अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥ ८ ॥ यो भूस्वरूपेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशोऽष्टमूर्तिः । योऽपां स्वरूपेण नृणां करोति संजीवनं सोऽवतु मां जलेभ्यः ॥९॥ कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः । स कालरुद्रोऽवतु मां दवाग्नेर्वात्यादिभीतेरखिलाच्च तापात् ॥ १० ॥ प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः । चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितं रक्षतु मामजस्रम् ॥ ११ ॥ कुठारवेदांकुशपाशशूलकपालढक्काक्षगुणान्दधानः । चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम् ॥ १२ ॥ कुंदेंदुशंखस्फटि-

कावभासो वेदाक्षमालावरदाभयांकः । त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजातोऽवतु मां प्रतीच्याम् ॥ १३ ॥ वराक्षमालाऽभयटंकहस्तः सरोजकिंजल्कसमानवर्णः । त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः ॥१४॥ वेदाभयेष्टांकुशपाशटंककपालढक्काक्षकशूलपाणिः । सितद्युतिः पंचमुखोऽवतान्मामीशान ऊर्ध्वं परमप्रकाशः ॥ १५ ॥ मूर्धानमव्यान्मम चंद्रमौलिर्भालं ममाव्यादथ भालनेत्रः । नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः ॥ १६ ॥ पायाच्छ्रुती मे श्रुतिगीतकीर्तिः कपोलमव्यात्सततं कपाली । वक्त्रं सदा रक्षतु पंचवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः ॥ १७ ॥ कंठं गिरीशोऽवतु नीलकंठः पाणिद्वयं पातु पिनाकपाणिः । दोर्मूलमव्यान्मम धर्मबाहुर्वक्षस्थलं दक्षमखांतकोऽव्यात् ॥ १८ ॥ ममोदरं पातु गिरींद्रधन्वा मध्यं ममाव्यान्मदनांतकारी । हेरंबतातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे ॥१९॥ ऊरुद्वयं पातु कुबेरमित्रो जानुद्वयं मे जगदीश्वरोऽव्यात् । जंघायुगं पुंगवकेतुरव्यात्पादौ ममाव्यात्सुरवंद्यपादः ॥ २० ॥ महेश्वरः पातु दिनादियामे मां मध्ययामेऽवतु वामदेवः । त्रिलोचनः पातु तृतीययामे वृषध्वजः पातु दिनांत्ययामे ॥ २१ ॥ पायान्निशादौ शशिशेखरो मां गंगाधरो रक्षतु मां निशीथे । गौरीपतिः पातु निशाव-

साने मृत्युंजयो रक्षतु सर्वकालम् ॥२२॥ अंतःस्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु बहिःस्थितं माम् । तदंतरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समंतात् ॥२३॥ तिष्ठंतमव्याद्भुवनैकनाथः पायाद्व्रजंतं प्रमथाधिनाथः । वेदांतवेद्योऽवतु मां निषण्णं मामव्ययः पातु शिवः शयानम् ॥ २४ ॥ मार्गेषु मां रक्षतु नीलकंठः शैलादिदुर्गेषु पुरत्रयारिः । अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्तिः ॥ २५ ॥ कल्पांतकाटोपपटुप्रकोपस्फुटाट्टहासोच्चलिताण्डकोशः । घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः ॥ २६ ॥ पत्त्यश्वमातंगघटावरूथसहस्रलक्षायुतकोटिभीषणम् । अक्षौहिणीनां शतमाततायिनां छिंद्यान्मृडो घोरकुठारधारया ॥ २७ ॥ निहंतु दस्यून्प्रलयानलार्चिर्ज्वलत्रिशूलं त्रिपुरांतकस्य । शार्दूलसिंहर्क्षवृकादिहिंस्रान्संत्रासयत्वीशधनुः पिनाकः ॥२८॥ दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि । उत्पाततापविषभीतिमसद्ग्रहार्तिव्याधींश्च नाशयतु मे जगतामधीशः ॥ २९ ॥ ॐनमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सर्वमंत्रस्वरूपाय सर्वयंत्राधिष्ठिताय सर्वतंत्रस्वरूपाय सर्वतत्त्वविदूराय ब्रह्मरुद्रावतारिणे नीलकंठाय पार्वतीमनोहरप्रियाय सोमसूर्याग्निलोचनाय भस्मोद्धूलितविग्रहाय महामणिमुकुटधारणाय माणिक्यभू-

षणाय सृष्टिस्थितिप्रलयकालरौद्रावताराय दक्षाध्वरध्वंसकाय महाकालभेदनाय मूलाधारैकनिलयाय तत्त्वातीताय गंगाधराय सर्वदेवाधिदेवाय षडाश्रयाय वेदांतसाराय त्रिवर्गसाधनायानंतकोटिब्रह्मांडनायकायानंतवासुकितक्षककर्कोटकशंखकुलिकपद्ममहापद्मेत्यष्टमहानागकुलभूषणाय प्रणवस्वरूपाय चिदाकाशायाकाशदिक्स्वरूपाय ग्रहनक्षत्रमालिने सकलाय कलंकरहिताय सकललोकैककर्त्रे सकललोकैकभर्त्रे सकललोकैकसंहर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकलनिगमगुह्याय सकलवेदांतपारगाय सकललोकैकवरप्रदाय सकललोकैकशंकराय शशांकशेखराय शाश्वतनिजावासाय निराभासाय निरामयाय निर्मलाय निर्लोभाय निर्मदाय निश्चिंताय निरहंकाराय निरंकुशाय निष्कलंकाय निर्गुणाय निष्कामाय निरुपप्लवाय निरवद्याय निरंतराय निष्कारणाय निरातंकाय निष्प्रपंचाय निःसंगाय निर्द्वंद्वाय निराधाराय नीरागाय निष्क्रोधाय निर्मलाय निष्पापाय निर्भयाय निर्विकल्पाय निर्भेदाय निष्क्रियाय निस्तुलाय निःसंशयाय निरंजनाय निरुपमविभवाय नित्यशुद्धबुद्धपरिपूर्णसच्चिदानंदाद्वयाय परमशांतस्वरूपाय तेजोरूपाय तेजोमयाय जय जय रुद्र महारौद्र भद्रावतार महाभैरव कालभैरव कल्पांतभैरव कपालमालाधर खट्वांग-

खड्गचर्मपाशांकुशडमरुशूलचापबाणगदाशक्तिभिंदिपाल-
तोमरमुसलमुद्गरपाशपरिघभुशुंडीशतघ्नीचक्राद्यायुधभी-
षणकर सहस्रमुख दंष्ट्राकरालवदन विकटाट्टहासविस्फा-
रितब्रह्मांडमंडल नागेंद्रकुंडल नागेंद्रहार नागेंद्रवलय
नागेंद्रचर्मधर मृत्युंजय त्र्यंबक त्रिपुरांतक विश्वरूप
विरूपाक्ष विश्वेश्वर वृषभवाहन विषविभूषण विश्वतोमुख
सर्वतो रक्ष रक्ष मां ज्वल ज्वल महामृत्युमपमृत्युभयं
नाशय नाशय चोरभयमुत्सादयोत्सादय विषसर्पभयं
शमय शमय चोरान्मारय मारय मम शत्रूनुच्चाटयोच्चाटय
त्रिशूलेन विदारय विदारय कुठारेण भिंधि भिंधि खड्गेन
छिंधि छिंधि खट्वांगेन विपोथय विपोथय मुसलेन नि-
ष्पेषय निष्पेषय बाणैः संताडय संताडय रक्षांसि भीषय
भीषयाशेषभूतानि विद्रावय विद्रावय कूष्मांडवेताल-
मारीचब्रह्मराक्षसगणान् संत्रासय संत्रासय मामभयं
कुरु कुरु वित्रस्तं मामाश्वासयाश्वासय नरकमहाभया-
न्मामुद्धरोद्धर संजीवय संजीवय क्षुत्तृड्भ्यां मामाप्या-
ययाप्यायय दुःखातुरं मामानंदयानंदय शिवकवचेन
मामाच्छादयाच्छादय मृत्युंजय त्र्यंबक सदाशिव नमस्ते
नमस्ते । ऋषभ उवाच । इत्येतत्कवचं शैवं वरदं
व्याहृतं मया । सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनाम्
॥ ३० ॥ यः सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम् ।

न तस्य जायते क्वापि भयं शंभोरनुग्रहात् ॥३१॥ क्षीणायुः प्राप्तमृत्युर्वा महारोगहतोऽपि वा । सद्यः सुखमवाप्नोति दीर्घमायुश्च विंदति ॥ ३२ ॥ सर्वदारिद्र्यशमनं सौमंगल्यविवर्धनम् । यो धत्ते कवचं शैवं स देवैरपि पूज्यते ॥ ३३ ॥ महापातकसंघातैर्मुच्यते चोपपातकैः । देहांते मुक्तिमाप्नोति शिववर्मानुभावतः ॥३४॥ त्वमपि श्रद्धया वत्स शैवं कवचमुत्तमम् । धारयस्व मया दत्तं सद्यः श्रेयो ह्यवाप्स्यसि ॥ ३५ ॥ सूत उवाच । इत्युक्त्वा ऋषभो योगी तस्मै पार्थिवसूनवे । ददौ शंखं महारावं खड्गं चारिनिषूदनम् ॥ ३६ ॥ पुनश्च भस्म संमंत्र्य तदंगं परितोऽस्पृशत् । गजानां षट्सहस्रस्य द्विगुणस्य बलं ददौ ॥ ३७ ॥ भस्मप्रभावात्संप्राप्तबलैश्वर्यधृतिस्मृतिः । स राजपुत्रः शुशुभे शरदर्क इव श्रिया ॥ ३८ ॥ तमाह प्रांजलिं भूयः स योगी नृपनंदनम् । एष खड्गो मया दत्तस्तपोमंत्रानुभावितः ॥ ३९ ॥ शितधारमिमं खड्गं यस्मै दर्शयसे स्फुटम् । स सद्यो म्रियते शत्रुः साक्षान्मृत्युरपि स्वयम् ॥४०॥ अस्य शंखस्य निर्ह्रादं ये शृण्वंति तवाहिताः । ते मूर्च्छिताः पतिष्यंति न्यस्तशस्त्रा विचेतनाः ॥ ४१ ॥ खड्गशङ्खाविमौ दिव्यौ परसैन्यविनाशिनौ । आत्मसैन्यस्य पक्षाणां शौर्यतेजोविवर्धनौ ॥४२॥ एतयोश्च प्रभावेण शैवेन कवचेन च । द्विषट्सहस्रनागानां बलेन महतापि च ॥ ४३ ॥ भस्म-

धारणसामर्थ्याच्छत्रुसैन्यं विजेष्यसि । प्राप्य्ं सिंहासनं पित्र्यं गोप्तासि पृथिवीमिमाम् ॥ ४४ ॥ इति भद्रायुषं सम्यगनुशास्य समातृकम् । ताभ्यां संपूजितः सोऽथ योगी स्वैरगतिर्ययौ ॥ ४५ ॥ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे शिवकवचं समाप्तम् ॥

३८. शिवमानसपूजा ।

श्रीगणेशाय नमः ॥ रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्यांबरं नानारत्नविभूषितं मृगमदामोदांकितं चंदनम् । जातीचंपकबिल्वपत्ररचितं पुष्पं च धूपं तथा दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥ १ ॥ सौवर्णे नवरत्नखंडरचिते पात्रे घृतं पायसं भक्ष्यं पंचविधं पयोदधियुतं रंभाफलं पानकम् । शाकानामयुतं जलं रुचिकरं कर्पूरखंडोज्वलं तांबूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥ २ ॥ छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं वीणाभेरिमृदंगकाहलकलागीतं च नृत्यं तथा । साष्टांगं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया संकल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥ ३ ॥ आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः । संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो यद्यत्कर्म करोमि तत्तदखिलं शंभो तवाराधनम् ॥ ४ ॥ करचरण-

कृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वा-ऽपराधम् । विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव शंभो ॥ ५ ॥ इति श्रीमच्छंकरा-चार्यविरचिता शिवमानसपूजा समाप्ता ॥

३९. शिवमहिम्नः स्तोत्रम् ।

श्रीगणेशाय नमः ॥ पुष्पदंत उवाच । महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्ना-स्त्वयि गिरः । अथावाच्यः सर्वः स्वमतिपरिनामावधि गृणन् ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥ १ ॥ अतीतः पंथानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि । स कस्य स्तोतव्यः कति-विधगुणः कस्य विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ २ ॥ मधुस्फीता वाचः परमममृतं निर्मितवतस्तव ब्रह्मन्किं वागपि सुरगुरोर्विस्मयपदम् । मम त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थेऽ-स्मिन् पुरमथन बुद्धिर्व्यवसिता ॥ ३ ॥ तवैश्वर्यं यत्तज्ज-गदुदयरक्षाप्रलयकृत्त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु । अभव्यानामस्मिन्वरद रमणीयामरमणीं विहंतुं व्याक्रोशीं विदधत इहैके जडधियः ॥ ४ ॥ किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपादान इति च । अतर्क्यैश्वर्ये त्वय्यनव-

सरदुःस्थो हतधियः कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥ ५ ॥ अजन्मानो लोकाः किमवयववंतोऽपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति। अनीशो वा कुर्याद्भुवनजनने कः परिकरो यतो मंदास्त्वां प्रत्यमरवर संशेरत इमे ॥ ६ ॥ त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च। रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ ७ ॥ महोक्षः खट्वांगं परशुरजिनं भस्म फणिनः कपालं चेतीयत्तव वरद तंत्रोपकरणम्। सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥ ८ ॥ ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये। समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इव स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥ ९ ॥ तवैश्वर्यं यत्नाद्यदुपरि विरिंचिर्हरिरधः परिच्छेत्तुं यातावनलमनलस्कंधवपुषः। ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत् स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥ १० ॥ अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो यद्बाहूनभृत रणकंडूपरवशान्। शिरःपद्मश्रेणीरचितचरणांभोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥ ११ ॥ अमुष्य त्वत्से-

वासमधिगतसारं भुजवनं बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः । अलभ्या पातालेऽप्यलसचलितांगुष्ठशिरसि प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः ॥ १२ ॥ यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः । न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयोर्न कस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥ १३ ॥ अकांडब्रह्मांडक्षयचकितदेवासुरकृपाविधेयस्याऽऽसीद्यस्त्रिनयन विषं संहृतवतः । स कल्माषः कंठे तव न कुरुते न श्रियमहो विकारोऽपि श्लाघ्यो भुवनभयभंगव्यसनिनः ॥१४॥ असिद्धार्था नैव क्वचिदपि सदेवासुरनरे निवर्तंते नित्यं जगति जयिनो यस्य विशिखाः । स पश्यन्नीश त्वामितरसुरसाधारणमभूत् स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥ १५ ॥ मही पादाघाताद्व्रजति सहसा संशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् । मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥ १६ ॥ वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते । जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥१७॥ रथः क्षोणी यंता शतधृतिरगेंद्रो धनुरथो रथांगे चंद्रार्कौ रथचरणपाणिः शर इति । दिध-

क्षोस्ते कोऽयं त्रिपुरतृणमाडंबरविधिर्विधेयैः क्रीडंत्यो न खलु परतंत्राः प्रभुधियः ॥१८॥ हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम् । गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥ १९ ॥ क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते । अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं श्रुतौ श्रद्धां बध्वा कृतपरिकरः कर्मसु जनः ॥ २० ॥ क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः । क्रतुभ्रेषस्त्वत्तः क्रतुफलविधानव्यसनिनो ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥२१॥ प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा । धनुःपाणेर्यातं दिवमपि सपत्राकृतममुं त्रसंतं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥ २२ ॥ स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि । यदि स्त्रैणं देवी यमनिरतदेहार्धघटनादवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥२३॥ श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः । अमंगल्यं शीलं तव भवतु नामैवमखिलं तथापि स्मर्तृणां वरद परमं मंगलमसि ॥ २४ ॥ मनः प्रत्यक्चित्ते

सविधमवधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्संगितदृशः । यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये दधत्यंतस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥२५॥ त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च । परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥ २६ ॥ त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति । तुरीयं ते धाम ध्वनिभिरवरुंधानमणुभिः समस्तव्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥ २७ ॥ भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महांस्तथा भीमेशानाविति यदभिधानाष्टकमिदम् । अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि प्रियायास्मै धाम्ने प्रविहितनमस्योऽस्मि भवते ॥२८॥ नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः । नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः ॥ २९ ॥ बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः प्रबलतमसे तत्संहारे हराय नमो नमः । जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥ ३० ॥ कृशपरिणति चेतःक्लेशवश्यं क्व चेदं क्व च तव गुणसीमोल्लंघिनी

शश्वद्द्धिः । इति चकितममंदीकृत्य मां भक्तिराधाद्वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥ ३१ ॥ असितगिरिसमं स्यात्कज्जलं सिंधुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी । लिखति यदि गृहीत्वा शारदा सार्वकालं तदपि तव गुणानामीश पारं न याति ॥ ३२ ॥ असुरसुरमुनींद्रैरर्चितस्येंदुमौलेर्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य । सकलगणवरिष्ठः पुष्पदंताभिधानो रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥ ३३ ॥ अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्पठति परमभक्त्या शुद्धचित्तः पुमान्यः । स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र प्रचुरतरधनायुःपुत्रवान्कीर्तिमांश्च ॥ ३४ ॥ महेशान्नापरो देवो महिम्नो नापरा स्तुतिः । अघोरान्नापरो मंत्रो नास्ति तत्त्वं गुरोः परम् ॥ ३५ ॥ दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः । महिम्नस्तवपाठस्य कलां नार्हंति षोडशीम् ॥ ३६ ॥ कुसुमदशननामा सर्वगंधर्वराजः शशिधरवरमौलेर्देवदेवस्य दासः । स गुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात्स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ॥ ३७ ॥ सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं पठति यदि मनुष्यः प्रांजलिर्नान्यचेताः । व्रजति शिवसमीपं किंनरैः स्तूयमानः स्तवनमिदममोघं पुष्पदंतप्रणीतम् ॥ ३८ ॥ श्रीपुष्पदंतमुखपंकजनिर्गतेन स्तोत्रेण किल्बिषहरेण हरप्रियेण । कंठस्थितेन पठितेन

समाहितेन सुप्रीणितो भवति भूतपतिर्महेशः ॥ ३९ ॥ इत्येषा वाङ्मयी पूजा श्रीमच्छंकरपादयोः । अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ॥ ४० ॥ इति श्रीपुष्पदंतविरचितं शिवमहिम्नःस्तोत्रं संपूर्णम् ॥

४०. शिवभुजंगप्रयातस्तोत्रम् ।

श्रीगणेशाय नमः ॥ गलद्दानगंडं मिलद्भृंगखंडं चलच्चारुशुंडं जगत्त्राणशौंडम् । लसद्दंतकांडं विपद्भंगचंडं शिवप्रेमपिंडं भजे वक्रतुंडम् ॥१॥ अनाद्यंतमाद्यं परं तत्त्वमर्थं चिदाकारमेकं तुरीयं त्वमेयम् । हरिब्रह्ममृग्यं परब्रह्मरूपं मनोवागतीतं महः शैवमीडे ॥ २ ॥ स्वशक्त्यादिशक्त्यंतसिंहासनस्थं मनोहारि सर्वांगरत्नादिभूषम् । जटाहींदुगंगास्थिशश्यर्कमौलिं परं शक्तिमित्रं नुमः पंचवक्त्रम् ॥३॥ शिवेशानतत्पूरुषाघोरवामादिभिर्ब्रह्मभिर्हृन्मुखैः षड्भिरंगैः । अनौपम्यषट्त्रिंशतं तत्त्वविद्यामतीतं परं त्वां कथं वेत्ति को वा ॥ ४ ॥ प्रवालप्रवाहप्रभाशोणमर्धं मरुत्वन्मणिश्रीमहः श्याममर्धम् । गुणस्यूतमेकं वपुश्चैकमंतः स्मरामि स्मरापत्तिसंपत्तिहेतुम् ॥ ५ ॥ स्वसेवासमायातदेवासुरेंद्रानमन्मौलिमंदारमालाभिषिक्तम् । नमस्यामि शंभो पदांभोरुहं ते भवांभोधिपोतं भवानीविभाव्यम् ॥ ६ ॥ जगन्नाथ मन्नाथ गौरीसनाथ प्रपन्नानुकंपिन्वि-

पन्नार्तिहारिन् । महःस्तोममूर्ते समस्तैकबंधो नमस्ते नमस्ते पुनस्ते नमोऽस्तु ॥ ७ ॥ महादेव देवेश देवाधिदेव स्मरारे पुरारे यमारे हरेति । ब्रुवाणः स्मरिष्यामि भक्त्या भवंतं ततो मे दयाशील देव प्रसीद ॥ ८ ॥ विरूपाक्ष विश्वेश विद्यादिकेश त्रयीमूल शंभो शिव त्र्यंबक त्वम् । प्रसीद स्मर त्राहि पश्याव पुष्य क्षमस्वाप्नुहि त्र्यक्ष पाहि क्षियामः ॥ ९ ॥ त्वदन्यः शरण्यः प्रपन्नस्य नेति प्रसीद स्मरन्नेव हन्यास्तु दैन्यम् । न चेत्ते भवेद्भक्तवात्सल्यहानिस्ततो मे दयालो दयां संनिधेहि ॥ १० ॥ अयं दानकालस्त्वहं दानपात्रं भवान्नाथ दाता त्वमन्यन्न याचे । भवद्भक्तिमेव स्थिरां देहि मह्यं कृपाशील शंभो कृतार्थोस्मि तस्मात् ॥ ११ ॥ पशुं वेत्सि चेन्मां त्वमेवाधिरूढः कलंकीति वा मूर्ध्नि धत्से त्वमेव । द्विजिह्वः पुनः सोऽपि ते कंठभूषा त्वदंगीकृताः शर्व सर्वेऽपि धन्याः ॥ १२ ॥ न शक्नोमि कर्तुं परद्रोहलेशं कथं प्रीयसे त्वं न जाने गिरीश । तदा हि प्रसन्नोऽसि कस्यापि कांतासुतद्रोहिणो वा पितृद्रोहिणो वा ॥ १३ ॥ स्तुतिं ध्यानमर्चां यथावद्विधातुं भजन्नप्यजानन्महेशावलंबे । त्रसंतं सुतं त्रातुमग्रे मृकंडोर्यमप्राणनिर्वापणं त्वत्पदाब्जम् ॥ १४ ॥ अकंठे कलंकादनंगे भुजंगादपाणौ कपालादभालेऽनलाक्षात् । अमौलौ शशांकादवामे कलत्रादहं देवमन्यं न मन्ये न मन्ये ॥ १५ ॥

इति श्रीसत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं श्रीशिवभुजंगप्रयातस्तोत्रं संपूर्णम् ॥

४१. शिवषडक्षरस्तोत्रम्।

श्रीगणेशाय नमः ॥ ॐकारं बिंदुसंयुक्तं नित्यं ध्यायंति योगिनः। कामदं मोक्षदं चैव ॐकाराय नमो नमः ॥१॥ नमंति ऋषयो देवा नमंत्यप्सरसां गणाः। नरा नमंति देवेशं नकाराय नमो नमः ॥ २ ॥ महादेवं महात्मानं महाध्यानं परायणम्। महापापहरं देवं मकाराय नमो नमः ॥ ३ ॥ शिवं शांतं जगन्नाथं लोकानुग्रहकारकम्। शिवमेकपदं नित्यं शिकाराय नमो नमः ॥ ४ ॥ वाहनं वृषभो यस्य वासुकिः कंठभूषणम्। वामे शक्तिधरं देवं वकाराय नमो नमः ॥ ५ ॥ यत्र यत्र स्थितो देवः सर्वव्यापी महेश्वरः। यो गुरुः सर्वदेवानां यकाराय नमो नमः ॥ ६ ॥ षडक्षरमिदं स्तोत्रं यः पठेच्छिवसंनिधौ। शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ७ ॥ इति श्रीरुद्रयामले उमामहेश्वरसंवादे शिवषडक्षरस्तोत्रं संपूर्णम् ॥

४२. शिवपंचाक्षरस्तोत्रम्।

श्रीगणेशाय नमः ॥ नागेंद्रहाराय त्रिलोचनाय भस्मांगरागाय महेश्वराय। नित्याय शुद्धाय दिगंबराय तस्मै नकाराय नमः शिवाय ॥ १ ॥ मंदाकिनीसलिलचंदनचर्चिताय नंदीश्वरप्रमथनाथमहेश्वराय। मंदारपुष्प-

बहुपुष्पसुपूजिताय तस्मै मकाराय नमः शिवाय ॥ २ ॥ शिवाय गौरीवदनाब्जवृंदसूर्याय दक्षाध्वरनाशकाय । श्रीनीलकंठाय वृषध्वजाय तस्मै शिकाराय नमः शिवाय ॥ ३ ॥ वसिष्ठकुंभोद्भवगौतमार्यमुनींद्रदेवार्चितशेखराय । चंद्रार्कवैश्वानरलोचनाय तस्मै वकाराय नमः शिवाय ॥४॥ यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय । दिव्याय देवाय दिगंबराय तस्मै यकाराय नमः शिवाय ॥ ५ ॥ पंचाक्षरमिदं पुण्यं यः पठेच्छिवसंनिधौ । शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ६ ॥ इति श्रीमच्छंकराचार्यविरचितं शिवपंचाक्षरस्तोत्रं संपूर्णम् ॥

४३. उपमन्युकृतशिवस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जय शंकर पार्वतीपते मृड शंभो शशिखंडमंडन । मदनांतक भक्तवत्सल प्रियकैलास दयासुधांबुधे ॥ १ ॥ सदुपायकथास्वपंडितो हृदये दुःखशरेण खडितः । शशिखंडशिखंडमंडनं शरणं यामि शरण्यमीश्वरम् ॥ २ ॥ महतः परितः प्रसर्पतस्तमसो दर्शनभेदिनो भिदे । दिननाथ इव स्वतेजसा हृदयव्योम्नि मनागुदेहि नः ॥ ३ ॥ न वयं तव चर्मचक्षुषा पदवीमप्युपवीक्षितुं क्षमाः । कृपयाऽभयदेन चक्षुषा सकलेनेश विलोकयाशु नः ॥ ४ ॥ त्वदनुस्मृतिरेव पावनी स्तुतियुक्ता न हि वक्तुमीश सा । मधुरं हि पयः स्वभावतो

ननु कीदृक्सितशर्करान्वितम् ॥ ५ ॥ सविषोऽप्यमृतायते भवाच्छवमुंडाभरणोऽपि पावनः। भव एव भवांतकः सतां समदृष्टिर्विषमेक्षणोऽपि सन् ॥ ६ ॥ अपि शूलधरो निरामयो दृढवैराग्यरतोऽपि रागवान्। अपि भैक्ष्यचरो महेश्वरश्चरितं चित्रमिदं हि ते प्रभो ॥ ७ ॥ वितरत्यभिवांछितं दृशा परिदृष्टः किल कल्पपादपः। हृदये स्मृतएव धीमते नमतेऽभीष्टफलप्रदो भवान् ॥ ८ ॥ सहसैव भुजंगपाशवान्विनिगृह्णाति न यावदंतकः। अभयं कुरु तावदाशु मे गतजीवस्य पुनः किमौषधैः ॥ ९ ॥ सविषैरिव भीमपन्नगैर्विषयैरेभिरलं परिक्षतम्। अमृतैरिव संभ्रमेण मामभिषिंचाशु दयावलोकनैः ॥ १० ॥ मुनयो बहवोऽद्य धन्यतां गमिताः स्वाभिमतार्थदर्शिनः। करुणाकर येन तेन मामवसन्नं ननु पश्य चक्षुषा ॥ ११ ॥ प्रणमाम्यथ यामि चापरं शरणं कं कृपणाभयप्रदम्। विरहीव विभो प्रियामयं परिपश्यामि भवन्मयं जगत् ॥ १२ ॥ बहवो भवताऽनुकंपिताः किमितीशान न माऽनुकंपसे। दधता किमु मंदराचलं परमाणुः कमठेन दुर्धरः ॥ १३ ॥ अशुचिं यदि माऽनुमन्यसे किमिदं मूर्ध्नि कपालदाम ते। उत शाठ्यमसाधुसंगिनं विषलक्ष्मासि न किं द्विजिह्वधृक् ॥ १४ ॥ क्व दृशं विदधामि किं करोम्यनुतिष्ठामि कथं भयाकुलः। क्व नु तिष्ठसि रक्ष रक्ष मामयि शंभो शर-

णागतोऽस्मि ते ॥ १५ ॥ विलुठाम्यवनौ किमाकुलः किमुरो हन्मि शिरश्छिनद्मि वा। किमु रोदिमि रारटीमि किं कृपणं मां न यदीक्षसे प्रभो ॥ १६ ॥ शिव सर्वग शर्व शर्मदं प्रणतो देव दयां कुरुष्व मे। नम ईश्वर नाथ दिक्पते पुनरेवेश नमो नमोऽस्तु ते ॥ १७ ॥ शरणं तरुणेंदुशेखरः शरणं मे गिरिराजकन्यका। शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥ १८ ॥ उपमन्युकृतं स्तवोत्तमं जपतः शंभुसमीपवर्तिनः। अभिवांछितभाग्यसंपदः परमायुः प्रददाति शंकरः ॥ १९ ॥ उपमन्युकृतं स्तवोत्तमं प्रजपेद्यस्तु शिवस्य संनिधौ। शिवलोकमवाप्य सोऽचिरात्सह तेनैव शिवेन मोदते ॥ २० ॥ इत्युपमन्युकृतं शिवस्तोत्रं संपूर्णम् ॥

४४. शिवापराधक्षमापनस्तोत्रम्।

श्रीगणेशाय नमः ॥ आदौ कर्मप्रसंगात् कलयति कलुषं मातृकुक्षौ स्थितं मां विण्मूत्रामेध्यमध्ये क्वथयति नितरां जाठरो जातवेदाः। यद्यद्वै तत्र दुःखं व्यथयति नितरां शक्यते केन वक्तुं क्षंतव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥ १ ॥ बाल्ये दुःखातिरेकान्मललुलितवपुः स्तन्यपाने पिपासा नो शक्तश्चेंद्रियेभ्यो भवगुणजनिता जंतवो मां तुदन्ति। नानारोगादिदुःखाद्रुदनपरवशः शंकरं न स्मरामि क्षंतव्यो मेऽपराधः शिव

शिव० ॥ २ ॥ प्रौढोऽहं यौवनस्थो विषयविषधरैः पंचभिर्मर्मसंधौ दष्टो नष्टोऽविवेकः सुतधनयुवतिस्वादसौख्ये निषण्णः । शैवीचिंताविहीनं मम हृदयमहो मानगर्वाधिरूढं क्षंतव्यो मेऽपराधः शिव शिव० ॥३॥ वार्धक्ये चेंद्रियाणां विगतगतिमतिश्चाधिदैवादितापैः पापै रोगैर्वियोगैस्त्वनवसितवपुः प्रौढिहीनं च दीनम् । मिथ्यामोहाभिलाषैर्भ्रमति मम मनो धूर्जटेर्ध्यानशून्यं क्षंतव्यो मेऽपराधः शिव शिव० ॥४॥ नो शक्यं स्मार्तकर्म प्रतिपदगहनप्रत्यवायाकुलाख्यं श्रौते वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गेऽसुरारे । ज्ञातो धर्मो विचारैः श्रवणमननयोः किं निदिध्यासितव्यं क्षंतव्यो मेऽपराधः शिव शिव० ॥ ५ ॥ स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गांगतोयं पूजार्थं वा कदाचिद्बहुतरगहनात्खंडबिल्वीदलानि । नानीता पद्ममाला सरसि विकसिता गंधपुष्पैस्त्वदर्थं क्षंतव्यो मेऽपराधः शिव शिव० ॥ ६ ॥ दुग्धैर्मध्वाज्ययुक्तैर्दधिसितसहितैः स्नापितं नैव लिंगं नो लिप्तं चंदनाद्यैः कनकविरचितैः पूजितं न प्रसूनैः । धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैव भक्ष्योपहारैः क्षंतव्यो मेऽपराधः शिव शिव० ॥७॥ ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो हव्यं ते लक्षसंख्यैर्हुतवहवदने नार्पितं बीजमंत्रैः । नो तप्तं गांगतीरे व्रतजपनियमै रुद्रजाप्यैर्न वेदैः क्षंतव्यो

मेऽपराधः शिव शिव० ॥८॥ स्थित्वा स्थाने सरोजे प्रणवमयमरुत्कुंडले सूक्ष्ममार्गे शांते स्वांते प्रलीने प्रकटितविभवे ज्योतिरूपे पराख्ये। लिंगज्ञे ब्रह्मवाक्ये सकलतनुगतं शंकरं न स्मरामि क्षंतव्यो मेऽपराधः शिव शिव० ॥९॥ नग्नो निःसंगशुद्धस्त्रिगुणविरहितो ध्वस्तमोहांधकारो नासाग्रे न्यस्तदृष्टिर्विदितभवगुणो नैव दृष्टः कदाचित्। उन्मन्याऽवस्थया त्वां विगतकलिमलं शंकरं न स्मरामि क्षंतव्यो मेऽपराधः शिव शिव० ॥१०॥ चंद्रोद्भासितशेखरे स्मरहरे गंगाधरे शंकरे सर्पैर्भूषितकंठकर्णविवरे नेत्रोत्थवैश्वानरे। दंतित्वक्कृतसुंदरांबरधरे त्रैलोक्यसारे हरे मोक्षार्थं कुरु चित्तवृत्तिमखिलामन्यैस्तु किं कर्मभिः ॥११॥ किंवाऽनेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं किंवा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम्। ज्ञात्वैतत्क्षणभंगुरं सपदि रे त्याज्यं मनो दूरतः स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम् ॥ १२ ॥ आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं प्रत्यायांति गताः पुनर्न दिवसाः कालो जगद्भक्षकः। लक्ष्मीस्तोयतरंगभंगचपला विद्युच्चलं जीवितं तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥ १३ ॥ करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वाऽपराद्धम्। विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव शंभो

॥ १४ ॥ इति श्रीमच्छंकराचार्यविरचितं शिवापराध-
क्षमापनस्तोत्रं संपूर्णम् ॥

४५. रावणकृतशिवतांडवस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जटाकटाहसंभ्रमभ्रमन्निलिंपनिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्धनि । धगद्धगद्धगज्ज्वल-
ल्ललाटपट्टपावके किशोरचंद्रशेखरे रतिः प्रतिक्षणं मम
॥ १ ॥ धराधरेंद्रनंदिनीविलासबंधुबंधुरस्फुरद्दिगंतसंतति-
प्रमोदमानमानसे । कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि
क्वचिच्चिदंबरे मनो विनोदमेतु वस्तुनि ॥ २ ॥ जटाभुजं-
गपिंगलस्फुरत्फणामणिप्रभाकदंबकुंकुमद्रवप्रलिप्तदिग्वधू-
मुखे । मदांधसिंधुरस्फुरत्त्वगुत्तरीयमेदुरे मनो विनोदम-
द्भुतं बिभर्तु भूतभर्तरि ॥ ३ ॥ सहस्रलोचनप्रभृत्यशेषले-
खशेखरप्रसूनधूलिधोरणीविधूसरांघ्रिपीठभूः । भुजंगरा-
जमालया निबद्धजाटजूटकः श्रियै चिराय जायतां चको-
रबंधुशेखरः ॥ ४ ॥ ललाटचत्वरज्वलद्धनंजयस्फुलिंग-
भान्तपीतपंचसायकं नमन्निलिंपनायकम् । सुधामयूख-
लेखया विराजमानशेखरं महाकपालिसंपदे शिरो जटा-
लमस्तु नः ॥ ५ ॥ करालभालपट्टिकाधगद्धगद्धगज्ज्वलद्ध-
नंजयाधरीकृतप्रचंडपंचसायके । धराधरेंद्रनंदनीकुचाग्र-
चित्रपत्रकप्रकल्पनैकशिल्पिनि त्रिलोचने मतिर्मम ॥ ६ ॥
नवीनमेघमंडलीनिरुद्धदुर्धरस्फुरत्कुहूनिशीथिनीतमःप्रबं-

प्रबंधुकंधरः । निलिंपनिर्झरीधरस्तनोतु कृत्तिसिंधुरः कलानिधानबंधुरः श्रियं जगद्धुरंधरः ॥ ७ ॥ प्रफुल्लनीलपंकजप्रपंचकालिमच्छटाविडंबिकंठकंधरारुचिप्रबंधकंधरम् । स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं गजच्छिदांधकच्छिदं तमंतकच्छिदं भजे ॥ ८ ॥ अगर्वसर्वमंगलाकलाकदंबमंजरीरसप्रवाहमाधुरीविजृंभणामधुव्रतम् । स्मरांतकं पुरांतकं भवांतकं मखांतकं गजांतकांधकांतकं तमंतकांतकं भजे ॥ ९ ॥ जयत्वदभ्रविभ्रमभ्रमद्भुजंगमस्फुरद्धगद्धगद्विनिर्गमत्करालभालहव्यवाट् । धिमिद्धिमिद्धिमिध्वनन्मृदंगतुंगमंगलध्वनिक्रमप्रवर्तितप्रचंडतांडवः शिवः ॥१०॥ दृषद्विचित्रतल्पयोर्भुजंगमौक्तिकस्रजोर्गरिष्ठरत्नलोष्टयोः सुहृद्विपक्षपक्षयोः । तृणारविंदचक्षुषोः प्रजामहीमहेंद्रयोः समं प्रवर्तयन्मनः कदा सदाशिवं भजे ॥११॥ कदा निलिंपनिर्झरीनिकुंजकोटरे वसन्विमुक्तदुर्मतिः सदा शिरःस्थमंजलिं वहन् । विमुक्तलोललोचनाललामभाललग्नकः शिवेति मंत्रमुच्चरन्कदा सुखी भवाम्यहम् ॥ १२ ॥ इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेति संततम् । हरे गुरौ स भक्तिमाशु याति नान्यथा गतिं विमोहनं हि देहिनां तु शंकरस्य चिंतनम् ॥ १३ ॥ पूजावसानसमये दशवक्त्रगीतं यः शंभुपूजनमिदं पठति प्रदोषे । तस्य स्थिरां रथगजेंद्रतुरंगयुक्तां

लक्ष्मीं सदैव सुमुखीं प्रददाति शंभुः ॥ १४ ॥ इति श्रीरावणविरचितं शिवतांडवस्तोत्रं संपूर्णम् ॥

४६. द्वादशज्योतिर्लिंगस्तोत्रम्।

श्रीगणेशाय नमः ॥ सौराष्ट्रदेशे विदशेऽतिरम्ये ज्योतिर्मयं चंद्रकलावतंसम्। भक्तिप्रदानाय कृपावतीर्णं तं सोमनाथं शरणं प्रपद्ये ॥ १ ॥ श्रीशैलसंगे विबुधातिसंगे तुलाद्रितुंगेऽपि मुदा वसंतम्। तमर्जुनं मल्लिकपूर्वमेकं नमामि संसारसमुद्रसेतुम् ॥ २ ॥ अवंतिकायां विहितावतारं मुक्तिप्रदानाय च सज्जनानाम्। अकालमृत्योः परिरक्षणार्थं वंदे महाकालमहासुरेशम् ॥ ३ ॥ कावेरिकानर्मदयोः पवित्रे समागमे सज्जनतारणाय। सदैव मांधातृपुरे वसंतमोंकारमीशं शिवमेकमीडे ॥ ४ ॥ पूर्वोत्तरे प्रज्वलिकानिधाने सदा वसंतं गिरिजासमेतम्। सुरासुराराधितपादपद्मं श्रीवैद्यनाथं तमहं नमामि ॥ ५ ॥ याम्ये सदंगे नगरेऽतिरम्ये विभूषितांगं विविधैश्च भोगैः। सद्भक्तिमुक्तिप्रदमीशमेकं श्रीनागनाथं शरणं प्रपद्ये ॥ ६ ॥ महाद्रिपार्श्वे च तटे रमंतं संपूज्यमानं सततं मुनींद्रैः। सुरासुरैर्यक्षमहोरगाद्यैः केदारमीशं शिवमेकमीडे ॥ ७ ॥ सह्याद्रिशीर्षे विमले वसंतं गोदावरीतीरपवित्रदेशे। यद्दर्शनात्पातकमाशु नाशं प्रयाति तं त्र्यंबकमीशमीडे ॥ ८ ॥ सुताम्रपर्णीजलराशियोगे निबध्य सेतुं विशिखैरसंख्यैः।

श्रीरामचंद्रेण समर्पितं तं रामेश्वराख्यं नियतं नमामि ॥ ९ ॥ यं डाकिनीशाकिनिकासमाजे निषेव्यमाणं पिशिताशनैश्च । सदैव भीमादिपदप्रसिद्धं तं शंकरं भक्तहितं नमामि ॥ १० ॥ सानंदमानंदवने वसंतमानंदकंदं हतपापवृंदम् । वाराणसीनाथमनाथनाथं श्रीविश्वनाथं शरणं प्रपद्ये ॥ ११ ॥ इलापुरे रम्यविशालकेऽस्मिन्समुल्लसंतं च जगद्वरेण्यम् । वंदे महोदारतरस्वभावं घृष्णेश्वराख्यं शरणं प्रपद्ये ॥ १२ ॥ ज्योतिर्मयद्वादशलिंगकानां शिवात्मनां प्रोक्तमिदं क्रमेण । स्तोत्रं पठित्वा मनुजोऽतिभक्त्या फलं तदालोक्य निजं भजेच्च ॥ १३ ॥ इति श्रीद्वादशज्योतिर्लिंगस्तोत्रम् ॥

४७. शिवस्तुतिः ।

श्रीगणेशाय नमः ॥ स्फुटं स्फटिकसप्रभं स्फुटितहारकश्रीजटं शशांकदलशेखरं कपिलफुल्लनेत्रत्रयम् । तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिमत्कदा नु शितिकंठ ते वपुरवेक्षते वीक्षणम् ॥ १ ॥ त्रिलोचन विलोचने लसति ते ललामायिते स्मरो नियमघस्मरो नियमिनामभूद्भस्मसात् । स्वभक्तिलतया वशीकृतवती सतीयं सती स्वभक्तवशतो भवानपि वशी प्रसीद प्रभो ॥ २ ॥ महेश महितोऽसि तत्पुरुष पूरुषाग्र्यो भवानघोररिपुघोर तेऽनवम वामदेवांजलिः । नमः सपदिजात ते त्वमिति पंचरूपोचितप्रपंचचयपंच-

वृन्मम मनस्तमस्ताडय ॥ ३ ॥ रसाघनरसानलानिलवि-यद्विवस्वद्विधुप्रयष्टृषु निविष्टमित्यज भजामि मूर्त्यष्टकम्। प्रशांतमुत भीषणं भुवनमोहनं चेत्यहो वपूंषि गुणपूषिते-ऽहमहमात्मनोऽहंभिदे ॥ ४ ॥ विमुक्तिपरमाध्वनां तव षडध्वनामास्पदं पदं निगमवेदिनो जगति वामदेवादयः। कथंचिदुपशिक्षिता भगवतैव संविद्रते वयं तु विरलांतराः कथमुमेश तन्मन्महे ॥ ५ ॥ कठोरितकुठारया ललितशू-लया वाहया रणडुमरुणा स्फुरद्धरिणया सखट्वांगया। चलाभिरचलाभिरप्यगणिताभिरुन्नृत्यतश्चतुर्दश जगंति ते जयजयेत्ययुर्विस्मयम् ॥ ६ ॥ पुरा त्रिपुररंधनं विविध-दैत्यविध्वंसनं पराक्रमपरंपरा अपि परा न ते विस्मयः। अमर्षिबलहर्षितक्षुभितवृत्तनेत्रोज्ज्वलज्ज्वलज्ज्वलनहेलया शलभितं हि लोकत्रयम् ॥ ७ ॥ सहस्रनयनो गुहः सहस-

हस्ररश्मिर्विधुर्बृहस्पतिरुताप्पतिः ससुरसिद्धविद्याधराः। भवत्पदपरायणाः श्रियमिमां ययुः प्रार्थितां भवान् सुर-तरुर्भृशं शिव शिवां शिवावल्लभ ॥ ८ ॥ तव प्रियतमा-दतिप्रियतमं सदैवांतरं पयस्युपहितं घृतं स्वयमिव श्रियो वल्लभम्। विबुध्य लघुबुद्धयः स्वपरपक्षलक्ष्यायितं पठंति हि लुठंति ते शठहृदः शुचा शुंठिताः ॥ ९ ॥ निवास-निलया चिता तव शिरस्ततेर्मालिका कपालमपि ते करे त्वमशिवोऽस्यनंतर्धियाम्। तथापि भवतः पदं शिवशिवे-

त्यदो जल्पतामकिंचन न किंचन वृजिनमस्ति भस्मीभवेत् ॥ १० ॥ त्वमेव किल कामधुक् सकलकाममापूरयन् सदा त्रिनयनो भवान्वहति चार्चिनेत्रोद्भवम् । विषं विषधरान्दधत्पिबसि तेन चानंदवान्विरुद्धचरितोचिता जगदधीश ते भिक्षुता ॥ ११ ॥ नमः शिवशिवाशिवाशिवशिवार्थकृत्ताशिवं नमो हरहराहराहरहरांतरीं मे दृशम् । नमो भवभवाभवप्रभव भूतये मे भवान्नमो मृड नमो नमो नम उमेश तुभ्यं नमः ॥ १२ ॥ सतां श्रवणपद्धतिं सरतु सन्नतोक्त्यसौ शिवस्य करुणांकुरात्प्रतिकृतात्सदा सोचिता । इति प्रथितमानसो व्यधित नाम नारायणः शिवस्तुतिमिमां शिवं लिकुचिसूरिसूनुः सुधीः ॥ १३ ॥ इति श्रीमल्लिकुचिसूरिसूनुनारायणपंडिताचार्यविरचिता शिवस्तुतिः संपूर्णा ॥

४८. पशुपत्यष्टकम् ।

श्रीगणेशाय नमः ॥ पशुपतींदुपतिं धरणीपतिं भुजगलोकपतिं च सतीपतिम् । प्रणतभक्तजनार्तिहरं परं भजत रे मनुजा गिरिजापतिम् ॥ १ ॥ न जनको जननी न च सोदरो न तनयो न च भूरिबलं कुलम् । अवति कोपि न कालवशं गतं भजत रे मनुजा गिरिजापतिम् ॥ २ ॥ मुरजडिंडिमवाद्यविलक्षणं मधुरपंचमनादविशारदम् । प्रमथभूतगणैरपि सेवितं भजत रे मनुजा० ॥३॥ शरणदं सुखदं

शरणान्वितं शिव शिवेति शिवेति नतं नृणाम्। अभयदं करुणावरुणालयं भजत रे मनुजा० ॥ ४ ॥ नरशिरोरचितं मणिकुंडलं भुजगहारमुदं वृषभध्वजम्। चितिरजोधवलीकृतविग्रहं भजत रे म० ॥ ५ ॥ मखविनाशकरं शशिशेखरं सततमध्वरभाजिफलप्रदम्। प्रलयदग्धसुरासुरमानवं भजत रे म० ॥६॥ सदमपास्य चिरं हृदि संस्थितं मरणजन्मजरामयपीडितम्। जगदुदीक्ष्य समीपभयाकुलं भजत रे म० ॥ ७ ॥ हरिविरंचिसुराधिपपूजितं यमजनेशधनेशनमस्कृतम्। त्रिनयनं भुवनत्रितयाधिपं भजत रे म० ॥८॥ पशुपतेरिदमष्टकमद्भुतं विरचितं पृथिवीपतिसूरिणा। पठति संशृणुते मनुजः सदा शिवपुरीं वसते लभते मुदम् ॥ ९ ॥ इति श्रीपशुपत्यष्टकं संपूर्णम् ॥

४९. लिंगाष्टकम्।

श्रीगणेशाय नमः ॥ ब्रह्ममुरारिसुरार्चितलिंगं निर्मलभासितशोभितलिंगम्। जन्मजदुःखविनाशकलिंगं तत्प्रणमामि सदाशिवलिंगम् ॥१॥ देवमुनिप्रवरार्चितलिंगं कामदहं करुणाकरलिंगम्। रावणदर्पविनाशनलिंगं तत्प्रण० ॥२॥ सर्वसुगंधिसुलेपितलिंगं बुद्धिविवर्धनकारणलिंगम्। सिद्धसुरासुरवंदितलिंगं तत्प्र० ॥३॥ कनकमहामणिभूषितलिंगं फणिपतिवेष्टितशोभितलिंगम्। दक्षसुयज्ञविनाश-

नलिंगं तत्प्र० ॥ ४ ॥ कुंकुमचंदनलेपितलिंगं पंकजहार-सुशोभितलिंगम् । संचितपापविनाशनलिंगं तत्प्र० ॥५॥ देवगणार्चितसेवितलिंगं भावैर्भक्तिभिरेव च लिंगम् । दिनकरकोटिप्रभाकरलिंगं तत्प्र० ॥ ६ ॥ अष्टदलोपरि-वेष्टितलिंगं सर्वसमुद्भवकारणलिंगम् । अष्टदरिद्रविनाशि-तलिंगं तत्प्र० ॥ ७ ॥ सुरगुरुसुरवरपूजितलिंगं सुरव-नपुष्पसदार्चितलिंगम् । परात्परं परमात्मकलिंगं तत्प्र० ॥८॥ लिंगाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ । शिवलो-कमवाप्नोति शिवेन सह मोदते ॥ ९ ॥ इति श्रीलिंगाष्ट-कस्तोत्रं संपूर्णम् ॥

५०. वेदसारशिवस्तवः ।

श्रीगणेशाय नमः ॥ पशूनां पतिं पापनाशं परेशं गजेंद्रस्य कृत्तिं वसानं वरेण्यम् । जटाजूटमध्ये स्फुरद्गांगवारिं महा-देवमेकं स्मरामि स्मरारिम् ॥१॥ महेशं सुरेशं सुराराति-नाशं विभुं विश्वनाथं विभूत्यंगभूषम् । विरूपाक्षमिंद्वर्क-वह्निन्त्रिनेत्रं सदानंदमीडे प्रभुं पंचवक्त्रम् ॥ २ ॥ गिरीशं गणेशं गले नीलवर्णं गवेंद्राधिरूढं गणातीतरूपम् । भवं भास्वरं भस्मना भूषितांगं भवानीकलत्रं भजे पंचवक्त्रम् ॥३॥ शिवाकांत शंभो शशांकार्धमौले महेशान शूलिन् जटाजूटधारिन् । त्वमेको जगद्व्यापको विश्वरूप प्रसीद प्रसीद प्रभो पूर्णरूप ॥४॥ परात्मानमेकं जगद्बीजमाद्यं

निरीहं निराकारमोंकारवेद्यम् । यतो जायते पाल्यते येन विश्वं तमीशं भजे लीयते यत्र विश्वम् ॥ ५ ॥ न भूमिर्न चापो न वह्निर्न वायुर्न चाकाशमास्ते न तंद्रा न निद्रा । न ग्रीष्मो न शीतं न देशो न वेषो न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे ॥ ६ ॥ अजं शाश्वतं कारणं कारणानां शिवं केवलं भासकं भासकानाम् । तुरीयं तमःपारमाद्यंतहीनं प्रपद्ये परं पावनं द्वैतहीनम् ॥ ७ ॥ नमस्ते नमस्ते विभो विश्वमूर्ते नमस्ते नमस्ते चिदानंदमूर्ते । नमस्ते नमस्ते तपोयोगगम्य नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥ ८ ॥ प्रभो शूलपाणे विभो विश्वनाथ महादेव शंभो महेश त्रिनेत्र । शिवाकांत शांत स्मरारे पुरारे त्वदन्यो वरेण्यो न मान्यो न गण्यः ॥ ९ ॥ शंभो महेश करुणामय शूलपाणे गौरीपते पशुपते पशुपाशनाशिन् । काशीपते करुणया जगदेतदेकस्त्वं हंसि पासि विदधासि महेश्वरोऽसि ॥१०॥ त्वत्तो जगद्भवति देव भव स्मरारे त्वय्येव तिष्ठति जगन्मृड विश्वनाथ । त्वय्येव गच्छति लयं जगदेतदीश लिंगात्मकं हर चराचरविश्वरूपिन् ॥ ११ ॥ इति श्रीमच्छंकराचार्यविरचितं वेदसारशिवस्तोत्रं संपूर्णम् ॥

५१. विश्वनाथाष्टकम् ।

श्रीगणेशाय नमः ॥ गंगातरंगरमणीयजटाकलापं गौरीनिरंतरविभूषितवामभागम् । नारायणप्रियमनंगमदापहारं

वाराणसीपुरपतिं भज विश्वनाथम् ॥ १ ॥ वाचामगोचरमनेकगुणस्वरूपं वागीशविष्णुसुरसेवितपादपीठम् । वामेन विग्रहवरेण कलत्रवंतं वाराणसी० ॥ २ ॥ भूताधिपं भुजगभूषणभूषितांगं व्याघ्राजिनांबरधरं जटिलं त्रिनेत्रम् । पाशांकुशाभयवरप्रदशूलपाणिं वाराणसी० ॥ ३ ॥ शीतांशुशोभितकिरीटविराजमानं भालेक्षणानलविशोषितपंचबाणम् । नागाधिपारचितभासुरकर्णपूरं वाराणसी० ॥ ४ ॥ पंचाननं दुरितमत्तमतंगजानां नागांतकं दनुजपुंगवपन्नगानाम् । दावानलं मरणशोकजराटवीनां वाराणसी० ॥ ५ ॥ तेजोमयं सगुणनिर्गुणमद्वितीयमानंदकंदमपराजितमप्रमेयम् । नागात्मकं सकलनिष्कलमात्मरूपं वाराणसी० ॥ ६ ॥ आशां विहाय परिहृत्य परस्य निंदां पापे रतिं च सुनिवार्य मनः समाधौ । आदाय हृत्कमलमध्यगतं परेशं वाराणसी० ॥७॥ रागादिदोषरहितं स्वजनानुरागवैराग्यशांतिनिलयं गिरिजासहायम् । माधुर्यधैर्यसुभगं गरलाभिरामं वाराणसी० ॥ ८ ॥ वाराणसीपुरपतेः स्तवनं शिवस्य व्याख्यातमष्टकमिदं पठते मनुष्यः । विद्यां श्रियं विपुलसौख्यमनंतकीर्तिं संप्राप्य देहविलये लभते च मोक्षम् ॥ ९ ॥ विश्वनाथाष्टकमिदं यः पठेच्छिवसन्निधौ । शिवलोकमवाप्नोति शिवेन सह मोदते ॥ १० ॥ इति श्रीव्यासकृतं विश्वनाथाष्टकं संपूर्णम् ॥

५२. शिवनामावल्यष्टकम्।

श्रीगणेशाय नमः॥ हे चंद्रचूड मदनांतक शूलपाणे स्थाणो गिरीश गिरिजेश महेश शंभो। भूतेश भीतभयसूदन मामनाथं संसारदुःखगहनाज्जगदीश रक्ष॥ १॥ हे पार्वतीहृदयवल्लभ चंद्रमौले भूताधिप प्रमथनाथ गिरीशचाप। हे वामदेव भव रुद्र पिनाकपाणे संसार०॥ २॥ हे नीलकंठ वृषभध्वज पंचवक्त्र लोकेश शेषवलय प्रमथेश शर्व। हे धूर्जटे पशुपते गिरिजापते मां संसार०॥३॥ हे विश्वनाथ शिव शंकर देवदेव गंगाधर प्रमथनायक नंदिकेश। बाणेश्वरांधकरिपो हर लोकनाथ संसार०॥४॥वाराणसीपुरपते मणिकर्णिकेश वीरेश दक्षमखकाल विभो गणेश। सर्वज्ञ सर्वहृदयैकनिवास नाथ संसार०॥५॥ श्रीमन्महेश्वर कृपामय हे दयालो हे व्योमकेश शितिकंठ गणाधिनाथ। भस्मांगराग नृकपालकलापमाल संसार०॥६॥ कैलासशैलविनिवास वृषाकपे हे मृत्युंजय त्रिनयन त्रिजगन्निवास। नारायणप्रिय मदापह शक्तिनाथ संसार०॥ ७॥ विश्वेश विश्वभवनाशितविश्वरूप विश्वात्मक त्रिभुवनैकगुणाभिवेश। हे विश्वबंधुकरुणामय दीनबंधो संसार०॥ ८॥ गौरीविलासभुवनाय महेश्वराय पंचाननाय शरणागतकल्पकाय। शर्वाय सर्वजगतामधिपाय

तस्मै दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ९ ॥ इति श्रीमच्छंकराचार्यविरचितं शिवनामावल्यष्टकं संपूर्णम् ॥

५३. प्रदोषस्तोत्राष्टकम् ।

श्रीगणेशाय नमः ॥ सत्यं ब्रवीमि परलोकहितं ब्रवीमि सारं ब्रवीम्युपनिषद्धृदयं ब्रवीमि । संसारमुल्बणमसारमवाप्य जतोः सारोऽयमीश्वरपदांबुरुहस्य सेवा ॥ १ ॥ ये नार्चयंति गिरिशं समये प्रदोषे ये नार्चितं शिवमपि प्रणमंति चान्ये । एतत्कथां श्रुतिपुटैर्न पिबंति मूढास्ते जन्मजन्मसु भवंति नरा दरिद्राः ॥ २ ॥ ये वै प्रदोषसमये परमेश्वरस्य कुर्वंत्यनन्यमनसोंऽघ्रिसरोजपूजाम् । नित्यं प्रवृद्धधनधान्यकलत्रपुत्रसौभाग्यसंपदधिकास्त इहैव लोके ॥ ३ ॥ कैलासशैलभुवने त्रिजगज्जनित्रीं गौरीं निवेश्य कनकाचितरत्नपीठे । नृत्यं विधातुमभिवांछति शूलपाणौ देवाः प्रदोषसमये नु भजंति सर्वे ॥४॥ वाग्देवी धृतवल्लकी शतमखो वेणुं दधत्पद्मजस्तालोन्निद्रकरो रमा भगवती गेयप्रयोगान्विता । विष्णुः सांद्रमृदंगवादनपटुर्देवाः समंतात्स्थिताः सेवंते तमनु प्रदोषसमये देवं मृडानीपतिम् ॥ ५ ॥ गंधर्वयक्षपतगोरगसिद्धसाध्यविद्याधरामरवराप्सरसां गणाश्च । येऽन्ये त्रिलोकनिलयाः सहभूतवर्गाः प्राप्ते प्रदोषसमये हरपार्श्वसंस्थाः ॥६॥ अतः प्रदोषे शिव एक एव पूज्योऽथ नान्ये हरिपद्मजाद्याः । तस्मिन्म-

भुम्। स्वर्णवर्णशेषपाशशोभितांगमंडलं काशिका० ॥५॥ रत्नपादुकाप्रभाभिरामपादयुग्मकं नित्यमद्वितीयमिष्टदैवतं निरंजनम्। मृत्युदर्पनाशनं करालदंष्ट्रमोक्षणं काशिका० ॥ ६ ॥ अट्टहासभिन्नपद्मजांडकोशसंततिं दृष्टिपातनष्टपापजालमुग्रशासनम्। अष्टसिद्धिदायकं कपालमालिकंधरं काशिका० ॥७॥ भूतसंघनायकं विशालकीर्तिदायकं काशिवासलोकपुण्यपापशोधकं विभुम्। नीतिमार्गकोविदं पुरातनं जगत्पतिं काशिका० ॥८॥ कालभैरवाष्टकं पठंति ये मनोहरं ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनम्। शोकमोहदैन्यलोभकोपतापनाशनं प्रयांति कालभैरवांघ्रिसंनिधिं नरा ध्रुवम्। ॥ ९ ॥ इति श्रीमच्छंकराचार्यविरचितं कालभैरवाष्टकं संपूर्णम् ॥

५८. असितकृतशिवस्तोत्रम्।

श्रीगणेशाय नमः ॥ असित उवाच। जगद्गुरो नमस्तुभ्यं शिवाय शिवदाय च। योगींद्राणां च योगीन्द्र गुरूणां गुरवे नमः॥ १ ॥ मृत्योर्मृत्युस्वरूपेण मृत्युसंसारखंडनम्। मृत्योरीश मृत्युबीज मृत्युंजय नमोस्तु ते ॥ २ ॥ कालरूपं कलयतां कालकालेश कारण। कालादतीत कालस्थ कालकाल नमोस्तु ते ॥ ३ ॥ गुणातीत गुणाधार गुणबीज गुणात्मक। गुणीश गुणिनां बीज गुणिनां गुरवे नमः ॥ ४ ॥ ब्रह्मस्वरूप ब्रह्मज्ञ ब्रह्मभावे च तत्पर। ब्रह्मबी-

जस्वरूपेण ब्रह्मबीज नमोस्तु ते ॥ ५ ॥ इति स्तुत्वा शिवं नत्वा पुरस्तथौ मुनीश्वरः । दीनवत्साश्रुनेत्रश्च पुलकांचितविग्रहः ॥ ६ ॥ असितेन कृतं स्तोत्रं भक्तियुक्तश्च यः पठेत् । वर्षमेकं हविष्याशी शंकरस्य महात्मनः ॥ ७ ॥ स लभेद्वैष्णवं पुत्रं ज्ञानिनं चिरजीविनम् । भवेद्धनाढ्यो दुःखी च मूको भवति पंडितः ॥ ८ ॥ अभार्यो लभते भार्यां सुशीलां च पतिव्रताम् । इह लोके सुखं भुक्त्वा यात्यंते शिवन्निधिम् ॥ ९ ॥ इदं स्तोत्रं पुरा दत्तं ब्रह्मणा च प्रचेतसे । प्रचेतसा स्वपुत्रायासिताय दत्तमुत्तमम् ॥ १० ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे असितकृतशिवस्तोत्रं संपूर्णम् ॥

५९. हिमालयकृतशिवस्तोत्रम् ।

श्रीगणेशाय नमः ॥ हिमालय उवाच । त्वं ब्रह्मा सृष्टिकर्ता च त्वं विष्णुः परिपालकः । त्वं शिवः शिवदोऽनंतः सर्वसंहारकारकः ॥ १ ॥ त्वमीश्वरो गुणातीतो ज्योतीरूपः सनातनः । प्रकृतः प्रकृतीशश्च प्राकृतः प्रकृतेः परः ॥ २ ॥ नानारूपविधाता त्वं भक्तानां ध्यानहेतवे । येषु रूपेषु यत्प्रीतिस्तत्तद्रूपं बिभर्षि च ॥ ३ ॥ सूर्यस्त्वं सृष्टिजनक आधारः सर्वतेजसाम् । सोमस्त्वं सस्यपाता च सततं शीतरश्मिना ॥ ४ ॥ वायुस्त्वं वरुणस्त्वं च विद्वांश्च विदुषां गुरुः । मृत्युंजयो मृत्युमृत्युः

कालकालो यमांतकः ॥ ५ ॥ वेदस्त्वं वेदकर्ता च वेदवेदांगपारगः । विदुषां जनकस्त्वं च विद्वांश्च विदुषां गुरुः ॥ ६ ॥ मंत्रस्त्वं हि जपस्त्वं हि तपस्त्वं तत्फलप्रदः । वाक्त्वं रागाधिदेवी त्वं तत्कर्ता तद्गुरुः स्वयम् ॥ ७ ॥ अहो सरस्वतीबीज कस्त्वां स्तोतुमिहेश्वरः । इत्येवमुक्त्वा शैलेंद्रस्तस्थौ धृत्वा पदांबुजम् ॥ ८ ॥ तत्रोवास तमाबोध्य चावरुह्य वृषाच्छिवः । स्तोत्रमेतन्महापुण्यं त्रिसंध्यं यः पठेन्नरः ॥ ९ ॥ मुच्यते सर्वपापेभ्यो भयेभ्यश्च भवार्णवे । अपुत्रो लभते पुत्रं मासमेकं पठेद्यदि ॥ १० ॥ भार्याहीनो लभेद्भार्यां सुशीलां सुमनोहराम् । चिरकालगतं वस्तु लभते सहसा ध्रुवम् ॥ ११ ॥ राज्यभ्रष्टो लभेद्राज्यं शंकरस्य प्रसादतः । कारागारे श्मशाने च शत्रुग्रस्तेऽतिसंकटे ॥१२॥ गभीरेऽतिजलाकीर्णे भग्नपोते विषादने । रणमध्ये महाभीते हिंस्रजंतुसमन्विते ॥१३॥ सर्वतो मुच्यते स्तुत्वा शंकरस्य प्रसादतः ॥ १४ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे हिमालयकृतं शिवस्तोत्रम् ॥

६०. शिवाष्टकम् ।

श्रीगणेशाय नमः ॥ प्रभुं प्राणनाथं विभुं विश्वनाथं जगन्नाथनाथं सदानंदभाजाम् । भवद्भव्यभूतेश्वरं भूतनाथं शिवं शंकरं शंभुमीशानमीडे ॥१॥ गले रुंडमालं तनौ सर्पजालं महाकालकालं गणेशाधिपालम् । जटाजूटभंगोत्तरंगैर-

शालं शिवं० ॥ २ ॥ सुदामाकरं मंडनं मंडयंतं महामंडलं भस्मभूषाधरं तम् । अनादिं ह्यपारं महामोहमारं शिवं० ॥ ३ ॥ तटाधोनिवासं महाट्टाट्टहासं महापापनाशं सदा सुप्रकाशम् । गिरीशं गणेशं सुरेशं महेशं शिवं० ॥ ४ ॥ गिरीन्द्रात्मजासंगृहीतार्धदेहं गिरौ संस्थितं सर्वदासन्नगेहम् । परब्रह्म ब्रह्मादिभिर्वंद्यमानं शिवं० ॥ ५ ॥ कपालं त्रिशूलं कराभ्यां दधानं पदांभोजनम्राय कामं ददानम् । बलीवर्दयानं सुराणां प्रधानं शिवं० ॥ ६ ॥ शरच्चंद्रगात्रं गुणानंदपात्रं त्रिनेत्रं पवित्रं धनेशस्य मित्रम् । अपर्णाकलत्रं चरित्रं विचित्रं शिवं० ॥ ७ ॥ हरं सर्पहारं चिताभूविहारं भवं वेदसारं सदा निर्विकारम् । श्मशाने वसंतं मनोजं दहंतं शिवं० ॥ ८ ॥ स्तवं यः प्रभाते नरः शूलपाणेः पठेत्सर्वदा भर्गभावानुरक्तः । स पुत्रं धनं धान्यमित्रं कलत्रं विचित्रः समासाद्य मोक्षं प्रयाति ॥९॥ इति श्रीशिवाष्टकं संपूर्णम् ॥

६१. द्वादशज्योतिर्लिंगानि ।

श्रीगणेशाय नमः ॥ सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् । उज्जयिन्यां महाकालमोंकारममलेश्वरम् ॥१॥ परल्यां वैजनाथं च डाकिन्यां भीमशंकरम् । सेतुबंधे तु रामेशं नागेशं दारुकानने ॥ २ ॥ वाराणस्यां तु विश्वेशं त्र्यंबकं गौतमीतटे । हिमालये तु केदारं घुसृणेशं शिवा-

लये ॥ ३ ॥ एतानि ज्योतिर्लिंगानि सायं प्रातः पठेन्नरः । सप्तजन्मकृतं पापं स्मरणेन विनश्यति ॥ ४ ॥ इति द्वादशज्योतिर्लिंगानि ॥

६२. दारिद्र्यदहनशिवस्तोत्रम् ।

श्रीगणेशाय नमः ॥ विश्वेश्वराय नरकार्णवतारणाय कर्णामृताय शशिशेखरधारणाय । कर्पूरकांतिधवलाय जटाधराय दारिद्र्यदुःखदहनाय नमः शिवाय ॥ १ ॥ गौरीप्रियाय रजनीशकलाधराय कालांतकाय भुजगाधिपकंकणाय । गंगाधराय गजराजविमर्दनाय दारिद्र्य० ॥ २ ॥ भक्तिप्रियाय भवरोगभयापहाय उग्राय दुर्गभवसागरतारणाय । ज्योतिर्मयाय गुणनामसुनृत्यकाय दारिद्र्य० ॥३॥ चर्मांबराय शवभस्मविलेपनाय भालेक्षणाय मणिकुंडलमंडिताय । मंजीरपादयुगलाय जटाधराय दारिद्र्य० ॥४॥ पंचाननाय फणिराजविभूषणाय हेमांशुकाय भुवनत्रयमंडिताय । आनंदभूमिवरदाय तमोमयाय दारिद्र्य० ॥५॥ भानुप्रियाय भवसागरतारणाय कालांतकाय कमलासनपूजिताय । नेत्रत्रयाय शुभलक्षणलक्षिताय दारिद्र्य० ॥६॥ रामप्रियाय रघुनाथवरप्रदाय नागप्रियाय नरकार्णवतारणाय । पुण्येषु पुण्यभरिताय सुरार्चिताय दारिद्र्य० ॥७॥ मुक्तेश्वराय फलदाय गणेश्वराय गीतप्रियाय वृषभेश्वरवाहनाय । मातंगचर्मवसनाय महेश्वराय दारिद्र्य० ॥ ८ ॥

वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिवारणम्। सर्वसंपत्करं शीघ्रं पुत्रपौत्रादिवर्धनम्। त्रिसंध्यं यः पठेन्नित्यं स हि स्वर्गमवाप्नुयात् ॥ ९ ॥ इति श्रीवसिष्ठविरचितं दारिद्र्यदहनशिवस्तोत्रं संपूर्णम् ॥

६३. कल्किकृतशिवस्तोत्रम्।

श्रीगणेशाय नमः ॥ गौरीनाथं विश्वनाथं शरण्यं भूतावासं वासुकीकंठभूषम्। त्र्यक्षं पंचास्यादिदेवं पुराणं वंदे सांद्रानंदसंदोहदक्षम् ॥१॥ योगाधीशं कामनाशं करालं गंगासंगक्लिन्नमूर्धानमीशम्। जटाजूटाटोपरि क्षिप्तभावं महाकालकं चंद्रभालं नमामि ॥ २ ॥ श्मशानस्थं भूतवेतालसंगं नानाशस्त्रैः खड्गशूलादिभिश्च। व्यग्रात्युग्रा बाहवो लोकनाशे यस्य क्रोधोद्भूतलोकोऽस्तमेति ॥ ३ ॥ यो भूतादिः पंचभूतैः सिसृक्षुस्तन्मात्रात्मा कालकर्मस्वभावैः। प्रहृत्येदं प्राप्य जीवत्वमीशो ब्रह्मानंदे क्रीडते तं नमामि ॥ ४ ॥ स्थितौ विष्णुः सर्वजिष्णुः सुरात्मा लोकान्साधून्धर्मसेतून्बिभर्ति। ब्रह्माद्यंशे योऽभिमानी गुणात्मा शब्दाद्यंगैस्तं परेशं नमामि ॥ ५ ॥ यस्याज्ञया वायवो वान्ति लोके ज्वलत्यग्निः सविता याति तप्यन्। शीतांशुः खे तारकासंग्रहश्च प्रवर्तते तं परेशं प्रपद्ये ॥६॥ यस्य श्वासात्सर्वधात्री धरित्री देवो वर्षत्यंबु कालः प्रमाता। मेरुर्म-

ध्ये भुवनानां च भर्ता तमीशानं विश्वरूपं नमामि ॥७॥
इति श्रीकल्किपुराणे कल्किकृतशिवस्तोत्रं संपूर्णम् ॥

६४. शिवस्तुतिः ।

श्रीगणेशाय नमः ॥ गले कलितकालिमः प्रकटितेंदुभालस्थले विनाटितजटोत्करं रुचिरपाणिपाथोरुहे । उदंचितकपालकं जघनसीम्नि संदर्शितद्विपाजिनमनुक्षणं किमपि धाम वंदामहे ॥ १ ॥ वृषोपरि परिस्फुरद्धवलधाम धाम श्रियां कुबेरगिरिगौरिमप्रभवगर्वनिर्वासि तत् । कचित्पुनरुमाकुचोपचितकुंकुमै रंजितं गजाजिनविराजितं वृजिनभंगबीजं भजे ॥ २ ॥ उदित्वरविलोचनत्रयविसृत्वरज्योतिषा कलाकरकलाकरव्यतिकरेण चाहर्निशम् । विकासितजटाटवीविहरणोत्सवप्रोल्लसत्तरामरतरंगिणीतरलचूडमीडे मृडम् ॥ ३ ॥ विहाय कमलालयाविलसितानि विद्युन्नटीविडंबनपटूनि मे विहरणं विधत्तां मनः । कपर्दिनि कुमुद्वतीरमणखंडचूडामणौ कटीतटपटीभवत्करटिचर्मणि ब्रह्मणि ॥ ४ ॥ भवद्भवनदेहलीविकटतुंडदंडाहतित्रुटन्मुकुटकोटिभिर्मघवदादिभिर्भूयते । व्रजेम भवदन्तिकं प्रकृतिमेत्य पैशाचिकीं किमित्यमरसंपदः प्रमथनाथ नाथामहे ॥५॥ त्वदर्चनपरायणप्रमथकन्यकालुंठितप्रसूनसफलद्रुमं कमपि शैलमाशास्महे । अलं तटवितर्दिकाशयितसिद्धिसीमंतिनीप्रकीर्णसुमनोमनोरमणमेरुणा-

मेरुणा ॥ ६ ॥ न जातु हर यातु मे विषयदुर्विलासं मनो मनोभवकथास्तु मे न च मनोरथातिथ्यभूः । स्फुरत्सुरतरंगिणीतटकुटीरकोटौ वसन्नये शिव दिवानिशं तव भवामि पूजापरः ॥ ७ ॥ विभूषण सुरापगाशुचितरालवालावलीवलद्बहलसीकरप्रकरसेकसंवर्धिता । महेश्वरसुरद्रुमस्फुरितसज्जटामंजरी नमज्जनफलप्रदा मम नु हंत भूयादियम् ॥८॥ बहिर्विषयसंगतिप्रतिनिवर्तिताक्षावलेः समाधिकलितात्मनः पशुपतेरशेषात्मनः । शिरः सुरसरित्तटीकुटिलकल्पकल्पद्रुमं निशाकरकलामहं बटुविमृश्यमानां भजे ॥ ९ ॥ त्वदीयसुरवाहिनीविमलवारिधारावलज्जटागहनगाहिनी मतिरियं मम क्रामतु । उपोत्तमसरित्तटीविटपिताटवीप्रोल्लसत्तपस्विपरिषत्तुलासमलमल्लिकाभ प्रभो १०

इति श्रीलंकेश्वरविरचिता शिवस्तुतिः समाप्ता ॥

६५. शंकराष्टकम् ।

श्रीगणेशाय नमः ॥ शीर्षजटागणभारं गरलाहारं समस्तसंहारम् । कैलासाद्रिविहारं पारं भववारिधेरहं वंदे ॥ १ ॥ चंद्रकलोज्ज्वलभालं कंठव्यालं जगत्त्रयीपालम् । कृतनरमस्तकमालं कालं कालस्य कोमलं वंदे ॥ २ ॥ कोपेक्षणहतकामं स्वात्मारामं नगेन्द्रजावामम् । संसृतिशोकविरामं श्यामं कंठेन कारणं वंदे ॥ ३ ॥ कटितटविलसितनागं खंडितयागं महाद्भुतत्यागम् । विगतविषय-

रसरागं भागं यज्ञेषु बिभ्रतं वंदे ॥ ४ ॥ त्रिपुरादिकदनुजांतं गिरिजाकांतं सदैव संशांतम्। लीलाविजितकृतांतं भांतं स्वांतेषु देहिनां वंदे ॥ ५ ॥ सुरसरिदाप्लुतकेशं त्रिदशकुलेशं हृदालयावेशम्। विगताशेषक्लेशं देशं सर्वेष्टसंपदां वंदे ॥ ६ ॥ करतलकलितपिनाकं विगतजराकं सुकर्मणां पाकम्। परपदवीतवराकं नाकंगमपूगवंदितं वंदे ॥ ७ ॥ भूतिविभूषितकायं दुस्तरमायं विवर्जितापायम्। प्रमथसमूहसहायं सायं प्रातर्निरंतरं वंदे ॥ ८ ॥ यस्तु पदाष्टकमेतद्ब्रह्मानंदेन निर्मितं नित्यम्। पठति समाहितचेताः प्राप्नोत्यंते स शैवमेव पदम् ॥ ९ ॥ इति श्रीमत्परमहंसस्वामिब्रह्मानंदविरचितं श्रीशंकराष्टकं संपूर्णम् ॥

६६. शिवरक्षास्तोत्रम्।

श्रीगणेशाय नमः ॥ अस्य श्रीशिवरक्षास्तोत्रमंत्रस्य याज्ञवल्क्य ऋषिः। श्रीसदाशिवो देवता। अनुष्टुप् छंदः। श्रीसदाशिवप्रीत्यर्थं शिवरक्षास्तोत्रजपे विनियोगः। चरितं देवदेवस्य महादेवस्य पावनम्। अपारं परमोदारं चतुर्वर्गस्य साधनम् ॥ १ ॥ गौरीविनायकोपेतं पंचवक्त्रं त्रिनेत्रकम्। शिवं ध्यात्वा दशभुजं शिवरक्षां पठेन्नरः ॥२॥ गंगाधरः शिरः पातु भालमर्धेन्दुशेखरः। नयने मदनध्वंसी कर्णौ सर्पविभूषणः ॥ ३ ॥ घ्राणं पातु पुरारातिर्मुखं पातु जगत्पतिः। जिह्वां वागीश्वरः पातु

कंधरं शितिकंधरः ॥ ४ ॥ श्रीकंठः पातु मे कंठं स्कंधौ विश्वधुरंधरः । भुजौ भूभारसंहर्ता करौ पातु पिनाकधृक् ॥५॥ हृदयं शंकरः पातु जठरं गिरिजापतिः । नाभिं मृत्युंजयः पातु कटी व्याघ्राजिनांबरः ॥ ६ ॥ सक्थिनी पातु दीनार्तशरणागतवत्सलः । ऊरू महेश्वरः पातु जानुनी जगदीश्वरः ॥७॥ जंघे पातु जगत्कर्ता गुल्फौ पातु गणाधिपः । चरणौ करुणासिंधुः सर्वांगानि सदाशिवः ॥ ८ ॥ एतां शिवबलोपेतां रक्षां यः सुकृती पठेत् । स भुक्त्वा सकलान्कामान् शिवसायुज्यमाप्नुयात् ॥९॥ ग्रहभूतपिशाचाद्यास्त्रैलोक्ये विचरंति ये । दूरादाशु पलायंते शिवनामाभिरक्षणात् ॥ १० ॥ अभयंकरनामेदं कवचं पार्वतीपतेः । भक्त्या बिभर्ति यः कंठे तस्य वश्यं जगत्त्रयम् ॥ ११ ॥ इमां नारायणः स्वप्ने शिवरक्षां यथादिशत् । प्रातरुत्थाय योगींद्रो याज्ञवल्क्यस्तथाऽलिखत् ॥ १२ ॥ इति श्रीयाज्ञवल्क्यप्रोक्तं शिवरक्षास्तोत्रं संपूर्णम् ॥

सूर्यस्तोत्राणि ।

किं छत्रं किं नु रत्नं तिलकमुत तथा कुंडलं कौस्तुभो वा
चक्रं वा वारिजं वेत्यमरयुवतिभिर्यद्बलिद्वेपिदेहे ।
ऊर्ध्वं मौलौ ललाटे श्रवसि हृदि करे नाभिदेशे च दृष्टं
पायात्तद्वोऽर्कबिंबं स च दनुजरिपुर्वर्धमानः क्रमेण ॥

सूर्यस्तोत्राणि ।

६७. सूर्यकवचम् ।

श्रीगणेशाय नमः ॥ श्रीसूर्य उवाच । सांब सांब महाबाहो शृणु मे कवचं शुभम् । त्रैलोक्यमंगलं नाम कवचं परमाद्भुतम् ॥ १ ॥ यज्ज्ञात्वा मंत्रवित्सम्यक् फलं प्राप्नोति निश्चितम् । यद्धृत्वा च महादेवो गणानामधिपोऽभवत् ॥ २ ॥ पठनाद्धारणाद्विष्णुः सर्वेषां पालकः सदा । एवमिंद्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः ॥ ३ ॥ कवचस्य ऋषिर्ब्रह्मा छंदोनुष्टुबुदाहृतः । श्रीसूर्यो देवता चात्र सर्वदेवनमस्कृतः ॥ ४ ॥ यशआरोग्यमोक्षेषु विनियोगः प्रकीर्तितः । प्रणवो मे शिरः पातु घृणिर्मे पातु भालकम् ॥५॥ सूर्योऽव्यान्नयनद्वंद्वमादित्यः कर्णयुग्मकम् । अष्टाक्षरो महामंत्रः सर्वाभीष्टफलप्रदः ॥ ६ ॥ बीजं मम मुखं पातु हृदयं भुवनेश्वरी । चंद्रबिंबं विंशदाद्यः पातु मे गुह्यदेशकम् ॥ ७ ॥ अक्षरोऽसौ महामंत्रः सर्वतंत्रेषु गोपितः । शिवो वह्निसमायुक्तो वामाक्षीबिंदुभूषितः । एकाक्षरो महामंत्रः श्रीसूर्यस्य प्रकीर्तितः ॥ ८ ॥ गुह्याद्गुह्यतरो मंत्रो वांछाचिंतामणिः स्मृतः । शीर्षादिपादपर्यंतं सदा पातु मनूत्तमः ॥ ९ ॥ इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभम् । श्रीप्रदं कांतिदं नित्यं धनारोग्यविवर्धनम् ॥ १० ॥ कुष्ठादिरोगशमनं महाव्याधिविनाशनम् । त्रिसंध्यं यः

पठेन्नित्यमरोगी बलवान्भवेत् ॥ ११ ॥ बहुना किमिहोक्तेन यद्यन्मनसि वर्तते । तत्तत्सर्वं भवेत्तस्य कवचस्य च धारणात् ॥ १२ ॥ भूतप्रेतपिशाचाश्च यक्षगंधर्वराक्षसाः । ब्रह्मराक्षसवेताला न द्रष्टुमपि तं क्षमाः ॥ १३ ॥ दूरादेव पलायंते तस्य संकीर्तनादपि ॥ १४ ॥ भूर्जपत्रे समालिख्य रोचनागुरुकुंकुमैः । रविवारे च संक्रांत्यां सप्तम्यां च विशेषतः । धारयेत्साधकश्रेष्ठः श्रीसूर्यस्य प्रियो भवेत् ॥ १५ ॥ त्रिलोहमध्यगं कृत्वा धारयेद्दक्षिणे करे । शिखायामथवा कंठे सोऽपि सूर्यो न संशयः ॥१६॥ इति ते कथितं सांब त्रैलोक्यमंगलाभिधम् । कवचं दुर्लभं लोके तव स्नेहात्प्रकाशितम् ॥ १७ ॥ अज्ञात्वा कवचं दिव्यं यो जपेत्सूर्यमुत्तमम् । सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ॥ १८ ॥ इति श्रीब्रह्मयामले त्रैलोक्यमंगलं नाम सूर्यकवचं संपूर्णम् ॥

६८. सूर्यकवचस्तोत्रम् ।

श्रीगणेशाय नमः ॥ याज्ञवल्क्य उवाच । श्रृणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम् । शरीरारोग्यदं दिव्यं सर्वसौभाग्यदायकम् ॥ १ ॥ देदीप्यमानमुकुटं स्फुरन्मकरकुंडलम् । ध्यात्वा सहस्रकिरणं स्तोत्रमेतदुदीरयेत् ॥२॥ शिरो मे भास्करः पातु ललाटं मेऽमितद्युतिः । नेत्रे दिनमणिः पातु श्रवणे वासरेश्वरः ॥३॥ घ्राणं घर्मघृणिः पातु

वदनं वेदवाहनः । जिह्वां मे मानदः पातु कंठं मे सुरवं-
दितः ॥ ४ ॥ स्कंधौ प्रभाकरः पातु वक्षः पातु जनप्रियः ।
पातु पादौ द्वादशात्मा सर्वांगं सकलेश्वरः ॥ ५ ॥ सूर्यर-
क्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके । दधाति यः करे
... य वशगाः सर्वसिद्धयः ॥ ६ ॥ सु... ज...
... ...मानसः । स रो... ...युः
... ...चिर

यदा यदाहि धर्मस्य
ग्लानि र्भवति भारत
अभ्युत्थानम धर्मस्य
तदात्मानं सृजाम्यहम
विष्णु

षदनं वेदवाहनः। जिह्वां मे मानदः पातु कंठं मे सुरवंदितः ॥ ४ ॥ स्कंधौ प्रभाकरः पातु वक्षः पातु जनप्रियः। पातु पादौ द्वादशात्मा सर्वांगं सकलेश्वरः ॥ ५ ॥ सूर्यरक्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके। दधाति यः करे तस्य वशगाः सर्वसिद्धयः ॥ ६ ॥ सुस्नातो यो जपेत्सम्यग्योऽधीते स्वस्थमानसः। स रोगमुक्तो दीर्घायुः सुखं पुष्टिं च विंदति ॥ ७ ॥ इति श्रीमद्याज्ञवल्क्यविरचितं सूर्यकवचस्तोत्रं संपूर्णम् ॥

६९. आदित्यहृदयम्।

श्रीगणेशाय नमः ॥ शतानीक उवाच। कथमादित्यमुद्यंतमुपतिष्ठेद्द्विजोत्तम। एतन्मे ब्रूहि विप्रेंद्र प्रपद्ये शरणं तव ॥ १ ॥ सुमंतुरुवाच। इदमेव पुरा पृष्टः शंखचक्रगदाधरः। प्रणम्य शिरसा देवमर्जुनेन महात्मना ॥ २ ॥ कुरुक्षेत्रे महाराज प्रवृत्ते भारते रणे। कृष्णनाथं समासाद्य प्रार्थयित्वाब्रवीदिदम् ॥ ३ ॥ अर्जुन उवाच। ज्ञानं च धर्मशास्त्राणां गुह्याद्गुह्यतरं तथा। मया कृष्ण परिज्ञातं वाङ्मयं सचराचरम् ॥ ४ ॥ सूर्यस्तुतिमयं न्यासं वक्तुमर्हसि माधव। भक्त्या पृच्छामि देवेश कथयस्व प्रसादतः ॥५॥ सूर्यभक्तिं करिष्यामि कथं सूर्यं प्रपूजयेत्। तदहं श्रोतुमिच्छामि त्वत्प्रसादेन यादव ॥ ६ ॥ श्रीभगवानुवाच। रुद्रादिदैवतैः सर्वैः पृष्टेन कथितं मया।

वक्ष्येऽहं सूर्यविन्यासं शृणु पांडव यत्नतः ॥ ७ ॥ अस्माकं यत्त्वया पृष्टमेकचित्तो भवार्जुन । तदहं संप्रवक्ष्यामि आदिमध्यावसानकम् ॥ ८ ॥ अर्जुन उवाच । नारायण सुरश्रेष्ठ पृच्छामि त्वां महायशाः । कथमादित्यमुद्यंतमुपतिष्ठेत्सनातनम् ॥ ९ ॥ श्रीभगवानुवाच । साधु पार्थ महाबाहो बुद्धिमानसि पांडव । यन्मां पृच्छस्युपस्थानं तत्पवित्रं विभावसोः ॥ १० ॥ सर्वमंगलमांगल्यं सर्वपापप्रणाशनम् । सर्वरोगप्रशमनमायुर्वर्धनमुत्तमम् ॥ ११ ॥ अमित्रदमनं पार्थ संग्रामे जयवर्धनम् । वर्धनं धनपुत्राणामादित्यहृदयं शृणु ॥ १२ ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः । त्रिषु लोकेषु विख्यातं निःश्रेयसकरं परम् ॥ १३ ॥ देवदेवं नमस्कृत्य प्रातरुत्थाय चार्जुन । विघ्नान्यनेकरूपाणि नश्यंति स्मरणादपि ॥ १४ ॥ तस्मात्सर्वप्रयत्नेन सूर्यमावाहयेत्सदा । आदित्यहृदयं नित्यं जाप्यं तच्छृणु पांडव ॥ १५ ॥ यज्जपान्मुच्यते जंतुर्दारिद्र्यादाशु दुस्तरात् । लभते च महासिद्धिं कुष्ठव्याधिविनाशिनीम् ॥ १६ ॥ अस्मिन्मंत्रे ऋषिश्छंदो देवता शक्तिरेव च । सर्वमेव महाबाहो कथयामि तवाग्रतः ॥ १७ ॥ मया ते गोपितं न्यासं सर्वशास्त्रप्रबोधितम् । अथ ते कथयिष्यामि उत्तमं मंत्रमेव च ॥ १८ ॥ ॐअस्य श्रीआदित्यहृदयस्तोत्रमंत्रस्य । श्रीकृष्ण ऋषिः । श्रीसूर्यात्मा त्रिभुवनेश्वरो देवता । अनुष्टुप् छंदः ।

हरितहयरथं दिवाकरं घृणिरिति बीजम्। ॐनमो भगवते जितवैश्वानरजातवेदस इति शक्तिः। ॐनमो भगवते आदित्याय नम इति कीलकम्। ॐअग्निगर्भदेवता इति मंत्रः। ॐनमो भगवते तुभ्यमादित्याय नमोनमः। श्रीसूर्यनारायणप्रीत्यर्थं जपे विनियोगः। अथ न्यासः। ॐह्रां अंगुष्ठाभ्यां नमः। ॐह्रीं तर्जनीभ्यां नमः। ॐह्रूं मध्यमाभ्यां नमः। ॐह्रैं अनामिकाभ्यां नमः। ॐह्रौं कनिष्ठिकाभ्यां नमः। ॐह्रः करतलकरपृष्ठाभ्यां नमः। ॐह्रां हृदयाय नमः। ॐह्रीं शिरसे स्वाहा। ॐह्रूं शिखायै वषट्। ॐह्रैं कवचाय हुम्। ॐह्रौं नेत्रत्रयाय वौषट्। ॐह्रः अस्त्राय फट्। ॐह्रांह्रीह्रूंह्रैंह्रौंह्रः इति दिग्बंधः। अथ ध्यानम्। भास्वद्रत्नाढ्यमौलिः स्फुरदधररुचा रंजितश्चारुकेशो भास्वान्यो दिव्यतेजाः करकमलयुतः स्वर्णवर्णः प्रभाभिः। विश्वाकाशावकाशग्रहपतिशिखरे भाति यश्चोदयाद्रौ सर्वानंदप्रदाता हरिहरनमितः पातु मां विश्वचक्षुः॥ १॥ पूर्वमष्टदलं पद्मं प्रणवादिप्रतिष्ठितम्। मायाबीजं दलाष्टाग्रे यंत्रमुद्धारयेदिति॥ २॥ आदित्यं भास्करं भानुं रविं सूर्यं दिवाकरम्। मार्तंडं तपनं चेति दलेष्वष्टसु योजयेत्॥ ३॥ दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा। अमोघा विद्युता चेति मध्ये श्रीः सर्वतोमुखी॥ ४॥ सर्वज्ञः सर्वगश्चैव सर्वकारणदेव-

ता। सर्वेशं सर्वहृदयं नमामि सर्वसाक्षिणम् ॥ ५ ॥
सर्वात्मा सर्वकर्ता च सृष्टिजीवनपालकः। हितः स्वर्गापव-
र्गस्य भास्करेश नमोस्तु ते ॥६॥ इति प्रार्थना। नमो न-
मस्तेऽस्तु सदा विभावसो सर्वात्मने सप्तहयाय भानवे।
अनंतशक्तिर्मणिभूषणेन ददस्व भुक्तिं मम मुक्तिमव्ययाम्
॥ ७ ॥ अर्कं तु मूर्ध्नि विन्यस्य ललाटे च रविं न्यसेत्। वि-
न्यसेन्नेत्रयोः सूर्यं कर्णयोश्च दिवाकरम् ॥ ८ ॥ नासिकायां
न्यसेद्भानुं मुखे वै भास्करं न्यसेत्। पर्जन्यमोष्ठयोश्चैव
तीक्ष्णं जिह्वांतरे न्यसेत् ॥ ९ ॥ सुवर्णरेतसं कंठे स्कंधयो-
स्तिग्मतेजसम्। बाह्वोस्तु पूषणं चैव मित्रं वै पृष्ठतो न्य-
सेत् ॥ १० ॥ वरुणं दक्षिणे हस्ते त्वष्टारं वामतः करे।
हस्तावुष्णकरः पातु हृदयं पातु भानुमान् ॥ ११ ॥ उदरे
तु यमं विद्यादादित्यं नाभिमंडले। कट्यां तु विन्यसेद्धंसं
रुद्रमूर्वोस्तु विन्यसेत् ॥ १२ ॥ जान्वोस्तु गोपतिं न्यस्य
सवितारं तु जंघयोः। पादयोश्च विवस्वंतं गुल्फयोश्च
दिवाकरम् ॥ १३ ॥ बाह्यतस्तु तमोध्वंसं भयमभ्यंतरे न्य-
सेत्। सर्वांगेषु सहस्रांशुं दिग्विदिक्षु भगं न्यसेत् ॥ १४ ॥
इति दिग्बंधः। एष आदित्यविन्यासो देवानामपि दुर्लभः।
इमं भक्त्या न्यसेत्पार्थ स याति परमां गतिम् ॥ १५ ॥
कामक्रोधकृतात्पापान्मुच्यते नात्र संशयः। सर्पादपि
भयं नैव संग्रामेषु पथिष्वपि ॥ १६ ॥ रिपुसंघट्टकालेषु

तथा चोरसमागमे। त्रिसंध्यं जपतो न्यासं महापातकनाशनम् ॥ १७ ॥ विस्फोटकसमुत्पन्नं तीव्रज्वरसमुद्भवम्। शिरोरोगं नेत्ररोगं सर्वव्याधिविनाशनम् ॥ १८ ॥ कुष्ठव्याधिस्तथा दद्रूरोगाश्च विविधाश्च ये। जपमानस्य नश्यंति शृणु भक्त्या तदर्जुन ॥ १९ ॥ आदित्यो मंत्रसंयुक्त आदित्यो भुवनेश्वरः। आदित्यान्नापरो देवो ह्यादित्यः परमेश्वरः ॥ २० ॥ आदित्यमर्चयेद्ब्रह्मा शिव आदित्यमर्चयेत्। यदादित्यमयं तेजो मम तेजस्तदर्जुन ॥२१॥ आदित्यं मंत्रसंयुक्तमादित्य भुवनेश्वरम्। आदित्यं ये प्रपश्यंति मां पश्यन्ति न संशयः ॥ २२ ॥ त्रिसंध्यमर्चयेत्सूर्यं स्मरेद्भक्त्या तु यो नरः। न स पश्यति दारिद्र्यं जन्मजन्मनि चार्जुन ॥ २३ ॥ एतत्ते कथितं पार्थ आदित्यहृदयं मया। शृण्वन्मुक्तश्च पापेभ्यः सूर्यलोके महीयते ॥२४॥ नमो भगवते तुभ्यमादित्याय नमो नमः। आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ॥ २५ ॥ सुवर्णः स्फटिको भानुः स्फुरितो विश्वतापनः। रविर्विश्वो महातेजाः सुवर्णः सुप्रबोधकः ॥ २६ ॥ हिरण्यगर्भस्त्रिशिरास्तपनो भास्करो रविः। मार्तंडो गोपतिः श्रीमान् कृतज्ञश्च प्रतापवान् ॥ २७ ॥ तमिस्रहा भगो हंसो नासत्यश्च तमोनुदः। शुद्धो विरोचनः केशी सहस्रांशुर्महाप्रभुः ॥२८॥ विवस्वान्पूषणो मृत्युर्मिहिरो जामदग्न्यजित्। घ-

र्मरश्मिः पतंगश्च शरण्योऽमित्रहा तपः ॥ २९ ॥ दुर्विज्ञे-यगतिः शूरस्तेजोराशिर्महायशाः । शंभुश्चित्रांगदः सौम्यो हव्यकव्यप्रदायकः ॥ ३० ॥ अंशुमानुत्तमो देव ऋ-ग्यजुः साम एव च । हरिदश्वस्तमोदारः सप्तसप्तिर्मरी-चिमान् ॥ ३१ ॥ अग्निगर्भोऽदितेः पुत्रः शंभुस्तिमिरना-शनः । पूषा विश्वंभरो मित्रः सुवर्णः सुप्रतापवान् ॥३२॥ आतपी मंडली भास्वांस्तपनः सर्वतापनः । कृतविश्वो म-हातेजाः सर्वरत्नमयोद्भवः ॥ ३३ ॥ अक्षरश्च क्षरश्चैव प्रभाकरविभाकरौ । चंद्रचंद्रांगदः सौम्यो हव्यकव्यप्रदाय-कः ॥ ३४ ॥ अंगारकी गदोऽगस्ती रक्तांगश्चांगवर्धनः । बुधो बुद्धासनो बुद्धिर्बुद्धात्मा बुद्धिवर्धनः ॥ ३५ ॥ बृह-द्भानुर्बृहद्भासी बृहद्धामा बृहस्पतिः । शुक्रस्त्वं शुक्ररेता-स्त्वं शुक्रांगः शुक्रभूषणः ॥ ३६ ॥ शनिमान् शनिरूप-स्त्वं शनैर्गच्छसि सर्वदा । अनादिरादिरादित्यस्तेजोराशि-र्महातपाः ॥ ३७ ॥ अनादिरादिरूपस्त्वमादित्यो दिक्पति-र्यमः । भानुमान् भानुरूपस्त्वं स्वर्भानुर्भानुदीप्तिमान् ॥ ३८ ॥ धूमकेतुर्महाकेतुः सर्वकेतुरनुत्तमः । तिमिरावर-णः शंभुः स्रष्टा मार्तंड एव च ॥३९॥ नमः पूर्वाय गिरये पश्चिमाय नमो नमः । नमोत्तराय गिरये दक्षिणाय नमो नमः ॥४०॥ नमो नमः सहस्रांशो ह्यादित्याय नमो नमः । नमः पद्मप्रबोधाय नमस्ते द्वादशात्मने ॥ ४१ ॥ नमो वि-

अप्रबोधाय नमो भ्राजिष्णुजिष्णवे । ज्योतिषे च नमस्तुभ्यं ज्ञानार्काय नमो नमः ॥४२॥ प्रदीप्ताय प्रगल्भाय युगांताय नमो नमः । नमस्ते होतृपतये पृथिवीपतये नमः ॥ ४३ ॥ नमोंकार वषट्कार सर्वयज्ञ नमोऽस्तु ते । ऋग्वेदाय यजुर्वेद सामवेद नमोऽस्तु ते ॥ ४४ ॥ नमो हाटकवर्णाय भास्कराय नमो नमः । जयाय जयभद्राय हरिदश्वाय ते नमः ॥४५॥ दिव्याय दिव्यरूपाय ग्रहाणां पतये नमः । नमस्ते शुचये नित्यं नमः कुरुकुलात्मने ॥ ४६ ॥ नमस्त्रैलोक्यनाथाय भूतानां पतये नमः । नमः कैवल्यनाथाय नमस्ते दिव्यचक्षुषे ॥ ४७ ॥ त्वं ज्योतिस्त्वं द्युतिर्ब्रह्मा त्वं विष्णुस्त्वं प्रजापतिः । त्वमेव रुद्रो रुद्रात्मा वायुरग्निस्त्वमेव च ॥४८॥ योजनानां सहस्रे द्वे शते द्वे द्वे च योजने । एकेन निमिषार्धेन क्रममाण नमोऽस्तु ते ॥ ४९ ॥ नवयोजनलक्षाणि सहस्रद्विशतानि च । यावद्घटीप्रमाणेन क्रममाण नमोऽस्तु ते ॥५०॥ अग्रतश्च नमस्तुभ्यं पृष्ठतश्च सदा नमः । पार्श्वतश्च नमस्तुभ्यं नमस्ते चास्तु सर्वदा ॥ ५१ ॥ नमः सुरारिहंत्रे च सोमसूर्याग्निचक्षुषे । नमो दिव्याय व्योमाय सर्वतंत्रमयाय च ॥ ५२ ॥ नमो वेदांतवेद्याय सर्वकर्मादिसाक्षिणे । नमो हरितवर्णाय सुवर्णाय नमो नमः ॥ ५३ ॥ अरुणो माघमासे तु सूर्यो वै फाल्गुने तथा । चैत्रमासे तु वेदांगो भानुर्वैशाखतापनः ॥ ५४ ॥ ज्येष्ठ-

मासे तपेदिंद्र आषाढे तपते रविः । गभस्तिः श्रावणे मासि यमो भाद्रपदे तथा ॥ ५५ ॥ इषे सुवर्णरेताश्च कार्तिके च दिवाकरः । मार्गशीर्षे तपेन्मित्रः पौषे विष्णुः सनातनः ॥ ५६ ॥ पुरुषस्त्वधिके मासि मासाधिक्ये तु कल्पयेत् । इत्येते द्वादशादित्याः काश्यपेयाः प्रकीर्तिताः ॥ ५७ ॥ उग्ररूपा महात्मानस्तपंते विश्वरूपिणः । धर्मार्थकाममोक्षाणां प्रस्फुटा हेतवो नृप ॥ ५८ ॥ सर्वपापहरं चैवमादित्यं संप्रपूजयेत् । एकधा दशधा चैव शतधा च सहस्रधा ॥ ५९ ॥ तपंते विश्वरूपेण सृजंति संहरंति च । एष विष्णुः शिवश्चैव ब्रह्मा चैव प्रजापतिः ॥६०॥ महेंद्रश्चैव कालश्च यमो वरुण एव च । नक्षत्रग्रहताराणामधिपो विश्वतापनः ॥ ६१ ॥ वायुरग्निर्धनाध्यक्षो भूतकर्ता स्वयं प्रभुः । एष देवो हि देवानां सर्वमाप्यायते जगत् ॥ ६२ ॥ एष कर्ता हि भूतानां संहर्ता रक्षकस्तथा । एष लोकानुलोकाश्च सप्तद्वीपाश्च सागराः ॥ ६३ ॥ एष पातालसप्तस्था दैत्यदानवराक्षसाः । एष धाता विधाता च बीजं क्षेत्रं प्रजापतिः ॥ ६४ ॥ एक एव प्रजा नित्यं संवर्धयति रश्मिभिः । एष यज्ञः स्वधा स्वाहा ह्रीः श्रीश्च पुरुषोत्तमः ॥ ६५ ॥ एष भूतात्मको देवः सूक्ष्मोऽव्यक्तः सनातनः । ईश्वरः सर्वभूतानां परमेष्ठी प्रजापतिः ॥ ६६॥ कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः । जन्मसृ-

स्युजराव्याधिसंसारभयनाशनः ॥ ६७ ॥ दारिद्र्यव्यसन-ध्वंसी श्रीमान्देवो दिवाकरः। कीर्तनीयो विवस्वांश्च मार्तंडो भास्करो रविः ॥ ६८ ॥ लोकप्रकाशकः श्रीमांल्लोकचक्षुर्ग्रहेश्वरः। लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमिस्रहा ॥६९॥ तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः। गभस्तिहस्तो ब्रह्मण्यः सर्वदेवनमस्कृतः ॥ ७० ॥ आयुरारोग्यमैश्वर्यं नरा नार्यश्च मंदिरे। यस्य प्रसादात्संतुष्टिरादित्यहृदयं जपेत् ॥ ७१ ॥ इत्येतैर्नामभिः पार्थ आदित्यं स्तौति नित्यशः। प्रातरुत्थाय कौंतेय तस्य रोगभयं नहि ॥ ७२ ॥ पातकान्मुच्यते पार्थ व्याधिभ्यश्च न संशयः। एकसंध्यं द्विसंध्यं वा सर्वपापैः प्रमुच्यते ॥ ७३ ॥ त्रिसंध्यं जपमानस्तु पश्येच्च परमं पदम्। यदह्नात्कुरुते पापं तदह्नात्प्रतिमुच्यते ॥ ७४ ॥ यद्रात्र्यात्कुरुते पापं तद्रात्र्यात्प्रतिमुच्यते। दद्रुस्फोटककुष्ठानि मंडलानि विषूचिका ॥ ७५ ॥ सर्वव्याधिमहारोगभूतबाधास्तथैव च। डाकिनी शाकिनी चैव महारोगभयं कुतः ॥ ७६ ॥ ये चान्ये दुष्टरोगाश्च ज्वरातीसारकादयः। जपमानस्य नश्यंति जीवेच्च शरदां शतम् ॥ ७७ ॥ अशीर्षां पश्यति च्छायामहोरात्रं धनंजय। संवत्सरेण मरणं तदा तस्य ध्रुवं भवेत्। तथापि पठनादस्य मृतिभीर्नहि जायते ॥ ७८ ॥ यस्त्विदं पठते भक्त्या भानोर्वारे महात्मनः। प्रातःस्नाने कृते पार्थ एकाग्रकृतमानसः ॥ ७९ ॥ सुवर्ण-

चक्षुर्भवति न चांधस्तु प्रजायते । पुत्रबान्धवसंपन्नो जायते चारुजः सुखी ॥८०॥ सर्वसिद्धिमवाप्नोति सर्वत्र विजयी भवेत् । आदित्यहृदयं पुण्यं सूर्यनामविभूषितम् ॥ ८१ ॥ श्रुत्वा च निखिलं पार्थ सर्वपापैः प्रमुच्यते । अतः परतरं नास्ति सिद्धिकामस्य पांडव ॥ ८२ ॥ एतज्जपस्य कौंतेय येन श्रेयो ह्यवाप्स्यसि । आदित्यहृदयं नित्यं यः पठेत्सुसमाहितः ॥८३॥ भ्रूणहा मुच्यते पापात्कृतघ्नो ब्रह्मघातकः । गोघ्नः सुरापो दुर्भोजी दुष्प्रतिग्रहकारकः ॥ ८४ ॥ पातकानि च सर्वाणि दहत्येव न संशयः । य इदं शृणुयान्नित्यं जपेद्वापि समाहितः ॥ ८५ ॥ सर्वपापविशुद्धात्मा सूर्यलोके महीयते । अपुत्रो लभते पुत्रान्निर्धनो धनमाप्नुयात् ॥ ८६ ॥ कुरोगी मुच्यते रोगाद्भक्त्या यः पठते सदा । यस्त्वादित्यदिने पार्थ नाभिमात्रजले स्थितः ॥८७॥ उदयाचलमारूढं भास्करं प्रणतः स्थितः । जपते मानवो भक्त्या शृणुयाद्वापि भक्तितः ॥ ८८ ॥ स याति परमं स्थानं यत्र देवो दिवाकरः । अमित्रदमनं पार्थ यदा कर्तुं समारभेत् ॥ ८९ ॥ तदा प्रतिकृतिं कृत्वा शत्रोश्चरणपांसुभिः । आक्रम्य वामपादेन ह्यादित्यहृदयं जपेत् ॥ ९० ॥ एतन्मंत्रं समाहूय सर्वसिद्धिकरं परम् । ॐ ह्रीं हिमालीढं स्वाहा । ॐ ह्रीं निलीढं स्वाहा । ॐ ह्रीं आलीढं स्वाहा । इति मंत्रः । त्रिभिश्च रोगी भवति

ज्वरी भवति पंचभिः । जपैस्तु सप्तभिः पार्थ राक्षसीं तनुमाविशेत् ॥ ९१ ॥ राक्षसेनाभिभूतस्य विकारान् शृणु पांडव । गीयते नृत्यते नग्न आस्फोटयति धावति ॥९२॥ शिवारुतं च कुरुते हसते क्रंदते पुनः । एवं संपीड्यते पार्थ यद्यपि स्यान्महेश्वरः ॥ ९३ ॥ किं पुनर्मानुषः कश्चिच्छौचाचारविवर्जितः । पीडितस्य न संदेहो ज्वरो भवति दारुणः ॥ ९४ ॥ यदा चानुग्रहं तस्य कर्तुमिच्छेच्छुभंकरम् । तदा सलिलमादाय जपेन्मंत्रमिमं बुधः ॥ ९५ ॥ नमो भगवते तुभ्यमादित्याय नमो नमः । जयाय जयभद्राय हरिदश्वाय ते नमः ॥ ९६ ॥ स्नापयेत्तेन मंत्रेण शुभं भवति नान्यथा । अन्यथा च भवेद्दोषो नश्यते नात्र संशयः ॥ ९७ ॥ अतस्ते निखिलः प्रोक्तः पूजां चैव निबोध मे । उपलिप्ते शुचौ देशे नियतो वाग्यतः शुचिः ॥ ९८ ॥ वृत्तं वा चतुरस्रं वा लिप्तभूमौ लिखेच्छुचि । त्रिधा तत्र लिखेत्पद्ममष्टपत्रं सकर्णिकम् ॥ ९९ ॥ अष्टपत्रं लिखेत्पद्मं लिप्तगोमयमंडले । पूर्वपत्रे लिखेत् सूर्यमाग्नेय्यां तु रविं न्यसेत् ॥ १०० ॥ याम्यायां च विवस्वंतं नैर्ऋत्यां तु भगं न्यसेत् । प्रतीच्यां वरुणं विद्याद्वायव्यां मित्रमेव च ॥ १ ॥ आदित्यमुत्तरे पत्रे ईशान्यां मित्रमेव च । मध्ये तु भास्करं विद्यात्क्रमेणैवं समर्चयेत् ॥ २ ॥ अतः परतरं नास्ति सिद्धिकामस्य पांडव । महातेजः

समुद्यंतं प्रणमेत्स कृतांजलिः ॥ ३ ॥ सकेसराणि पद्मानि करवीराणि चार्जुन । तिलतंडुलयुक्तानि कुशगंधोदकानि च ॥ ४ ॥ रक्तचंदनमिश्राणि कृत्वा वै ताम्रभाजने । धृत्वा शिरसि तत्पात्रं जानुभ्यां धरणीं स्पृशेत् ॥ ५ ॥ मंत्रपूतं गुडाकेश चार्घ्यं दद्याद्गभस्तये । सायुधं सरथं चैव सूर्यमावाहयाम्यहम् ॥ ६ ॥ स्वागतो भव । सुप्रतिष्ठितो भव । संनिधो भव । संनिहितो भव । संमुखो भव । इति पंचमुद्राः । स्फुटयित्वाऽर्हयेत्सूर्यं भुक्तिं मुक्तिं लभेन्नरः ॥ ७ ॥ ॐश्रीं विद्याकिलिकिलिकटकेष्टसर्वार्थसाधनाय स्वाहा । ॐश्रीं ह्रीं हूं हंसः सूर्याय नमः स्वाहा । ॐ श्रीं ह्रां ह्रीं हूं ह्रः सूर्यमूर्तये स्वाहा । ॐ श्रीं ह्रीं खं खः लोकाय सर्वमूर्तये स्वाहा । ॐ हूं मार्तंडाय स्वाहा । नमोऽस्तु सूर्याय सहस्रभानवे नमोस्तु वैश्वानरजातवेदसे । त्वमेव चार्घ्यं प्रतिगृह्ण देव देवाधिदेवाय नमो नमस्ते ॥ ८ ॥ नमो भगवते तुभ्यं नमस्ते जातवेदसे । दत्तमर्घ्यं मया भानो त्वं गृहाण नमोस्तु ते ॥९॥ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते । अनुकंपय मां देव गृहाणार्घ्यं नमोस्तु ते ॥ १० ॥ नमो भगवते तुभ्यं नमस्ते जातवेदसे । ममेदमर्घ्यं गृह्ण त्वं देवदेव नमोऽस्तु ते ॥ ११ ॥ सर्वदेवाधिदेवाय आधिव्याधिविनाशिने । इदं गृहाण मे देव सर्वव्याधिर्विनश्यतु ॥ १२ ॥

नमः सूर्याय शांताय सर्वरोगविनाशिने । ममेप्सितं फलं दत्वा प्रसीद परमेश्वर ॥ १३ ॥ ॐनमो भगवते सूर्याय स्वाहा । ॐशिवाय स्वाहा । ॐसर्वात्मने सूर्याय नमः स्वाहा । ॐअक्षय्यतेजसे नमः स्वाहा । सर्वसंकट-दारिद्र्यं शत्रुं नाशय नाशय । सर्वलोकेषु विश्वात्मन्सर्वात्मन् सर्वदर्शक ॥१४॥ नमो भगवते सूर्य कुष्ठरोगान्वि-खंडय । आयुरारोग्यमैश्वर्यं देहि देव नमोस्तु ते ॥ १५ ॥ नमो भगवते तुभ्यमादित्याय नमो नमः । ॐअक्षय्यतेजसे नमः । ॐसूर्याय नमः । ॐविश्वमूर्तये नमः । आदित्यं च शिवं विद्याच्छिवमादित्यरूपिणम् । उभयोरंतरं नास्ति आदित्यस्य शिवस्य च ॥ १६ ॥ एतदिच्छाम्यहं श्रोतुं पुरुषो वै दिवाकरः । उदये ब्रह्मणो रूपं मध्याह्ने तु महेश्वरः ॥ १७ ॥ अस्तमाने स्वयं विष्णुस्त्रिमूर्तिश्च दिवाकरः । नमो भगवते तुभ्यं विष्णवे प्रभविष्णवे ॥ १८ ॥ ममे-दमर्घ्यं प्रतिगृह्ण देव देवाधिदेवाय नमो नमस्ते । श्रीसू-र्यनारायणाय सांगाय सपरिवाराय इदमर्घ्यं समर्पयामि ॥१९॥ हिमघ्नाय तमोघ्नाय रक्षोघ्नाय च ते नमः । कृता-घघ्नाय सत्याय तस्मै सूर्यात्मने नमः ॥ १२० ॥ जयोऽज-यश्च विजयो जितप्राणो जितश्रमः । मनोजवो जितक्रोधो वाजिनः सप्त कीर्तिताः ॥ २१ ॥ हरितहयरथं दिवाकरं कनकमयांबुजरेणुपिंजरम् । प्रतिदिनमुदये नवं नवं शर-

णमुपैमि हिरण्यरेतसम् ॥ २२ ॥ न तं व्यालाः प्रबाधंते न व्याधिभ्यो भयं भवेत् । न नागेभ्यो भयं चैव न च भूतभयं क्वचित् ॥२३॥ अग्निशत्रुभयं नास्ति पार्थिवेभ्यस्तथैव च । दुर्गतिं तरते घोरां प्रजां च लभते पशून् ॥२४॥ सिद्धिकामो लभेत्सिद्धिं कन्याकामस्तु कन्यकाम् । एतत्पठेत्स कौंतेय भक्तियुक्तेन चेतसा ॥ २५ ॥ अश्वमेधसहस्रस्य वाजपेयशतस्य च । कन्याकोटिसहस्रस्य दत्तस्य फलमाप्नुयात् ॥ २६ ॥ इदमादित्यहृदयं योऽधीते सततं नरः । सर्वपापविशुद्धात्मा सूर्यलोके महीयते ॥ २७ ॥ नास्त्यादित्यसमो देवो नास्त्यादित्यसमा गतिः । प्रत्यक्षो भगवान्विष्णुर्येन विश्वं प्रतिष्ठितम् ॥ २८ ॥ नवतिर्योजनं लक्षं सहस्राणि शतानि च । यावद्घटीप्रमाणेन तावच्चरति भास्करः ॥ २९ ॥ गवां शतसहस्रस्य सम्यग्दत्तस्य यत्फलम् । तत्फलं लभते विद्वान् शांतात्मा स्तौति यो रविम् ॥१३०॥ योऽधीते सूर्यहृदयं सकलं सफलं भवेत् । अष्टानां ब्राह्मणानां च लेखयित्वा समर्पयेत् ॥ ३१ ॥ ब्रह्मलोके ऋषीणां च जायते मानुषोऽपि वा । जातिस्मरत्वमाप्नोति शुद्धात्मा नात्र संशयः ॥ ३२ ॥ अजाय लोकत्रयपावनाय भूतात्मने गोपतये वृषाय । सूर्याय सर्वप्रलयांतकाय नमो महाकारुणिकोत्तमाय ॥ ३३ ॥ विवस्वते ज्ञानभृदंतरात्मने जगत्प्रदीपाय जगद्धितैषिणे ।

स्वयंभुवे दीप्तसहस्रचक्षुषे । सुरोत्तमायामिततेजसे नमः ॥ ३४ ॥ सुरैरनेकैः परिसेविताय हिरण्यगर्भाय हिरण्मयाय । महात्मने मोक्षपदाय नित्यं नमोस्तु ते वासरकारणाय ॥३५॥ आदित्यश्चार्चितो देव आदित्यः परमं पदम् । आदित्यो मातृको भूत्वा आदित्यो वाङ्मयं जगत् ॥ ३६ ॥ आदित्यं पश्यते भक्त्या मां पश्यति ध्रुवं नरः । नादित्यं पश्यते भक्त्या न स पश्यति मां नरः ॥ ३७ ॥ त्रिगुणं च त्रितत्वं च त्रयो देवास्त्रयोऽग्नयः । त्रयाणां च त्रिमूर्तिस्त्वं तुरीयस्त्वं नमोस्तु ते ॥ ३८ ॥ नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे । त्रयीमयाय त्रिगुणात्मधारिणे विरिंचिनारायणशंकरात्मने ॥ ३९ ॥ यस्योदयेनेह जगत्प्रबुध्यते प्रवर्तते चाखिलकर्मसिद्धये । ब्रह्मेंद्रनारायणरुद्रवंदितः स नः सदा यच्छतु मंगलं रविः ॥ १४० ॥ नमोऽस्तु सूर्याय सहस्ररश्मये सहस्रशाखान्वितसंभवात्मने । सहस्रयागोद्भवभावभागिने सहस्रसंख्यायुगधारिणे नमः ॥ ४१ ॥ यन्मंडलं दीप्तिकरं विशालं रत्नप्रभं तीव्रमनादिरूपम् । दारिद्र्यदुःखक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम् ॥ ४२ ॥ यन्मंडलं देवगणैः सुपूजितं विप्रैः स्तुतं भावनमुक्तिकोविदम् । तं देवदेवं प्रणमामि,सूर्यं पुनातु० ॥४३॥ यन्मंडलं ज्ञानघनं त्वगम्यं त्रैलोक्यपूज्यं त्रिगुणात्मरूपम् । समस्ततेजोमयदिव्यरूपं

पुनातु मां तत्सवि० ॥ ४४ ॥ यन्मंडलं गूढमतिप्रबोधं धर्मस्य वृद्धिं कुरुते जनानाम् । यत्सर्वपापक्षयकारणं च पुनातु मां त० ॥४५॥ यन्मंडलं व्याधिविनाशदक्षं यदृ-ग्यजुःसामसु संप्रगीतम् । प्रकाशितं येन च भूर्भुवःस्वः पुनातु मां त० ॥४६॥ यन्मंडलं वेदविदो वदंति गायंति यच्चारणसिद्धसंघाः । यद्योगिनो योगजुषां च संघाः पुनातु मां त० ॥ ४७ ॥ यन्मंडलं सर्वजनेषु पूजितं ज्योतिश्च कुर्यादिह मर्त्यलोके । यत्कालकालादिमनादिरूपं पुनातु मां त० ॥ ४८ ॥ यन्मंडलं विष्णुचतुर्मुखाख्यं यदक्षरं पापहरं जनानाम् । यत्कालकल्पक्षयकारणं च पुनातु मां त० ॥ ४९ ॥ यन्मंडलं विश्वसृजां प्रसिद्धमुत्पत्तिरक्षाप्रल-यप्रगल्भम् । यस्मिञ्जगत्संहरतेऽखिलं च पुनातु मां त० ॥ १५० ॥ यन्मंडलं सर्वगतस्य विष्णोरात्मा परं धाम विशुद्धतत्त्वम् । सूक्ष्मांतरैर्योगपथानुगम्यं पुनातु मां त० ॥ ५१ ॥ यन्मंडलं ब्रह्मविदो वदंति गायंति यच्चारणसिद्ध-संघाः । यन्मंडलं वेदविदः स्मरंति पुनातु मां त० ॥५२॥ यन्मंडलं वेदविदोपगीतं यद्योगिनां योगपथानुगम्यम् । तत्सर्ववेदं प्रणमामि सूर्यं पुनातु मां त० ॥५३॥ मंडला-ष्टमिदं पुण्यं यः पठेत्सततं नरः । सर्वपापविशुद्धात्मा सूर्यलोके महीयते ॥ ५४ ॥ ध्येयः सदा सवितृमंडलम-ध्यवर्ती नारायणः सरसिजासनसंनिविष्टः । केयूरवान्म-

करकुंडलवान् किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः ॥५५॥ सशंखचक्रं रविमंडले स्थितं कुशेशयाक्रांतमनंतमच्युतम् । भजामि बुद्ध्या तपनीयमूर्तिं सुरोत्तमं चित्रविभूषणोज्ज्वलम् ॥ ५६ ॥ एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः । कीर्तयंति सुरश्रेष्ठं देवं नारायणं विभुम् ॥५७॥ वेदवेदांगशारीरं दिव्यदीप्तिकरं परम् । रक्षोघ्नं रक्तवर्णं च सृष्टिसंहारकारकम् ॥५८॥ एकचक्रो रथो यस्य दिव्यः कनकभूषितः । स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥ ५९ ॥ आदित्यः प्रथमं नाम द्वितीयं तु दिवाकरः । तृतीयं भास्करः प्रोक्तं चतुर्थं तु प्रभाकरः ॥१६०॥ पंचमं तु सहस्रांशुः षष्ठं चैव त्रिलोचनः । सप्तमं हरिदश्वश्च अष्टमं तु विभावसुः ॥ ६१ ॥ नवमं दिनकृत्प्रोक्तं दशमं द्वादशात्मकम् । एकादशं त्रयीमूर्तिर्द्वादशं सूर्य एव च ॥६२॥ द्वादशादित्यनामानि प्रातःकाले पठेन्नरः । दुःखप्रणाशनं चैव सर्वदुःखं च नश्यति ॥ ६३ ॥ दद्रूकुष्ठहरं चैव दारिद्र्यं हरते ध्रुवम् । सर्वतीर्थप्रदं चैव सर्वकामप्रवर्धनम् ॥ ६४ ॥ यः पठेत्प्रातरुत्थाय भक्त्या नित्यमिदं नरः । सौख्यमायुस्तथाऽरोग्यं लभते मोक्षमेव च ॥६५॥ अग्निमीळे नमस्तुभ्यमिषेत्वोर्जस्वरूपिणे । अग्न आयाहि वीतस्त्वं नमस्ते ज्योतिषां पते ॥६६॥ शं नो देवी नमस्तुभ्यं जगच्चक्षुर्नमोऽस्तु ते । पंचमायोपवेदाय नमस्तुभ्यं

नमो नमः ॥६०॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः । सप्ताश्वरथसंयुक्तो द्विभुजः स्यात्सदा रविः ॥ ६८ ॥ आदित्यस्य नमस्कारं ये कुर्वंति दिने दिने । जन्मांतरसहस्रेषु दारिद्र्यं नोपजायते ॥ ६९ ॥ उदयगिरिमुपेतं भास्करं पद्महस्तं निखिलभुवननेत्रं रत्नरत्नोपमेयम् । तिमिरकरिमृगेंद्रं बोधकं पद्मिनीनां सुरवरमभिवंदे सुंदरं विश्ववंद्यम् ॥ १७० ॥ इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे आदित्यहृदयस्तोत्रं संपूर्णम् ॥

७०. सूर्याष्टकम् ।

श्रीगणेशाय नमः ॥ सांब उवाच ॥ आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर । दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते ॥१॥ सप्ताश्वरथमारूढं प्रचण्डं कश्यपात्मजम् । श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम् ॥ २ ॥ लोहितं रथमारूढं सर्वलोकपितामहम् । महापापहरं देवं तं सूर्यं० ॥३॥ त्रैगुण्यं च महाशूरं ब्रह्मविष्णुमहेश्वरम् । महापापहरं देवं तं सूर्यं० ॥ ४ ॥ बृंहितं तेजःपुंजं च वायुमाकाशमेव च । प्रभुं च सर्वलोकानां तं सूर्यं० ॥ ५ ॥ बंधूकपुष्पसंकाशं हारकुंडलभूषितम् । एकचक्रधरं देवं तं सूर्यं० ॥ ६ ॥ तं सूर्यं जगत्कर्तारं महातेजःप्रदीपनम् । महापापहरं देवं तं सूर्यं० ॥ ७ ॥ तं सूर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदम् । महापापहरं देवं तं सूर्यं० ॥ ८ ॥

सूर्याष्टकं पठेन्नित्यं ग्रहपीडाप्रणाशनम्। अपुत्रो लभते पुत्रं दरिद्रो धनवान्भवेत् ॥ ९ ॥ आमिषं मधुपानं च यः करोति रवेर्दिने। सप्तजन्म भवेद्रोगी जन्मजन्म दरिद्रता ॥१०॥ स्त्रीतैलमधुमांसानि यस्त्यजेत्तु रवेर्दिने। न व्याधिः शोकदारिद्र्यं सूर्यलोकं स गच्छति ॥ ११ ॥ इति श्रीसूर्याष्टकस्तोत्रं संपूर्णम् ॥

७१. सूर्यार्यास्तोत्रम्।

श्रीगणेशाय नमः ॥ शुकतुंडच्छवि सवितुश्चंडरुचेः पुंडरीकवनबन्धोः। मंडलमुदितं वंदे कुंडलमाखंडलाशायाः ॥१॥ यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोऽपि। कुरुतेंऽजलिं त्रिनेत्रः स जयति धाम्नां निधिः सूर्यः ॥ २ ॥ उदयाचलतिलकाय प्रणतोऽस्मि विवस्वते ग्रहेशाय। अंबरचूडामणये दिग्वनिताकर्णपूराय ॥ ३ ॥ जयति जनानंदकरः करनिकरनिरस्ततिमिरसंघातः। लोकालोकालोकः कमलारुणमंडलः सूर्यः ॥ ४ ॥ प्रतिबोधितकमलवनः कृतघटनश्चक्रवाकमिथुनानाम्। दर्शितसमस्तभुवनः परहितनिरतो रविः सदा जयति ॥ ५ ॥ अपनयतु सकलकलिकृतमलपटलं सुप्रतप्तकनकाभः। अरविंदवृंदविघटनपटुतरकिरणोत्करः सविता ॥ ६ ॥ उदयाद्रिचारुचामरहरितहयखुरपरिहितरेणुराग। हरितहय हरितपरिकर गगनांगनदीपक नमस्ते ॥ ७ ॥ उदितवति त्वयि विकसति

मुकुलीयति समस्तमस्तमितबिंबे । नह्यन्यस्मिन्दिनकर सकलं कमलायते भुवनम् ॥ ८ ॥ जयति रविरुदयसमये बालातपः कनकसंनिभो यस्य । कुसुमांजलिरिव जलधौ तरंति रथसप्तयः सप्त ॥९॥ आर्याः सांबपुरे सप्त आकाशात्पतिता भुवि । यस्य कंठे गृहे वापि न स लक्ष्म्या वियुज्यते ॥ १० ॥ आर्याः सप्त सदा यस्तु सप्तम्यां सप्तधा जपेत् । तस्य गेहं च देहं च पद्मा सत्यं न मुंचति ॥११॥ निधिरेष दरिद्राणां रोगिणां परमौषधम् । सिद्धिः सकलकार्याणां गाथेयं संस्मृता रवेः ॥ १२ ॥ इति श्रीयाज्ञवल्क्यविरचितं सूर्यार्यास्तोत्रं संपूर्णम् ॥

७२. सूर्यस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ॐनमो भगवते आदित्यायाखिलजगतामात्मस्वरूपेण कालस्वरूपेण चतुर्विधभूतनिकायानां ब्रह्मादिस्तंबपर्यंतानामंतर्हृदयेषु बहिरपि चाकाश इवोपाधिनाऽव्यवधीयमानो भगवानेक एव क्षणलवनिमेषावयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमां लोकयात्रामनुवहति ॥ १ ॥ यदुहवाव विबुधर्षभ सवितरदस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिनबीजावभर्जनभगवतः समभिधीमहि तपनमंडलम् ॥२॥ य इह वाव स्थिरचरनिकराणां निजकेतनानां मनइंद्रियासुगणानात्मनः स्वयमात्मांतर्यामी प्रचोद-

यति ॥ ३ ॥ य एवेमं लोकमतिकरालवदनांधकारसंज्ञाजगरग्रहगिलितं संमृतकमिव विचेतनमवलोक्यानुकंपया परमकारुणिकवीक्षयैवोत्थाप्याऽहरहरनुसवनं श्रेयसि स्वधर्माख्यात्मावस्थाने प्रवर्तयत्यवनिपतिरिवाऽसाधूनां भयमुदीरयन्नटति ॥४॥ परित आशापालैस्तत्र तत्र कमलकोशांजलिभिरुपहृतार्हणः ॥ ५ ॥ अथ ह भगवंस्तव चरणनलिनयुगुलं त्रिभुवनगुरुभिर्वंदितमहमयातयामयजुःकाम उपसरामीति ॥ ६ ॥ इति श्रीमद्भागवतद्वादशस्कंधांतर्याज्ञवल्क्यकृतं सूर्यस्तोत्रं संपूर्णम् ॥

केलीगतानुगमरालीकुला मधुरमालीभिरादृतकथा ।
वालीयुतश्रवणपालीयुगा ललितचूलीविराजिचिकुला
नालीकदृक्कुसुमनालीकपाणिरिह कालीयशांसि सहृणा
तालीदलाभतनुमाली सदा भवतु काली शुभाय मम सा ॥

देवीस्तोत्राणि।

७३ देव्यपराधक्षमापनस्तोत्रम्।

श्रीगणेशाय नमः ॥ न मंत्रं नो यंत्रं तदपि च न जाने स्तुतिमहो न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः। न जाने मुद्रास्ते तदपि च न जाने विलपनं परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥ १ ॥ विधेरज्ञानेन द्रविणविरहेणालसतया विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत्। तदेतत्क्षंतव्यं जननि सकलोद्धारिणि शिवे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ २ ॥ पृथिव्यां पुत्रास्ते जननि बहवः संति सरलाः परं तेषां मध्ये विरलतरलोऽहं तव सुतः। मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ३ ॥ जगन्मातर्मातस्तव चरणसेवा न रचिता न वा दत्तं देवि द्रविणमपि भूयस्तव मया। तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ४ ॥ परित्यक्त्वा देवान्विविधविधसेवाकुलतया मया पंचाशीतेरधिकमपनीते तु वयसि। इदानीं चेन्मातस्तव यदि कृपा नापि भविता निरालंबो लंबोदरजननि कं यासि शरणम् ॥५॥ श्वपाको जल्पाको भवति मधुपाकोपमगिरा निरातंको रंको विहरति चिरं कोटिकनकैः।

तवापर्णे कर्णे विशति मनुवर्णे फलमिदं जनः को जानीते जननि जपनीयं जपविधौ ॥ ६ ॥ चिताभस्मालेपो गरलमशनं दिक्पटधरो जटाधारी कंठे भुजगपतिहारी पशुपतिः । कपाली भूतेशो भजति जगदीशैकपदवीं भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥ ७ ॥ न मोक्षस्याकांक्षा न च विभववांछापि च न मे न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः । अतस्त्वां संयाचे जननि जननं यातु मम वै मृडानी रुद्राणी शिवशिव भवानीति जपतः ॥ ८ ॥ नाराधितासि विधिना विविधोपचारैः किं रूक्षचिंतनपरैर्न कृतं वचोभिः । श्यामे त्वमेव यदि किंचन मय्यनाथे धत्से कृपामुचितमंब परं तवैव ॥ ९ ॥ आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि । नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरंति ॥ १० ॥ जगदंब विचित्रमत्र किं परिपूर्णा करुणाऽस्ति चेन्मयि । अपराधपरंपरावृतं नहि माता समुपेक्षते सुतम् ॥ ११ ॥ मत्समः पातकी नास्ति पापघ्नी त्वत्समा नहि । एवं ज्ञात्वा महादेवि यथा योग्यं तथा कुरु ॥ १२ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं देव्यपराधक्षमापनस्तोत्रं संपूर्णम् ॥

७४. आनंदलहरी ।

श्रीगणेशाय नमः ॥ भवानि स्तोतुं त्वां प्रभवति चतु-

भिन्नै वदनैः प्रजानामीशनस्त्रिपुरमथनः पंचभिरपि । न षड्भिः सेनानीर्दशशतमुखैरप्यहिपतिस्तदान्येषां केषां कथय कथमस्मिन्नवसरः ॥ १ ॥ घृतक्षीरद्राक्षामधुमधुरिमा कैरपि पदैर्विशिष्यानाख्येयो भवति रसनामात्रविषयः । तथा ते सौंदर्यं परमशिवदृङ्मात्रविषयः कथंकारं ब्रूमः सकलनिगमाऽगोचरगुणे ॥ २ ॥ मुखे ते तांबूलं नयनयुगुले कज्जलकला ललाटे काश्मीरं विलसति गले मौक्तिकलता । स्फुरत्कांची शाटी पृथुकटितटे हाटकमयी भजामस्त्वां गौरीं नगपतिकिशोरीमविरतम् ॥ ३ ॥ विराजन्मन्दारद्रुमकुसुमहारस्तनतटी नदद्वीणानादश्रवणविलसत्कुंडलगुणा । नतांगी मातंगी रुचिरगतिभंगी भगवती सती शंभोरंभोरुहचटुलचक्षुर्विजयते ॥ ४ ॥ नवीनार्कभ्राजन्मणिकनकभूषापरिकरैर्वृतांगी सारंगीरुचिरनयनांगीकृतशिवा । तडित्पीता पीतांबरललितमंजीरसुभगा ममाऽपर्णा पूर्णा निरवधिसुखैरस्तु सुमुखी ॥ ५ ॥ हिमाद्रेः संभूता सुललितकरैः पल्लवयुता सुपुष्पा मुक्ताभिर्भ्रमरकलिता चालकभरैः । कृतस्थाणुस्थाना कुचफलनता सूक्तिसरसा रुजां हंत्री गंत्री विलसति चिदानंदलतिका ॥ ६ ॥ सपर्णामाकीर्णां कतिपयगुणैः सादरमिह श्रयंत्यन्ये वल्लीं मम तु मतिरेवं विलसति । अपर्णैका सेव्या जगति सकलैर्यत्परिवृतः पुराणोऽपि स्थाणुः फलति किल कैवल्यप-

दवीम् ॥ ७ ॥ विधात्री धर्माणां त्वमसि सकलाम्नायज-
ननी त्वमर्थानां मूलं धनदनमनीयाङ्घ्रिकमले । त्वमादिः
कामानां जननि कृतकंदर्पविजये सतां भक्तेर्बीजं त्वमसि
परमब्रह्ममहिषी ॥ ८ ॥ प्रभूता भक्तिस्ते यदपि न ममा-
लोलमनसस्त्वया तु श्रीमत्या सदयमवलोक्योऽहमधुना ।
पयोदः पानीयं दिशति मधुरं चातकमुखे भृशं शंके कैर्वा
विधिभिरनुनीता मम मतिः ॥ ९ ॥ कृपापांगालोकं वितर
तरसा साधुचरिते न ते युक्तोपेक्षा मयि शरणदीक्षामुप-
गते । न चेदिष्टं दद्यादनुपदमहो कल्पलतिका विशेषः
सामान्यैः कथमितरवल्लीपरिकरैः ॥ १० ॥ महांतं विश्वासं
तव चरणपंकेरुहयुगे निधायान्यन्नैवाश्रितमिह मया दैव-
तमुमे । तथापि त्वच्चेतो यदि मयि न जायेत सदयं
निरालंबो लंबोदरजननि कं यामि शरणम् ॥ ११ ॥ अयः
स्पर्शे लग्नं सपदि लभते हेमपदवीं यथा रथ्यापाथः
शुचि भवति गंगौघमिलितम् । तथा तत्तत्पापैरतिमलि-
नमंतर्मम यदि त्वयि प्रेम्णा सक्तं कथमिव न जायेत
विमलम् ॥ १२ ॥ त्वदन्यस्मादिच्छाविषयफललाभेन
नियमस्त्वमर्थानामिच्छाधिकमपि समर्था वितरणे । इति
प्राहुः प्राञ्चः कमलभवनाद्यास्त्वयि मनस्त्वदासक्तं
नक्तंदिवमुचितमीशानि कुरु तत् ॥ १३ ॥ स्फुरन्ना-
नारत्नस्फटिकमयभित्तिप्रतिफलत्त्वदाकारं चंचच्छशध-

रविलासौवशिखरम् । मुकुंदब्रह्मेंद्रप्रभृतिपरिवारं विजयते तवागारं रम्यं त्रिभुवनमहाराजगृहिणि ॥ १४ ॥ निवासः कैलासे विधिशतमखाद्याः स्तुतिकराः कुटुंबं त्रैलोक्यं कृतकरपुटः सिद्धिनिकरः । महेशः प्राणेशस्तदवनिधराधीशतनये न ते सौभाग्यस्य क्वचिदपि मनागस्ति तुलना ॥ १५ ॥ वृषो वृद्धो यानं विषमशनमाशा निवसनं श्मशानं क्रीडाभूर्भुजगनिवहो भूषणनिधिः । समग्रा सामग्री जगति विदितैव स्मररिपोर्यदेतस्यैश्वर्यं तव जननि सौभाग्यमहिमा ॥ १६ ॥ अशेषब्रह्मांडप्रलयविधिनैसर्गिकमतिः श्मशानेष्वासीनः कृतभसितलेपः पशुपतिः । दधौ कंठे हालाहलमखिलभूगोलकृपया भवत्याः संगत्याः फलमिति च कल्याणि कलये ॥ १७ ॥ त्वदीयं सौंदर्यं निरतिशयमालोक्य परया भियैवासीद्गंगा जलमयतनुः शैलतनये । तदेतस्यास्तस्माद्वदनकमलं वीक्ष्य कृपया प्रतिष्ठामातेने निजशिरसि वासेन गिरिशः ॥१८॥ विशालश्रीखंडद्रवमृगमदाकीर्णघुसृणप्रसूनव्यामिश्रं भगवति तवाभ्यंगसलिलम् । समादाय स्रष्टा चलितपदपांसून्निजकरैः समाधत्ते सृष्टिं विबुधपुरपंकेरुहदृशाम् ॥१९॥ वसंते सानंदे कुसुमितलताभिः परिवृते स्फुरन्नानापद्मे सरसि कलहंसालिसुभगे । सखीभिः खेलंतीं मलयपवनांदोलितजलैः स्मरेद्यस्त्वां तस्य ज्वरजनितपीडाऽपसरति

॥२०॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितानंदलहरी संपूर्णा ॥

७५. महालक्ष्म्यष्टकम् ।

श्रीगणेशाय नमः ॥ इंद्र उवाच । नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते । शंखचक्रगदाहस्ते महालक्ष्मि नमोऽस्तुते ॥ १ ॥ नमस्ते गरुडारूढे कोलासुरभयंकरि । सर्वपापहरे देवि महालक्ष्मि० ॥२॥ सर्वज्ञे सर्ववरदे सर्वदुष्टभयंकरि । सर्वदुःखहरे देवि महालक्ष्मि० ॥३॥ सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि । मंत्रमूर्ते सदा देवि महालक्ष्मि० ॥ ४ ॥ आद्यंतरहिते देवि आद्यशक्ति महेश्वरि । योगजे योगसंभूते महालक्ष्मि० ॥५॥ स्थूलसूक्ष्ममहारौद्रे महाशक्ति महोदरे । महापापहरे देवि महालक्ष्मि० ॥६॥ पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि । परमेशि जगन्मातर्महालक्ष्मि० ॥७॥ श्वेतांबरधरे देवि नानालंकारभूषिते । जगत्स्थिते जगन्मातर्महालक्ष्मि० ॥८॥ महालक्ष्म्यष्टकस्तोत्रं यः पठेद्भक्तिमान्नरः । सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥ ९ ॥ एककालं पठेन्नित्यं महापापविनाशनम् । द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः ॥ १० ॥ त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम् । महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥११॥ इतींद्रकृतः श्रीमहालक्ष्म्यष्टकस्तवः संपूर्णः ॥

७६. श्रीकनक(लक्ष्मी)स्तवः[1] ।

"श्रीमच्छङ्करभगवत्पादाचार्यविरचितः"

श्रीः। अङ्गं हरेः पुलकभूषणमाश्रयन्ती भृङ्गाङ्गनेव मुकुलाभरणं तमालम्। अङ्गीकृताखिलविभूतिरपाङ्गलीला मङ्गल्यदास्तु मम मङ्गलदेवतायाः ॥१॥ मुग्धा मुहुर्विदधती वदने मुरारेः प्रेमत्रपाप्रणिहितानि गतागतानि । माला दृशोर्मधुकरीव महोत्पले या सा मे श्रियं दिशतु सागरसंभवायाः ॥ २ ॥ आमीलिताक्षमधिगम्य मुदा मुकुन्दमानन्दमन्दमनिमेषमनङ्गतन्त्रम् । आकेकरस्थितकनीनिकपक्ष्मनेत्रं भूत्यै भवेन्मम भुजंगशयाङ्गनायाः ॥ ३ ॥ बाह्वन्तरे मधुजितः श्रितकौस्तुभे या हारावली च हरिनीलमयी विभाति। कामप्रदा भगवतोऽपि कटाक्षमाला कल्याणमावहतु मे कमलालयायाः ॥ ४ ॥ कालांबुदालिललितोरसि कैटभारेर्धाराधरे स्फुरति या तडिदंग-

---

१ अयं स्तवः स्वामिना शंकरभगवत्पादेन ब्रह्मव्रतस्थेन कालटिनाम्नि स्वग्राम एवाकिंचन्यपरिखिन्नाया द्विजगृहिण्याः खेदमार्जनाय निरमायीति शंकरविजयतः प्रतीयते, 'स मुनिर्मुरजित्कुटुम्बिनीं पदचित्रैर्नवनीतकोमलैः । मधुरैरुपतस्थिवांस्तवैः' इत्यत्र ॥ एते श्रीमन्मातुरभ्यर्थनया स्तवमेतमतनिपतेति कालटिग्रामनिकटवर्तिनां विदुषां मतम्। तदारभ्य कर्णाकर्णिकया तथोक्तिः ॥ इति श्रीमतां सेवापरः शिवप्रसादः ॥

नेव । मातुः समस्तजगतां महनीयमक्षि भद्राणि मे दिशतु भार्गवनन्दनायाः ॥ ५ ॥ प्राप्तं पदं प्रथमतः खलु यत्प्रभावान्मङ्गल्यभाजि मधुमाथिनि मन्मथेन । मय्यापतेत्तदिह मन्थरमीक्षणार्धं मन्दालसाक्षि मकराकरकन्यकायाः ॥ ६ ॥ विश्वामरेन्द्रपदविभ्रमदानदक्षमानन्दहेतुरधिकं मधुविद्विषोऽपि । ईषन्निषीदतु मयि क्षणमीक्षणार्धमिन्दीवरोदरसहोदरमिन्दिरायाः ॥७॥ इष्टा विशिष्टमतयोऽपि नरा यथा द्राग्दृष्टास्त्रिविष्टपसदश्च पदं भजन्ते । दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः ॥ ८ ॥ दद्याद्दयानुपवनो द्रविणांबुधारामस्मिन्नकिञ्चनविहंगशिशौ निषण्णे । दुष्कर्मधर्ममपनीय चिराय दूरान्नारायणप्रणयिनीनयनांबुवाहः ॥९॥ गीर्देवतेति गरुडध्वजभामिनीति शाकंभरीति शशिशेखरवल्लभेति । सृष्टिस्थितिप्रलयसिद्धिषु संस्थितायै तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै ॥ १० ॥ श्रुत्यै नमोस्तु शुभकर्मफलप्रसूत्यै रत्यै नमोस्तु रमणीयगुणाश्रयायै । शक्त्यै नमोस्तु शतपत्रनिकेतनायै पुष्ट्यै नमोस्तु पुरुषोत्तमवल्लभायै ॥ ११ ॥ नमोस्तु नालीकविभावनायै नमोस्तु दुग्धोदधिजन्मभूत्यै । नमोस्तु सोमामृतसोदरायै नमोस्तु नारायणवल्लभायै ॥ १२ ॥ नमोस्तु हेमांबुजपीठिकायै नमोस्तु भूमण्डलनायिकायै । नमोस्तु

देवादिदयापरायै नमोस्तु शार्ङ्गायुधवल्लभायै ॥ १३ ॥ नमोस्तु देव्यै भृगुनन्दनायै नमोस्तु विष्णोरुरसि स्थितायै । नमोस्तु लक्ष्म्यै कमलालयायै नमोस्तु दामोदरवल्लभायै ॥ १४ ॥ नमोस्तु कान्त्यै कमलेक्षणायै नमोस्तु भूत्यै भुवनप्रसूत्यै । नमोस्तु देवादिभिरर्चितायै नमोस्तु नन्दात्मजवल्लभायै ॥ १५ ॥ स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं त्रयीमयीं त्रिभुवनमातरं रमाम् । गुणाधिका गुरुधनभाग्यभागिनो भवन्ति ते भवमनु भाविताशयाः ॥ १६ ॥ हरिः ॐ ॥ इति श्रीभगवत्पादशंकराचार्यकृतः कनकस्तवः ॥

७७. त्रिपुरसुंदरीस्तोत्रम् ।

श्रीगणेशाय नमः ॥ कदंबवनचारिणीं मुनिकदंबकादंबिनीं नितंबजितभूधरां सुरनितंबिनीसेविताम् । नवांबुरुहलोचनामभिनवांबुदश्यामलां त्रिलोचनकुटुंबिनीं त्रिपुरसुंदरीमाश्रये ॥ १ ॥ कदंबवनवासिनीं कनकवल्लकीधारिणीं महार्हमणिहारिणीं मुखसमुल्लसद्वारुणीम् । दयाविभवकारिणीं विशदलोचनीं चारिणीं त्रिलोचनकुटुंबिनीं त्रिपुरसुंदरीमाश्रये ॥ २ ॥ कदंबवनशालया कुचभरोल्लसन्मालया कुचोपमितशैलया गुरुकृपालसद्वेलया । मदारुणकपोलया मधुरगीतवाचालया कयापि घननीलया कवचिता जयं लीलया ॥ ३ ॥ कदंबवनमध्यगां

कनकमंडलोपस्थितां षडंबुरुहवासिनीं सततसिद्धसौदामिनीम् । विडंबितजपारुचिं विकचचंद्रचूडामणिं त्रिलोचनकुटुंबिनीं त्रिपुरसुंदरीमाश्रये ॥ ४ ॥ कुचांचितविपंचिकां कुटिलकुंतलालंकृतां कुशेशयनिवासिनीं कुटिलचित्तविद्वेषिणीम् । मदारुणविलोचनां मनसिजारिसंमोहिनीं मतंगमुनिकन्यकां मधुरभाषिणीमाश्रये ॥ ५ ॥ स्मरेत्प्रथमपुष्पिणीं रुधिरबिंदुनीलांबरां गृहीतमधुपात्रिकां मधुविघूर्णनेत्रांचलाम् । घनस्तनभरोन्नतां गलितचूलिकां श्यामलां त्रिलोचनकुटुंबिनीं त्रिपुरसुंदरीमाश्रये ॥ ६ ॥ सकुंकुमविलेपनामलकचुंबिकस्तूरिकां समंदहसितेक्षणां सशरचापपाशांकुशाम् । अशेषजनमोहिनीमरुणमाल्यभूषांबरां जपाकुसुमभासुरां जपविधौ स्मराम्यंबिकाम् ॥७॥ पुरंदरपुरंध्रिकाचिकुरबंधसैरंध्रिकां पितामहपतिव्रतां पटुपटीरचर्चारताम् । मुकुंदरमणीं मणीलसदलंक्रियाकारिणीं भजामि भुवनांबिकां सुरवधूटिकाचेटिकाम् ॥ ८ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं त्रिपुरसुंदरीस्तोत्रं संपूर्णम् ॥

७८. देवकृतलक्ष्मीस्तोत्रम् ।

श्रीगणेशाय नमः ॥ क्षमस्व भगवत्यंब क्षमाशीले परात्परे । शुद्धसत्त्वस्वरूपे च कोपादिपरिवर्जिते ॥१॥ उपमे सर्वसाध्वीनां देवीनां देवपूजिते । त्वया विना जग-

त्सर्वं मृततुल्यं च निष्फलम् ॥ २ ॥ सर्वसंपत्स्वरूपा त्वं सर्वेषां सर्वरूपिणी । रासेश्वर्यधिदेवी त्वं त्वत्कलाः सर्वयोषितः ॥३॥ कैलासे पार्वती त्वं च क्षीरोदे सिंधु-कन्यका । स्वर्गे च महालक्ष्मीस्त्वं मर्त्यलक्ष्मीश्च भूतले ॥ ४ ॥ वैकुंठे च महालक्ष्मीर्देवदेवी सरस्वती । गंगा च तुलसी त्वं च सावित्री ब्रह्मलोकतः ॥ ५ ॥ कृष्णप्राणा-धिदेवी त्वं गोलोके राधिका स्वयम् । रासे रासेश्वरी त्वं च वृंदावनवने वने ॥ ६ ॥ कृष्णप्रिया त्वं भांडीरे चंद्रा चंदनकानने । विरजा चंपकवने शतशृंगे च सुंदरी ॥७॥ पद्मावती पद्मवने मालती मालतीवने । कुंददंती कुंदवने सुशीला केतकीवने ॥ ८ ॥ कदंबमाला त्वं देवी कदंब-काननेऽपि च । राजलक्ष्मी राजगेहे गृहलक्ष्मीर्गृहे गृहे ॥९॥ इत्युक्त्वा देवताः सर्वा मुनयो मनवस्तथा । रुरुदुर्न-म्रवदनाः शुष्ककंठोष्ठतालुकाः ॥ १० ॥ इति लक्ष्मीस्तवं पुण्यं सर्वदेवैः कृतं शुभम् । यः पठेत्प्रातरुत्थाय स वै सर्वं लभेद्ध्रुवम् ॥ ११ ॥ अभार्यो लभते भार्यां विनीतां सुसुतां सतीम् । सुशीलां सुंदरीं रम्यामतिसुप्रियवादि-नीम् ॥ १२ ॥ पुत्रपौत्रवतीं शुद्धां कुलजां कोमलां-बराम् । अपुत्रो लभते पुत्रं वैष्णवं चिरजीविनम् ॥१३॥ परमैश्वर्ययुक्तं च विद्यावंतं यशस्विनम् । भ्रष्टराज्यो लभे-द्राज्यं भ्रष्टश्रीर्लभते श्रियम् ॥ १४ ॥ हतबंधुर्लभेद्बंधुं

धनभ्रष्टो धनं लभेत् । कीर्तिहीनो लभेत्कीर्तिं प्रतिष्ठां च लभेद्ध्रुवम् ॥ १५ ॥ सर्वमंगलदं स्तोत्रं शोकसंतापनाशनम् । हर्षानंदकरं शश्वद्धर्ममोक्षसुहृत्प्रदम् ॥ १६ ॥ इति श्रीदेवकृतं लक्ष्मीस्तोत्रं संपूर्णम् ॥

७९. वाराहीनिग्रहाष्टकम् ।

श्रीगणेशाय नमः ॥ देवि क्रोडमुखि त्वदंघ्रिकमलद्वंद्वानुरक्तात्मने मह्यं द्रुह्यति यो महेशि मनसा कायेन वाचा नरः। तस्याशु त्वदयोग्रनिष्ठुरहलाघातप्रभूतव्यथापर्यस्यन्मनसो भवंतु वपुषः प्राणाः प्रयाणोन्मुखाः ॥ १ ॥ देवि त्वत्पदपद्मभक्तिविभवप्रक्षीणदुष्कर्मणि प्रादुर्भूतनृशंसभावमलिनां वृत्तिं विधत्ते मयि । यो देही भुवने तदीयहृदयान्निर्गत्वरैर्लोहितैः सद्यः पूरयसे कराब्जचषकं वांछाफलैर्मामपि ॥ २ ॥ चंडोत्तुंडविदीर्णदंष्ट्रहृदयप्रोद्भिन्नरक्तच्छटाहालापानमदाट्टहासनिनदाटोपप्रतापोत्कटम् । मातर्मत्यरिपंथिनामपहृतैः प्राणैस्त्वदंघ्रिद्वयं ध्यानोद्दामरवैभवोदयवशात्संतर्पयामि क्षणात् ॥ ३ ॥ श्यामां तामरसाननांघ्रिनयनां सोमार्धचूडां जगत्त्राणव्यग्रहलायुधाग्रमुसलां संत्राससुद्रावतीम् । ये त्वां रक्तकपालिनीं हरवरारोहे वराहाननां भावैः संदधते कथं क्षणमपि प्राणंति तेषां द्विषः ॥ ४ ॥ विश्वाधीश्वरवल्लभे विजयसे या त्वं नियंत्र्यात्मिका भूतांता पुरुषायुषावधिकरी पाकप्रदा कर्म-

णाम्। त्वां याचे भवतीं किमप्यवितथं को मद्विरोधी जनस्तस्यायुर्मम वांछितावधि भवेन्मातस्तवैवाज्ञया ॥ ५ ॥ मातः सम्यगुपासितुं जडमतिस्त्वां नैव शक्नोम्यहं यद्यप्यन्वितदैशिकाङ्घ्रिकमलानुक्रोशपात्रस्य मे। जंतुः कश्चन चिंतयत्यकुशलं यस्तस्य तद्वैशसं भूयाद्देवि विरोधिनो मम च ते श्रेयःपदासंगिनः ॥ ६ ॥ वाराहीव्यथमानमानसगलत्सौख्यं तदाशाबलिं सीदंतं यमपाकृताध्यवसितं प्राप्ताखिलोत्पादितम्। क्रंदद्बंधुजनैः कलंकितकुलं कंठव्रणोद्यत्कृमिं पश्यामि प्रतिपक्षमाशु पतितं भ्रांतं लुठंतं मुहुः ॥ ७ ॥ वाराहि त्वमशेषजंतुषु पुनः प्राणात्मिका स्पंदसे शक्तिव्याप्तचराचरा खलु यतस्त्वामेतदभ्यर्थये। त्वत्पादांबुजसंगिनो मम सकृत्पापं चिकीर्षंति ये तेषां मा कुरु शंकरप्रियतमे देहांतरावस्थितिम् ॥ ८ ॥ इति श्रीवाराहीनिग्रहाष्टकं संपूर्णम् ॥

८०. वाराह्यनुग्रहाष्टकम्।

श्रीगणेशाय नमः ॥ ईश्वर उवाच। मातर्जगद्रचननाटकसूत्रधारः सद्रूपमाकलयितुं परमार्थतोयम्। ईशोऽप्यनीश्वरपदं समुपैति तादृक्कोऽन्यस्तवं किमिव तावकमादधातु ॥ १ ॥ नामानि किंतु गृणतस्तव लोकतुंडे नाडंबरं स्पृशति दंडधरस्य दंडः। यल्लेशलंबितभवांबुनिधियँतो यत्त्वन्नामसंस्मृतिरियं ननु नः स्तुतिस्ते ॥ २ ॥ त्वच्चिंतना-

दरसमुल्लसदप्रमेयानंदोदयात्समुदितः स्फुटरोमहर्षः । मातर्नमामि सुदिनानि सदेत्यमुं त्वामभ्यर्थयेऽर्थमिति पूरयताद्दयालो ॥ ३ ॥ इंद्रेंदुमौलिविधिकेशवमौलिरत्नरोचिश्रयोज्वलितपादसरोजयुग्मे । चेतो नतौ मम सदा प्रतिबिंबिता त्वं भूया भवानि विदधातु सदोरुहारे ॥ ४ ॥ लीलोद्धृतक्षितितलस्य वराहमूर्तेर्वाराहमूर्तिरखिलार्थकरी त्वमेव । प्रालेयरश्मिसुकलोल्लसितावतंसा त्वं देवि वामतनुभागहरा हरस्य ॥ ५ ॥ त्वामंब तप्तकनकोज्ज्वलकांतिमंतर्ये चिंतयंति युवतीतनुमागलांताम् । चक्रायुधत्रिनयनांबरपोतृवक्त्रां तेषां पदांबुजयुगं प्रणमंति देवाः ॥ ६ ॥ त्वत्सेवनस्खलितपापचयस्य मातर्मोक्षोऽपि यत्र न सतां गणनामुपैति । देवासुरोरगनृपालनमस्यपादस्तत्र श्रियः पटुगिरः कियदेवमस्तु ॥ ७ ॥ किं दुष्करं त्वयि मनोविषयं गतायां किं दुर्लभं त्वयि विधानवदर्चितायाम् । किं दुष्करं त्वयि सकृत्स्मृतिमागतायां किं दुर्जयं त्वयि कृतस्तुतिवादपुंसाम् ॥ ८ ॥ इति श्रीवाराह्यनुग्रहाष्टकं संपूर्णम् ॥

८१. ताराष्टकम् ।

श्रीगणेशाय नमः ॥ मातर्नीलसरस्वति प्रणमतां सौभाग्यसंपत्प्रदे प्रत्यालीढपदस्थिते शिवहृदि स्मेराननांभोरुहे । फुल्लेंदीवरलोचनत्रययुते कर्त्री कपालोत्पले खड्गे

च्चादधती त्वमेव शरणं त्वामीश्वरीमाश्रये ॥ १॥ वाचामी-श्वरि भक्तकल्पलतिके सर्वार्थसिद्धिप्रदे गद्यप्राकृतपद्यजा-तरचना सर्वत्र सिद्धिप्रदे । नीलेंदीवरलोचनत्रययुते कारु-ण्यवारां निधे सौभाग्यामृतवर्षणेन कृपया सिंच त्वमस्मा-द्दृशम् ॥ २ ॥ सर्वे गर्वसमूहपूरिततनोः सर्पादिवेषोज्वले व्याघ्रत्वक्परिवीतसुंदरकटिव्याधूतघंटांकिते । सद्यः कृ-त्तगलद्रजः परिमिलन्मुंडद्वयीमूर्धजग्रंथिश्रेणिनृमुंडदामल-लिते भीमे भयं नाशय ॥३॥ मायानंगविकाररूपललना-बिंद्वर्धचंद्रात्मिके हुंफट्कारमयि त्वमेव शरणं मंत्रा-त्मिके मादृशः । मूर्तिस्ते जननि त्रिधामघटिता स्थूला-ऽतिसूक्ष्मा परा वेदानां नहि गोचरा कथमपि प्राप्तां नु तामाश्रये ॥ ४ ॥ त्वत्पादांबुजसेवया सुकृतिनो गच्छंति सायुज्यतां तस्य श्री परमेश्वरी त्रिनयनब्रह्मादिसाम्या-त्मनः । संसारांबुधिमज्जने पटुतनून्देवेंद्रमुख्यान्सुरान्मा-तस्त्वत्पदसेवने हि विमुखो यो मंदधीः सेवते ॥ ५ ॥ मातस्त्वत्पदपंकजद्वयरजोमुद्रांककोटीरिणस्ते देवा जय-संगरे विजयिनो निःशंकमंके गताः । देवोऽहं भुवने न मे सम इति स्पर्धां वहंतः परे तत्तुल्यं नियतं यथाऽसु-भिरमी नाशं व्रजंति स्वयम् ॥ ६ ॥ त्वन्नामस्मरणात्पला-यनपरा द्रष्टुं च शक्ता न ते भूतप्रेतपिशाचराक्षसगणा यक्षाश्च नागाधिपाः । दैत्या दानवपुंगवाश्च खचरा व्या-

व्रादिका जंतवो डाकिन्यः कुपितांतकाश्च मनुजं मातः क्षणं भूतले ॥ ७ ॥ लक्ष्मीः सिद्धगणाश्च पादुकमुखाः सिद्धास्तथा वारिणः स्तंभश्चापि रणांगणे गजघटास्तंभस्तथा मोहनम् । मातस्त्वत्पदसेवया खलु नृणां सिध्यंति ते ते गुणाः कांतिः कांतमनोभवस्य भवति क्षुद्रोऽपि वाचस्पतिः ॥८॥ ताराष्टकमिदं रम्यं भक्तिमान्यः पठेन्नरः । प्रातर्मध्याह्नकाले च सायाह्ने नियतः शुचिः ॥ ९ ॥ लभते कवितां दिव्यां सर्वशास्त्रार्थविद्भवेत् । लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भोगान्यथेप्सितान् ॥ १० ॥ कीर्तिं कांतिं च नैरुज्यं सर्वेषां प्रियतां व्रजेत् । विख्यातिं चापि लोकेषु प्राप्यांते मोक्षमाप्नुयात् ॥ ११ ॥ इति नीलतंत्रे ताराष्टकं संपूर्णम् ॥

८२. शीतलाष्टकम् ।

श्रीगणेशाय नमः ॥ अस्य श्रीशीतलास्तोत्रस्य महादेव ऋषिः । अनुष्टुप् छंदः । शीतला देवता । लक्ष्मीर्बीजम् । भवानी शक्तिः । सर्वविस्फोटकनिवृत्तये जपे विनियोगः । ईश्वर उवाच । वंदेऽहं शीतलां देवीं रासभस्थां दिगंबराम् । मार्जनीकलशोपेतां शूर्पालंकृतमस्तकाम् ॥ १ ॥ वंदेऽहं शीतलां देवीं सर्वरोगभयापहाम् । यामासाद्य निवर्तेत विस्फोटकभयं महत् ॥ २ ॥ शीतले शीतले चेति यो ब्रूयाद्दाहपीडितः । विस्फोटकभयं घोरं क्षिप्रं

तस्य प्रणश्यति ॥ ३ ॥ यस्त्वामुदकमध्ये तु धृत्वा पूजयते नरः। विस्फोटकभयं घोरं गृहे तस्य न जायते ॥४॥ शीतले ज्वरदग्धस्य पूतिगंधयुतस्य च। प्रनष्टचक्षुषः पुंसस्त्वामाहुर्जीवनौषधम् ॥ ५ ॥ शीतले तनुजान्रोगान्नृणां हरसि दुस्त्यजान्। विस्फोटकविदीर्णानां त्वमेकामृतवर्षिणी ॥ ६ ॥ गलगंडग्रहा रोगा ये चान्ये दारुणा नृणाम्। त्वदनुध्यानमात्रेण शीतले यांति संक्षयम् ॥ ७ ॥ न मंत्रो नौषधं तस्य पापरोगस्य विद्यते। त्वामेकां शीतले धात्रीं नान्यां पश्यामि देवताम् ॥ ८ ॥ मृणालतंतुसदृशीं नाभिहृन्मध्यसंस्थिताम्। यस्त्वां संचिंतयेद्देवि तस्य मृत्युर्न जायते ॥ ९ ॥ अष्टकं शीतलादेव्या यो नरः प्रपठेत्सदा। विस्फोटकभयं घोरं गृहे तस्य न जायते ॥१०॥ श्रोतव्यं पठितव्यं च श्रद्धाभक्तिसमन्वितैः। उपसर्गविनाशाय परं स्वस्त्ययनं महत्॥११॥ शीतले त्वं जगन्माता शीतले त्वं जगत्पिता। शीतले त्वं जगद्धात्री शीतलायै नमो नमः ॥ १२ ॥ रासभो गर्दभश्चैव खरो वैशाखनंदनः। शीतलावाहनश्चैव दूर्वाकंदनिकृंतनः ॥ १३ ॥ एतानि खरनामानि शीतलाग्रे तु यः पठेत्। तस्य गेहे शिशूनां च शीतलारुङ् न जायते ॥ १४ ॥ शीतलाष्टकमेवेदं न देयं यस्यकस्यचित्। दातव्यं च सदा तस्मै श्रद्धाभक्तियुताय वै ॥ १५ ॥

इति श्रीस्कंदपुराणे शीतलाष्टकस्तोत्रं संपूर्णम् ॥

८३. अन्नपूर्णास्तोत्रम् ।

श्रीगणेशाय नमः ॥ नित्यानंदकरी वराभयकरी सौंदर्य-रत्नाकरी निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी । प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलंबनकरी मातान्नपूर्णेश्वरी ॥ १ ॥ नानारत्नविचित्रभूषणकरी हेमांबराडंबरी मुक्ताहारविलंबमानविलसद्वक्षोजकुंभांतरी । काश्मीरागुरुवासिता रुचिकरी काशीपुराधीश्वरी भिक्षां देहि० ॥ २ ॥ योगानंदकरी रिपुक्षयकरी धर्मार्थनिष्ठाकरी चंद्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी । सर्वैश्वर्यसमस्तवांछितकरी काशीपुराधीश्वरी भिक्षां देहि० ॥ ३ ॥ कैलासाचलकंदरालयकरी गौरी उमा शंकरी कौमारी निगमार्थगोचरकरी ओंकारबीजाक्षरी । मोक्षद्वारकपाटपाटनकरी काशीपुराधीश्वरी भिक्षां देहि० ॥ ४ ॥ दृश्यादृश्यप्रभूतवाहनकरी ब्रह्मांडभांडोदरी लीलानाटकसूत्रभेदनकरी विज्ञानदीपांकुरी । श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी भिक्षां देहि० ॥५॥ उर्वी सर्वजनेश्वरी भगवती मातान्नपूर्णेश्वरी वेणीनीलसमानकुंतलहरी नित्यान्नदानेश्वरी । सर्वानंदकरी दशाशुभकरी काशीपुराधीश्वरी भिक्षां देहि० ॥ ६ ॥

आदिक्षांतसमस्तवर्णनकरी शंभोस्त्रिभावाकरी काश्मीरा त्रिजलेश्वरी त्रिलहरी नित्यांकुरा शर्वरी। कामाकांक्षकरी जनोदयकरी काशीपुराधीश्वरी भिक्षां देहि०॥ ७॥ देवी सर्वविचित्ररत्नरचिता दाक्षायणी सुंदरी वामस्वादुपयोधरप्रियकरी सौभाग्यमाहेश्वरी। भक्ताभीष्टकरी दशाशुभकरी काशीपुराधीश्वरी भिक्षां देहि० ॥ ८ ॥ चंद्रार्कानलकोटिकोटिसदृशा चंद्रांशुबिंबाधरी चंद्रार्काग्निसमानकुंतलधरी चंद्रार्कवर्णेश्वरी । मालापुस्तकपाशसांकुशधरी काशीपुराधीश्वरी भिक्षां देहि० ॥ ९ ॥ क्षत्रत्राणकरी महाभयकरी माता कृपासागरी साक्षान्मोक्षकरी सदा शिवकरी विश्वेश्वरश्रीधरी । दक्षाक्रंदकरी निरामयकरी काशीपुराधीश्वरी भिक्षां देहि० ॥ १० ॥ अन्नपूर्णे सदापूर्णे शंकरप्राणवल्लभे। ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ॥ ११ ॥ माता च पार्वती देवी पिता देवो महेश्वरः । बांधवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥ १२ ॥ इति श्रीमच्छंकराचार्यविरचितं अन्नपूर्णाष्टकस्तोत्रं संपूर्णम् ॥

८४. राधाकवचम् ।

श्रीगणेशाय नमः ॥ पार्वत्युवाच । कैलासवासिन् भगवन् भक्तानुग्रहकारक । राधिकाकवचं पुण्यं कथयस्व मम प्रभो ॥ १ ॥ यद्यस्ति करुणा नाथ त्राहि मां दुःखतो

भयात् । त्वमेव शरणं नाथ शूलपाणे पिनाकधृक् ॥ २ ॥ शिव उवाच । शृणुष्व गिरिजे तुभ्यं कवचं पूर्वसूचितम् । सर्वरक्षाकरं पुण्यं सर्वहत्याहरं परम् ॥ ३ ॥ हरिभक्तिप्रदं साक्षाद्भुक्तिमुक्तिप्रसाधनम् । त्रैलोक्याकर्षणं देवि हरिसान्निध्यकारकम् ॥ ४ ॥ सर्वत्र जयदं देवि सर्वशत्रुभयावहम् । सर्वेषां चैव भूतानां मनोवृत्तिहरं परम् ॥५॥ चतुर्धा मुक्तिजनकं सदानंदकरं परम् । राजसूयाश्वमेधानां यज्ञानां फलदायकम् ॥ ६ ॥ इदं कवचमज्ञात्वा राधामंत्रं च यो जपेत् । स नाप्नोति फलं तस्य विघ्नास्तस्य पदे पदे ॥ ७ ॥ ऋषिरस्य महादेवोऽनुष्टुप् छंदश्च कीर्तितम् । राधास्य देवता प्रोक्ता रां बीजं कीलकं स्मृतम् ॥ ८ ॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः । श्रीराधा मे शिरः पातु ललाटं राधिका तथा ॥९॥ श्रीमती नेत्रयुगलं कर्णौ गोपेंद्रनंदिनी । हरिप्रिया नासिकां च भ्रूयुगं शशिशोभना ॥ १० ॥ ओष्ठं पातु कृपादेवी अधरं गोपिका तथा । वृषभानुसुता दंतांश्चिबुकं गोपनंदिनी ॥ ११ ॥ चंद्रावली पातु गंडं जिह्वां कृष्णप्रिया तथा । कंठं पातु हरिप्राणा हृदयं विजया तथा ॥ १२ ॥ बाहू द्वौ चंद्रवदना उदरं सुबलस्वसा । कोटियोगान्विता पातु पादौ सौभद्रिका तथा ॥ १३ ॥ नखांश्चंद्रमुखी पातु गुल्फौ गोपालवल्लभा । नखान् विधुमुखी देवी गोपी

पादतलं तथा ॥ १४ ॥ शुभप्रदा पातु पृष्ठं कुक्षौ श्रीकांतवल्लभा। जानुदेशं जया पातु हरिणी पातु सर्वतः ॥ १५ ॥ वाक्यं वाणी सदा पातु धनागारं धनेश्वरी। पूर्वां दिशं कृष्णरता कृष्णप्राणा च पश्चिमाम् ॥ १६ ॥ उत्तरां हरिता पातु दक्षिणां वृषभानुजा। चंद्रावली नैशमेव दिवा क्ष्वेडितमेखला ॥ १७ ॥ सौभाग्यदा मध्यदिने सायाह्ने कामरूपिणी। रौद्री प्रातः पातु मां हि गोपिनी रजनीक्षये ॥ १८ ॥ हेतुदा संगवे पातु केतुमाला दिवार्धके। शेषाऽपराह्नसमये शमिता सर्वसंधिषु ॥ १९ ॥ योगिनी भोगसमये रतौ रतिप्रदा सदा। कामेशी कौतुके नित्यं योगे रत्नावली मम ॥ २० ॥ सर्वदा सर्वकार्येषु राधिका कृष्णमानसा। इत्येतत्कथितं देवि कवचं परमाद्भुतम् ॥ २१ ॥ सर्वरक्षाकरं नाम महारक्षाकरं परम्। प्रातर्मध्याह्नसमये सायाह्ने प्रपठेद्यदि ॥ २२ ॥ सर्वार्थसिद्धिस्तस्य स्याद्यद्यन्मनसि वर्तते। राजद्वारे सभायां च संग्रामे शत्रुसंकटे ॥ २३ ॥ प्राणार्थनाशसमये यः पटेत्प्रयतो नरः। तस्य सिद्धिर्भवेद्देवि न भयं विद्यते क्वचित् ॥ २४ ॥ आराधिता राधिका च तेन सत्यं न संशयः। गंगास्नानाद्धरेर्नामग्रहणाद्यत्फलं लभेत् ॥ २५ ॥ तत्फलं तस्य भवति यः पठेत्प्रयतः शुचिः। हरिद्रारोचनाचंद्रमंडितं हरिचंदनम् ॥ २६ ॥ कृत्वा लिखित्वा भूर्जे

च धारयेन्मस्तके भुजे । कंठे वा देवदेवेशि स हरिर्नात्र संशयः ॥ २७ ॥ कवचस्य प्रसादेन ब्रह्मा सृष्टिं स्थितिं हरिः । संहारं चाहं नियतं करोमि कुरुते तथा ॥ २८ ॥ वैष्णवाय विशुद्धाय विरागगुणशालिने । दद्यात्कवचमव्यग्रमन्यथा नाशमाप्नुयात् ॥ २९ ॥ इति श्रीनारदपंचरात्रे ज्ञानामृतसारे राधाकवचं समाप्तम् ॥

८५. भगवत्यष्टकम् ।

श्रीगणेशाय नमः ॥ नमोस्तु ते सरस्वति त्रिशूलचक्रधारिणी सितांबरावृते शुभे मृगेंद्रपीठसंस्थिते । सुवर्णबंधुराधरे सुझल्लरीशिरोरुहे सुवर्णपद्मभूषिते नमोस्तु ते महेश्वरि ॥ १ ॥ पितामहादिभिर्नुते स्वकांतिलुप्तचंद्रभे सरत्नमालया वृते भवाब्धिकष्टहारिणि । तमालहस्तमंडिते तमालभालशोभिते गिरामगोचरे इले नमोस्तु० ॥ २ ॥ स्वभक्तवत्सलेऽनघे सदाऽपवर्गभोगदे दरिद्रदुःखहारिणि त्रिलोकशंकरीश्वरि । भवानि भीमअंबिके प्रचंडतेजउज्वले भुजाकलापमंडिते नमोस्तु० ॥३॥ प्रपन्नभीतिनाशिके प्रसूनमाल्यकंधरे धियस्तमोनिवारिके विशुद्धबुद्धिकारिके । सुरार्चितांघ्रिपंकजे प्रचंडविक्रमेऽक्षरे विशालपद्मलोचने नमोस्तु० ॥४॥ हतस्त्वया स दैत्यधूम्रलोचनो यदा रणे तदा प्रसूनवृष्टयस्त्रिविष्टपे सुरैः कृताः । निरीक्ष्य तत्र ते प्रभामलज्जत प्रभाकरस्त्वये दयाकरे ध्रुवे

नमोस्तु० ॥ ५ ॥ ननाद केसरी यदा चचाल मेदिनी तदा जगाम दैत्यनायकः स्वसेनया द्रुतं भिया । सकोपकंपदच्छदे सचंडमुंडघातिके मृगेंद्रनादनादिते नमोस्तु० ॥ ६ ॥ कुचंदनार्चितालके सितोष्णवारणाधरे सवर्करानने वरे निशुंभशुंभमर्दिके । प्रसीद चंडिके अजे समस्तदोषघातिके शुभामतिप्रदेऽचले नमोस्तु० ॥ ७ ॥ त्वमेव विश्वधारिणी त्वमेव विश्वकारिणी त्वमेव सर्वहारिणी न गम्यसेऽजितात्मभिः । दिवौकसां हिते रता करोषि दैत्यनाशनं शताक्षि रक्तदंतिके नमोस्तु० ॥ ८ ॥ पठंति ये समाहिता इमं स्तवं सदा नरा अनन्यभक्तिसंयुता अहर्मुखेऽनुवासरम् । भवंति ते तु पंडिताः सुपुत्रधान्यसंयुताः कलत्रभूतिसंयुता व्रजंति चामृतं सुखम् ॥ ९ ॥ इति श्रीमद्रामदासपूज्यपादशिष्यश्रीमद्धंसदासशिष्येणामरदासाख्यकविना विरचितं भगवत्यष्टकं समाप्तम् ॥

८६. संकटानामाष्टकम् ।

श्रीगणेशाय नमः ॥ ॐनारद उवाच । जैगीषव्य मुनिश्रेष्ठ सर्वज्ञ सुखदायक । आख्यातानि सुपुण्यानि श्रुतानि त्वत्प्रसादतः ॥ १ ॥ न तृप्तिमधिगच्छामि तव वागमृतेन च । वदस्वैकं महाभाग संकटाख्यानमुत्तमम् ॥ २ ॥ इति तस्य वचः श्रुत्वा जैगीषव्योऽब्रवीत्ततः । संकष्टना-

शनं स्तोत्रं शृणु देवर्षिसत्तम ॥ ३ ॥ द्वापरे तु परावृत्ते भ्रष्टराज्यो युधिष्ठिरः । भ्रातृभिः सहितो राज्यनिर्वेदं परमं गतः ॥ ४ ॥ तदानीं तु ततः काशीं पुरीं यातो महामुनिः । मार्कंडेय इति ख्यातः सह शिष्यैर्महायशाः ॥५॥ तं दृष्ट्वा स समुत्थाय प्रणिपत्य सुपूजितः । किमर्थं म्लानवदन एतत्त्वं मां निवेदय ॥ ६ ॥ युधिष्ठिर उवाच । संकष्टं मे महत्प्राप्तमेतादृग्वदनं ततः । एतन्निवारणोपायं किंचिद्ब्रूहि मुने मम ॥ ७ ॥ मार्कंडेय उवाच । आनंदकानने देवी संकटा नाम विश्रुता । वीरेश्वरोत्तरे भागे पूर्वं चन्द्रेश्वरस्य च ॥ ८ ॥ शृणु नामाष्टकं तस्याः सर्वसिद्धिकरं नृणाम् । संकटा प्रथमं नाम द्वितीयं विजया तथा ॥ ९ ॥ तृतीयं कामदा प्रोक्तं चतुर्थं दुःखहारिणी । शर्वाणी पंचमं नाम षष्ठं कात्यायनी तथा ॥ १० ॥ सप्तमं भीमनयना सर्वरोगहराऽष्टमम् । नामाष्टकमिदं पुण्यं त्रिसंध्यं श्रद्धयान्वितः ॥ ११ ॥ यः पठेत्पाठयेद्वापि नरो मुच्येत संकटात् । इत्युक्त्वा तु द्विजश्रेष्ठमृषिर्वाराणसीं ययौ ॥१२॥ इति तस्य वचः श्रुत्वा नारदो हर्षनिर्भरः । ततः संपूजितां देवीं वीरेश्वरसमन्विताम् ॥१३॥ भुजैस्तु दशभिर्युक्तां लोचनत्रयभूषिताम् । मालाकमंडलुयुतां पद्मशंखगदायुताम् ॥१४॥ त्रिशूलडमरुधरां खड्गचर्मविभूषिताम् । वरदाभयहस्तां तां प्रणम्य विधिनंदनः ॥१५॥

वारत्रयं गृहीत्वा तु ततो विष्णुपुरं ययौ । एतत्स्तोत्रस्य पठनं पुत्रपौत्रविवर्धनम् ॥ १६ ॥ संकष्टनाशनं चैव त्रिषु लोकेषु विश्रुतम् । गोपनीयं प्रयत्नेन महावंध्याप्रसूतिकृत् ॥१७॥ इति श्रीपद्मपुराणे संकटानामाष्टकं संपूर्णम् ॥

८७. लक्ष्मीलहरिः ।

श्रीगणेशाय नमः ॥ समुन्मीलन्नीलांबुजनिकरनीराजितरुचामपांगानां भृंगैरमृतलहरीश्रेणिमसृणैः । ह्रिया हीनं दीनं भृशमुदरलीनं करुणया हरिश्यामा सा मामवतु जडसामाजिकमपि ॥ १ ॥ समुन्मीलत्वंतःकरणकरुणोद्गारचतुरः करिप्राणत्राणप्रणयिनि दृगंतस्तव मयि । यमासाद्योन्माद्यद्द्विपनियुतगंडस्थलगलन्मदक्लिन्नद्वारो भवति सुखसारो नरपतिः ॥ २ ॥ उरःस्थस्य भ्रश्यत्कबरभरनिर्यत्सुमनसः पतंति स्वर्गालाः स्मरशरपराधीनमनसः । सुरास्तं गायंति स्फुरिततनुगंगाधरमुखास्तवायं दृक्पातो यदुपरि कृपातो विलसति ॥ ३ ॥ समीपे संगीतस्वरमधुरभंगी मृगदृशां विदूरे दानांधद्विरदकलभोद्दामनिनदः । बहिर्द्वारे तेषां भवति हयहेषाकलकलो दृगेषा ते येषामुपरि कमले देवि सदया ॥ ४ ॥ अगण्यैरिंद्राद्यैरपि परमपुण्यैः परिचितो जगज्जन्मस्थानप्रलयरचनाशिल्पनिपुणः । उदंचत्पीयूषांबुधिलहरिलीलामनुहरन्नपांगस्तेऽमंदं मम कलुषवृंदं दलयतु ॥ ५ ॥ नमन्मौलिश्रेणित्रिपुरप-

रिपंथिप्रतिलसत्कपर्दव्यावृत्तिस्फुरितफणिफूत्कारचकितः । लसत्फुल्लांभोजम्रदिमहरणः कोऽपि चरणश्चिरं चेतश्चारी मम भवतु वारीशदुहितुः ॥ ६ ॥ प्रवालानां दीक्षा गुरुरपि च लाक्षारुणरुचां नियंत्री बंधूकद्युतिनिकरबंधूकृतिपटुः । नृणामंतर्ध्वांतं निबिडमपहर्तुं तव किल प्रभातश्रीरेषा चरणरुचिवेषा विजयते ॥ ७ ॥ प्रभातप्रोन्मीलत्कमलवनसंचारसमये शिखाः किंजल्कानां विदधति रुजं यत्र मृदुलः । तदेतन्मातस्ते चरणमरुणश्लाघ्यकरुणं कठोरा मद्वाणी कथमियमिदानीं प्रविशतु ॥ ८ ॥ स्मितज्योत्स्नामज्जद्विजमणिमयूखामृतझरैर्निषिञ्चंतीं विश्वं तव विमलमूर्तिं स्मरति यः । अमंदं स्यंदंते वदनकमलादस्य कृतिनो विविक्तौ वैकल्पाः सततमविकल्पा नवगिरः ॥९॥ शरौ मायाबीजौ हिमकरकलाक्रांतशिरसौ विधायोर्ध्वं बिंदुं स्फुरितमिति बीजं जलधिजे । जपेद्यः स्वच्छंदं स हि पुनरमंदं गजघटामदभ्राम्यद्भृंगैर्मुखरयति वेश्मानि विदुषाम् ॥ १० ॥ स्मरो नामं नाम त्रिजगदभिरामं तव पदं प्रपेदे सिद्धिं यां कथमिव नरस्तां कथयतु । यया पातं पातं पदकमलयोः पर्वतचरो हरो हा रोषार्द्रामनुनयति शैलेंद्रतनयाम् ॥ ११ ॥ हरंतो निःशंकं हिमकरकलानां रुचिरतां किरंतः स्वच्छंदं किरणमयपीयूषनिकरम् । विलुंपंतु प्रौढा हरिहृदयहाराः प्रियतमा ममांतः-

संतापं तव चरणशोणांबुजनखाः ॥ १२ ॥ विषान्माणिक्यानां विगलितनिमेषं निमिषतामममंदं सौंदर्यं तव चरणयोरंबुधिसुते। पदालंकाराणां जयति कलनिक्वाणनपटुरुदंचन्नुद्दामः स्तुतिवचनलीलाकलकलः ॥ १३ ॥ मणिज्योत्स्नाजालैर्निजतनुरुचां मांसलतया जटालं ते जंघायुगलमघभंगाय भवतु। भ्रमन्ती यन्मध्ये दरदलितशोणांबुजरुचां दृशां माला नीराजनमिव विधत्ते सुररिपोः ॥ १४ ॥ हरद्गर्वं सर्वं करिपतिकराणां मृदुतया भृशं भाभिर्दंभं कनकमयरंभावनिरुहाम्। सलज्जानुज्योत्स्नातरणिपरिणद्धं जलधिजे तवोरुद्वंद्वं नः श्लथयतु भवोरुज्वरभयम् ॥ १५ ॥ कलक्वाणां कांचीं मणिगणजटालामधिवहन्वसानः कौसुंभं वसनमसनं कौस्तुभरुचाम्। मुनिव्रातैः प्रातः शुचिवचनजातैरतिनुतं नितंबस्ते बिंबं हसति नवसंबांबरमणेः ॥ १६ ॥ जगन्मिथ्याभूतं मम निगदतां वेदवचसामभिप्रायो नाद्यावधि हृदयमध्याविशदियम्। इदानीं विश्वेषां जनकमुदरं ते विमृशतो विसंदेहं चेतोऽजनि गरुडकेतोः प्रियतमे ॥ १७ ॥ अनल्पैर्वादींद्रैरगणितमहायुक्तिनिवहैर्निरस्ताविस्तारं क्वचिदकलयंती तनुमपि। असत्ख्यातिव्याख्याधिकचतुरिमाख्यातमहिमावलग्ने लग्नेयं सुगतमतसिद्धांतसरणिः ॥ १८ ॥ निदानं शृंगारप्रकरमकरंदस्य कमले महानेवालंबो हरि-

नयनरोलंबवरयोः । निधानं शोभानां निधनमनुतापस्य जगतो जवेनाभीतिं मे दिशतु तव नाभीसरसिजम् ॥ १९ ॥ गभीरामुद्वेलां प्रथमरसकल्लोलमिलितां विगाढुं ते नाभीविमलसरसीं गौर्मम मनाक् । पदं यावद्यस्यत्यहह विनिमग्नैव सहसा नहि क्षेमं सूते गुरुमहिमभूतेष्वविनयः ॥ २० ॥ कुचौ ते दुग्धांभोनिधिकुलशिखामंडनमणे हरेते सौभाग्यं यदि सुरगिरेश्चित्रमिह किम् । त्रिलोकीलावण्याहरणनवलीलानिपुणयोर्ययोर्दत्ते भूयः करमखिलनाथो मधुरिपुः ॥ २१॥ हरक्रोधत्रस्यन्मदननवदुर्गद्वयतुलां दधत्कोकद्वंद्वद्युतिदमनदीक्षाधिगुरुताम् । तवैतद्वक्षोजद्वितयमरविंदाक्षमहिले मम स्वांतध्वांतं किमपि च नितांतं गमयतु ॥ २२ ॥ अनेकब्रह्मांडस्थितिनियमलीलाविलसिते दयापीयूषांभोनिधिसहजसंवासभवने । विधोश्चित्तायामे हृदयकमले ते तु कमले मनाङ् मन्निस्तारस्मृतिरपि च कोणे निवसतु ॥ २३ ॥ मृणालीनां लीलाः सहजलवणिम्ना लवयतां चतुर्णां सौभाग्यं तव जननि दोष्णां वदतु कः । लुठंति स्वच्छंदं मरकतशिलामांसलरुचः श्रुतीनां स्पर्धां ये दधत इव कंठे मधुरिपोः ॥ २४ ॥ अलभ्यं सौरभ्यं कविकुलनमस्या रुचिरता तथापि त्वद्धस्ते निवसदरविंदं विकसितम् । कलापे काव्यानां प्रकृतिकमनीयस्तुतिविधौ गुणोत्कर्षाधानं प्रथितमुपमानं

स्रसजनि ॥ २५ ॥ अनल्पं जल्पंतु प्रतिहतधियः पल्ल-
वतुलां रसज्ञामज्ञानां क इव कमले संथरयतु । तपंतु
श्रीमीक्षावितरणवशीभूतजगतां कराणां सौभाग्यं तव
तुलयितुं तुंगरसनाः ॥ २६ ॥ समाहारः श्रीणां विरचित-
विहारो हरिदृशां परीहारो भक्तप्रभवभवसंतापसरणेः ।
प्रहारः सर्वासामपि च विपदां विष्णुदयिते ममोद्धारो-
पायं तव सपदि हारो विसृशतु ॥ २७ ॥ अलंकुर्वाणानां
मणिगणघृणीनां लवणिमा यदीयाभिर्भाभिर्भजति महि-
मानं लघुरपि । सुपर्वश्रेणीनां जनितपरसौभाग्यविभवा-
स्तवांगुल्यस्ता मे ददतु हरिवामेऽभिलषितम् ॥ २८ ॥
तपस्तेपे तीव्रं किमपि परितप्य प्रतिदिनं तव श्रीवालक्ष्मी-
लवपरिचयादाप्तविभवम् ।' हरिः कंबुं चुंबत्यथ वहति
पाणौ किमधिकं वदामस्तत्रायं प्रणयवशतोऽस्यै स्पृहयति
॥ २९ ॥ अभेदप्रत्यूहः सकलहरिदुल्लासनविधिर्वि-
लीनो लोकानां स हि नयनतापोऽपि कमले । तवा-
स्मिन्पीयूषं किरति वदने रम्यवदने कुतो हेतोश्चेतो
विधुरयमुदेति स जलधेः ॥ ३० ॥ मुखांभोजे मंदस्मि-
तमधुरकांत्या विकसतां द्विजानां ते हीरावलिविहित-
नीराजनरुचाम् । इयं ज्योत्स्ना कापि स्रवदमृतसंदोह-
सरसा ममोद्यद्दारिद्र्यज्वरतरुणतापं तिरयतु ॥ ३१ ॥ कुलैः
कस्तूरीणां भृशमनिशमाशास्यमपि च प्रभातप्रोन्मील-

न्नलिननिवहैरश्रुतचरम् । वहंतः सौरभ्यं मृदुगति-
विलासा मम शिवं तव श्वासा नासापुटविहितवासा
विदधताम् ॥ ३२ ॥ कपोले ते दोलायितललितलोला-
लकवृते विमुक्ताद्धम्मिल्लादभिलसति मुक्तावलिरियम् ।
स्वकीयानां बंदीकृतमसहमानैरिव बलान्निबध्योर्ध्वं कृष्टा
तिमिरनिकुरंबैर्विधुकला ॥ ३३ ॥ प्रसादो यस्यायं
नमदमितगीर्वाणमुकुटप्रसर्पज्ज्योत्स्नाभिश्चरणतलपीठार्चित-
विधिः । दृगंभोजं तत्ते गतिहसितमत्तेभगमने वने
लीनैर्दीनैः कथय कथमीयादिह तुलाम् ॥ ३४ ॥ दुरापा
दुर्वृत्तैर्दुरितदमने दारणभरा दयार्द्रा दीनानामुपरि
दलदिंदीवरनिभा । दहंती दारिद्र्यद्रुमकुलमुदारद्रविणदा
त्वदीया दृष्टिर्मे जननि दुरदृष्टं दलयतु ॥ ३५ ॥ तव श्रोत्रे
फुल्लोत्पलसकलसौभाग्यजयिनी सदैव श्रीनारायणगुण-
गणौघप्रणयिनी । रवैर्दीनां लीनामनिशमवधानातिश-
यिनीं ममाप्येतां वाचं जलधितनये गोचरयताम् ॥ ३६ ॥
प्रभाजालैः प्राभातिकदिनकराभापनयनं तवेदं खेदं मे
विघटयतु ताटंकयुगलम् । महिम्ना यस्यायं प्रलयसम-
येऽपि क्रतुभुजां जगत्पायं पायं स्वपिति निरपायं तव
पतिः ॥ ३७ ॥ निवासो मुक्तानां निबिडतरनीलांबुदनिभ-
स्तवायं धम्मिल्लो विमलयतु मल्लोचनयुगम् । भृशं यस्मि-
न्कालागुरुबहुलसौरभ्यनिवहैः पतंति श्रीभिक्षार्थिन इव

मदांधा मधुलिहः ॥३८॥ विलग्नौ ते पार्श्वद्वयपरिसरे मत्तकरिणौ करोन्नीतैरंचन्मणिकलशमुग्धास्यगलितैः । निषिंचंतौ मुक्तामणिगणचयैस्त्वां जलकणैर्नमस्यामो दामोदरगृहिणि दारिद्र्यदलिताः ॥ ३९ ॥ अये मातर्लक्ष्मि त्वदरुणपदांभोजनिकटे लुठंतं बालं मामविरलगलद्बाष्पजटिलम् । सुधासेकस्निग्धैरतिमसृणमुग्धैः करतलैः स्पृशंती मारोदीरिति वद समाश्वास्यसि कदा ॥ ४० ॥ रमे पद्मे लक्ष्मि प्रणतजनकल्पद्रुमलते सुधांभोधेः पुत्रि त्रिदशनिकरोपास्तचरणे । परे नित्यं मातर्गुणमयि परब्रह्ममहिले जगन्नाथस्याकर्णय मृदुलवर्णावलिमिमाम् ॥ ४१ ॥ इति पंडितराजश्रीजगन्नाथविरचिता लक्ष्मीलहरिः समाप्ता ॥

८८. अम्बाष्टकम् ।

श्रीगणेशाय नमः ॥ चेटीभवन्निखिलखेटीकदंबतरुवाटीषु नाकिपटलीकोटीरचारुतरकोटीमणीकिरणकोटीकरंबितपदा । पाटीरगंधकुचशाटी कवित्वपरिपाटीमगाधिपसुता घोटी कुलादधिकधाटीमुदारमुखवीटीरसेन तनुताम् ॥ १ ॥ कूलातिगामिभयतूलावलिज्वलनकीला निजस्तुतिविधाकोलाहलक्षपितकालामरी कशलकीलालपोषणनभाः । स्थूला कुचे जलदनीला कचे कलितलीला कदम्बविपिने शूलायुधप्रणतिशीला विभातु हृदि शैलाधिराजतनया ॥ २ ॥ यत्राशयो लगति तन्नागजा

वसतु कुत्रापि निस्तुलशुका सुत्रामकालमुखसत्राशनप्रकरसुत्राणकारिचरणा । छत्रानिलातिरयपत्राभिरामगुणमित्रावरीसमवधूः कुत्रासहन्मणिविचित्राकृतिः स्फुरितपुत्रादिदाननिपुणा ॥ ३ ॥ द्वैपायनप्रभृतिशापायुधत्रिदिवसोपानधूलिचरणा पापापहस्वमनुजापानुलीनजनतापापनोदनिपुणा । नीपालया सुरभिधूपालका दुरितकूपादुदंचयतु मां रूपाभिका शिखरिभूपालवंशमणिदीपायिता भगवती ॥ ४ ॥ यालीभिरात्मतनुताली सकृत्प्रियकपालीषु खेलति भयव्यालीनकुल्यसितचूलीभरा चरणधूलीलसन्मुनिवरा । बालीभृति श्रवसि तालीदलं वहति यालीकशोभितिलका सालीकरोतु मम काली मनः स्वपदनालीकसेवनविधौ ॥ ५ ॥ न्यंकाकरे वपुषि कंकादिरक्तपुषि कंकादिपक्षिविषये त्वं कामनामयसि किं कारणं हृदयपंकारिमेहि गिरिजाम् । शंकाशिलानिशितटंकायमानपदसंकाशमानसुमनो झंकारिमानततिसंकानुपेतशशिसंकाशिवक्त्रकमलाम् ॥ ६ ॥ कुंबावतीसमविडंबा गलेन नवतुंबाभवीणसविधा शं बाहुलेयशशिबिंबाधिरासमुखसंबाधितस्तनभरा । अंबा कुरंगमदजंबालरोचिरिह लंबालका दिशतु मे बिंबाधरा विनतशंबायुधादिनकुरंबा कदंबविपिने ॥ ७ ॥ इंधानकीरमणिबंधा भवे हृदयबंधावतीव रसिका संधावती भुवनसंधारणेऽप्यमृतसिंधावुदा-

पनिलया । गंधानुभानमुहुरंधालिवीतकचबंधा समर्पयतु मे शं धाम भानुमपि संधानमाशुपदसंधानमप्यगसुता ॥ ८ ॥ इति श्रीशंकराचार्यविरचितसंबाष्टकं समाप्तम् ॥

८९. श्रीस्तोत्रम् ।

श्रीगणेशाय नमः ॥ पुष्कर उवाच ॥ राजलक्ष्मीस्थिरत्वाय यथेन्द्रेण पुरा श्रियः । स्तुतिः कृता तथा राजन् जयार्थं स्तुतिमाचरेत् ॥ १ ॥ इंद्र उवाच । नमोस्तु सर्वलोकानां जननीमब्धिसंभवाम् । श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षःस्थलस्थिताम् ॥ २ ॥ त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनी । संध्या रात्रिः प्रभा मूर्तिर्मेधा श्रद्धा सरस्वती ॥ ३ ॥ यज्ञविद्या महाविद्या गुह्यविद्या च शोभने । आत्मविद्या च देवी त्वं विमुक्तिफलदायिनी ॥ ४ ॥ आन्वीक्षिकी त्रयी वार्ता दंडनीतिस्त्वमेव च । सौम्यासौम्यैर्जगद्रूपैस्त्वयैतद्देवि पूरितम् ॥ ५ ॥ का त्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः । अध्यास्ते देवदेवस्य योगिचिंत्यं गदाभृतः ॥ ६ ॥ त्वया देवि परित्यक्तं सकलं भुवनत्रयम् । विनष्टप्रायमभवत् त्वयेदानीं समेधितम् ॥ ७ ॥ दाराः पुत्रास्तथागारं सुहृद्धान्यधनादिकम् । भवत्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणाम् ॥ ८ ॥ शरीरारोग्यमैश्वर्यमरिपक्षक्षयः सुखम् । देवि त्वदृष्टिदृष्टानां पुरुषाणां न दुर्लभम् ॥ ९ ॥ त्वमंबा सर्वलोकानां

देवदेवो हरिः पिता। त्वयैतद्विष्णुना चांब जगद्व्याप्तं चराचरम् ॥ १० ॥ मानं कोषं तथा कोष्ठं मा गृहं मा परिच्छदम्। मा शरीरं कलत्रं च त्यजेथाः सर्वपावनि ॥ ११ ॥ मा पुत्रान्मा सुहृद्वर्गान् मा पशून्मा विभूषणम्। त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलालये ॥ १२ ॥ सत्वेन सत्यशौचाभ्यां तथा शीलादिभिर्गुणैः। त्यजंते ते नराः सद्यः संत्यक्ता ये त्वयामले ॥ १३ ॥ त्वयावलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः। कुलैश्वर्यैश्च युज्यंते पुरुषा निर्गुणा अपि ॥ १४ ॥ स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान्। स शूरः स च विक्रांतो यस्त्वया देवि वीक्षितः ॥ १५ ॥ सद्यो वैगुण्यमायांति शीलाद्याः सकला गुणाः। पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ॥ १६ ॥ न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः। प्रसीद देवि पद्माक्षि नास्मांस्त्याक्षीः कदाचन ॥ १७ ॥ पुष्कर उवाच। एवं स्तुता तदा श्रीश्च वरमिंद्राय चेप्सितम्। सुस्थिरत्वं च राज्यस्य संग्रामविजयादिकम् ॥ १८ ॥ स्वस्तोत्रपाठश्रवणकर्तृणां भुक्तिमुक्तिदम्। श्रीस्तोत्रं सततं तस्मात्पठेच्च शृणुयान्नरः ॥ १९ ॥ इति श्रीअग्निपुराणांतर्गतं श्रीस्तोत्रं समाप्तम् ॥

श्रीदत्तस्तोत्राणि ।

ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्तिं
द्वंद्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

दत्तस्तोत्राणि ।

९०. दत्तलहरी ।

श्रीगणेशाय नमः ॥ दलादन ऋषिरुवाच । विभुर्नित्यानंदः श्रुतिगणशिरोवेद्यमहिमा यतो जन्माद्यस्य प्रभवति स मायागुणवतः । सदाधारः सत्यो जयति पुरुषार्थैकफलदः सदा दत्तात्रेयो विहरति मुदा ज्ञानलहरिः ॥ १ ॥ हरीशब्रह्माणः पदकमलपूजां विदधते जगद्रक्षाशिक्षाजननकरणे ते ह्यधिकृताः । अभूवन्निंद्राद्या हरिदधिपतां देवमुनयः परं तत्त्वं प्रापुः शशिदिनकरौ ज्योतिरमलम् ॥ २ ॥ परं ज्योतिर्मूर्तेस्तव रुचिरतेजः कलरवाज्जगद्व्याप्येदानीं तपनशशिताराहुतभुजः । महातेजःपुंजाः सकलजगदाराध्यचरिताश्चरंत्येवं लोकान्नतजनमनोभीष्टफलदाः ॥ ३ ॥ भवन्मायारूपं जगदखिलजीवात्मकमिदं भवद्रूपं प्राहुर्निखिलनिगमांतश्रुतिचयाः । त्वया सृष्टं चादौ हृतमवितमेतत्तदधुना प्रभावं ते वेत्तुं प्रभवति जनः कोऽवनितले ॥ ४ ॥ कृपासिंधो तावज्जनुरजननस्याप्यकथिते जगद्रक्षादीक्षा भवति खलु नो चेत्कथमिदम् । अनीहस्याऽकर्तुस्तव जगति कर्मोपकृतये प्रमाणीकर्तुं वा स्वकृतनिगमार्थानिति मतिः ॥ ५ ॥ महाविद्यारूपे भगवति निबद्धत्वमुचितं हृदा वाचागम्ये परमपि विमुह्यंति कवयः । अविद्यातीतः किं यदि गुणविहीनोपि गुणवानविद्यायुक्तोयं त्विति वदति

मायामुषितधीः ॥ ६ ॥ भवानादौ यादोनरमृगखगाश्वादिकतनूर्विधत्ते लोकानामवनकृतिहेतोरनुयुगम् । विशुद्धस्त्वं लीलानरवपुरिदानीमटसि गां पवित्रीकर्तुं वा परिजननिवासांगणतलम् ॥ ७ ॥ जगद्रक्षार्थं वा विचरसि जगत्यात्मजनतापरित्राणायाद्यः परमपुरुषोऽगम्यचरितः । मृपालोको लोको वदति मनुजत्वं तदधुना यथा श्रीकृष्णं त्वां यदुषु ब्रुवते मूढमतयः ॥ ८ ॥ महायोगाधीशैरविदितमहायोगचतुरं कथं जानंति त्वां कुटिलमतयो मादृशजनाः । तथापि त्वां जाने तव पदयुगांभोजभजनान्न चेत्त्वत्पादाब्जस्मृतिविषयवाणी कथमभूत् ॥ ९ ॥ अपारे संसारे सुतहितकलत्रादिभरणाद्युपाधौ मग्नास्तत्तरणकरणोपायरहिताः । पतंति त्वत्पादांबुजयुगलसेवासु विमुखा नराः पापात्मानः प्रवरनरके शोकनिलये ॥ १० ॥ सुधासिंधौ द्वीपे कनककलिते कल्पकवने वितानैर्मुक्ताढ्यैर्नवमणिमये मंडपवरे । अशेषैर्माणिक्यैः खचितहरिपीठेऽब्जकुहरे हुताशारे ध्यायेत्तव परममूर्तिं निखिलदाम् ॥ ११ ॥ धराधाराधारे हुतवहपुरेधीशगणपं विधिं श्रीशेशौर्वानलपवनव्योमानि हृदये । युतौ जीवात्मानावधिकमवमत्या प्रविशते विधत्ते ज्यायस्त्वं परकलितवामेन वपुषा ॥ १२ ॥ सहस्रारे नीरेरुहि सकलशीतांशुललिते सहंसे हंसं यः स्फुटमपि भवंतं कलयते । सुषुम्नावर्तिन्या तव चरणपीठेंदुसुधयाप्लुतो भित्त्वा

ग्रंथित्रयममृतरूपो विचरति ॥ १३ ॥ तवाधारे शक्तिक्षितिकमठकर्माद्यभिवृते महापीठे वैश्वानरपुरमरुद्देहनिलये । धराव्योमाकल्पे सुरमुनिमहेंद्राद्यभिनुतं महातेजोराशिं निगमनिलयं नौमि हृदये ॥ १४ ॥ भवत्पादांभोजं भवजलधिपोतं भजति यो महासंसाराब्धिं तरति तरतीत्येव निगमः । इहामुत्र त्रातुं तव चरणसेवात्मशरणं भजे भीतश्चाहंकृतिपरमनस्कोऽहमधुना ॥ १५ ॥ यथा दारुष्वग्निर्निवसति तथा देहनिकरे प्रविश्य त्वं चैको बहुविध इवाभासि भगवन् । चलन्नीरे चंद्रः शतविध इवाभाति गुणतो न चैतच्चंद्रे स्यान्न शतविधता नापि चलनम् ॥ १६ ॥ दरिद्रो वा मूढः कठिनहृदयो वापि भवतां दयापात्रं स्याच्चेद्भजति महतामप्यधिकताम् । न विद्या रूपं वा न कुलमपि वा कारणमभून्महत्त्वे सेवैका तव पदयुगांभोजकलना ॥ १७ ॥ न ते कारुण्यं स्यात्सकलगुणवानप्यगुणवान् भवत्कारुण्यं स्यादगुणगुणपो वोरुगुणवान् । यथा पत्यौ रक्ते सदपि च विरक्ते तु युवतौ वृथा सौंदर्यं स्यात्सकलमपि तेऽनुग्रहवशात् ॥ १८ ॥ अनाथे दीने मय्यधिगतभवत्पादशरणे शरण्य ब्रह्मण्यप्रथितगुणसिंधो कुरु दयाम् । महातेजोवार्धे स्वसुकृतमहिम्नैव सततं पुरा पुण्यैर्हीनं पुरुषमुपकुर्वंति कृतिनः ॥ १९ ॥ महाश्वेतद्वीपेऽमरतरुगणात्यंतरुचिरे मणेः पीठांभोजेऽनलशशिखगांतर्निवसितम् । गदाचक्राब्जासि-

प्रसृतकरपद्मं मुररिपुं स धन्यस्त्वां ध्यायेत्परतरचिदानंदवपुषम् ॥२०॥ लसन्मेरोः शृंगे सुरमणिमये कल्पकतरुप्रकीर्णे वाक्पीठे रविशशिकराकीर्णजलजे । स्थितं वाचाधीशैर्नुतमनुदिनं त्वां भजति यो भवेद्वाणीशानामपि गुरुरजेयोऽवनितले ॥२१॥ समुद्यद्बालार्कायुतनिभशरीरं मुनिवरं स्थितं बीजे मारे त्रिदशपतिगोपातिरुचिरे । यदि त्वां यः पंचायुधकरमिति ध्यायति सदा स एवाहं नूनं स भवति जगन्मोहनकरः ॥ २२ ॥ निधिर्विश्वेषां त्वं निजचरणपद्मद्वयवतां शरण्यश्चार्तानां चकितहृदयानामभयदः । वरेण्यः साधूनां वरद इति वा कामितधियां भवत्सेवा जंतोः सुरतरुसमानानुफलति ॥ २३ ॥ यथा वै पांचाली नटति कुहकेच्छानुसरणं कुलालेन भ्रांतं भ्रमति च सकृच्चक्रमनिशम् । तथा विश्वं सर्वं भवति मनवश्चानुगुणिताः स्वतंत्रः को वास्ते वद परसुरेश त्रिभुवने ॥२४॥ त्वयाज्ञप्तो धाता सृजति जगदीशोऽपि हरते हरिः पुष्णातीदं तपति तपनो वाति पवनः । धरां साद्रिद्वीपां वहति भुजगानामधिपतिः सुराः सर्वे युष्मद्भयपरवशाद्बिभ्रति बलिम् ॥२५॥ स्वयं मुक्तेः पूर्वं स्वकृतसुकृतं मां नयति चेद्भवान् सत्वंका वा तव चरणपंकेरुहरतिः । हरेस्पापौघं नः शुभमपि दहातीति च धिया भवंत्याशाबद्धाः सकलमपि धातुर्वशमहो ॥ २६ ॥ प्रधानं वा कर्म स्थितिविलयसर्गैलमिति चेज्जडत्वा-

रक्षीणत्वात्कथमुचितमेतन्निगदितुम् । तयोरीशेऽनीशे भवति जगदुत्पत्तिविलयावनान्यासन् ब्रह्मन्निति वदति शास्त्रं श्रुतिरपि ॥ २७ ॥ भवत्सेवा जंतोर्भवदवहुताशांबुदनिभा महामोहध्वांतप्रतिहतमतेर्दीपकलिका । सुधावर्षिण्येषावहितमनसां निर्ममनृणामुपाध्याये ब्रह्मप्रवचनविधानेऽतिचतुरा ॥ २८ ॥ अवज्ञायै लोके बहुपरिचितिः प्राकृतमतिर्निरस्यापो गंगा प्रसरति यथा नाल्पतटिनीम् । विशुद्ध्यर्थं तद्वत् सकलपुरुषार्थैकफलदं भवंतं हित्वान्यं भजति गुरुमाशापरवशः ॥ २९ ॥ निमील्याक्षिद्वंद्वं निगमनिरतो निश्चलमनाः प्रकाशांतं दृष्ट्या त्रिभुवनमुदं ज्ञानपरया । ललाटेधोमुख्या रसजनितदिव्यांजनधरं स्मरेद्यस्त्वां योगी भवति निधिसिद्धेरधिपतिः ॥ ३० ॥ महामायामंत्राक्षरकमलपद्मासनयुतं महानीलच्छायं मधुमुदितयोगिन्यभिवृतम् । दधानं सद्गंधासितकनकगोक्षीरतिलकं मुने यस्त्वां पश्येद्भवति सकलादृश्यकतनुः ॥ ३१ ॥ सुधाधारे हेतौ सकलजगतां स्वर्णकलिते सितांभोजे तेजोधिकतपनबिंबे श्रुतितनौ । मणिप्रोते पीठे निखिलसुरवृंदैः परिवृते स्थितं त्वामारोग्यं स्मरति हृदि तस्यामृतमयम् ॥ ३२ ॥ परत्रादाता चेद्भवति न ददात्यैहिकसुखं ददात्येतत्सौख्यं वितरति न चामुष्मिकसुखम् । भवत्सेवा जंतोरिह परसुखप्राभवकरी सुराणामन्येषामनुसरणमात्मै-

क्यमकरोत् ॥ ३३ ॥ जटी वल्की कापि क्वचिदपि सुभूषांबरभृती क्वचिन्द्भूत्यालिप्तः क्वचिदपि सुगंधांकिततनुः। क्वचिद्योगी भोगी क्वचिदपि विरागी विहरसे बहुज्ञाना ज्ञातुं तव गतिमशक्ताश्च मुनयः ॥ ३४ ॥ विशुद्धं चैतन्यं क्वचन जडवत्कापि सकलागमज्ञोऽप्यज्ञस्याद्विहरसि कदाचिद्बहुविधः। ऋषिभ्यस्त्वं तत्त्वं परममुपदेष्टासि विततं चरित्रं ते वेत्तुं चतुरधिकवक्त्रा न चतुराः ॥३५॥ मणिर्वा मंत्रो वा विविधविमलैश्वर्यमपि वा महायोगोष्टांगाभ्यसनविहितो वा त्रिभुवनम्। समर्थं चैकैकं प्रभवति वशीकर्तुमधिकं स्थितं त्वय्येवेदं तव किमुत लोकैकवशता ॥ ३६ ॥ सरस्वत्याधारस्थितमरुदतिप्रेरितपरां नृपो धारां भित्त्वा रसकमलवासाधिपपुरी। परं तेजोरूपं सकलभुवनालोकनिरतो भवंतं सद्योगात्परमसमवेतं मुनिपतिः ॥ ३७ ॥ अपां तत्त्वं हंसं सकलभवदेवे जलरुहे तडिद्भास्वद्दीप्तिप्रकटदलषट्के सुललिते। परं स्वाधिष्ठाने रुचिरतररूपं निरुपमं स्थितं ध्यायेत्त्वां यो मदनसमरूपो विजयते ॥ ३८ ॥ परीतं त्वां विष्णो हुतहवनमायाविलसिते सरोजे नीलाभे मणिरचितपीठे मणिगृहे। महासिद्धैः कल्पद्रुमवरतले स्वर्णनिचयात्प्रवर्षद्भिः सस्यात्परमतनुभूतिः स्मरति यः ॥ ३९ ॥ मरुत्ताराप्राभे कनकरुचिपद्मे श्रुतिमयं प्रभुं लोकातीतं निखिलनिगमावेद्यचरितम्। भजंते ये त्वां ते सुदृढतरतादा-

त्र्यकदृशां चिदानंदं मायागुणविरहितं यांति परमम् ॥४०॥
सुधाशुद्धे व्योम्नि द्रुहिणरमणीवीजलसिते विशुद्धांभोजांते
सुरनरखगाद्यंतरहितम् । भवंतं भावोत्थैः कुसुमसुखपूजो-
पकरणैः समर्हंल्लोके नाऽद्वितयपरमं ब्रह्म भजते ॥ ४१ ॥
तडिल्लेखाशोचिर्द्विदलकमले भासि परमो महायुक्तानां गो-
नलशशभृतोक्षीणि भवतः । अशेषस्रोतःसु प्रसृतचितिरू-
पोंगकनकः श्रुतिप्राणोष्टांगप्रगुणितकलापीठनिलयः ॥ ४२ ॥
क्वचिद्गुह्यं जिह्वा क्व च गुदकमन्यत्र कविता क्वचिद्घ्राणमन्यत्र
श्रुतिरपरतो लोचनयुगम् । समाकर्षंत्यात्मानमिव बहु-
भार्याः प्रलुभितास्ततो ध्यातुं स्थातुं कथमपि न शक्त-
स्तव पदम् ॥४३॥ अशक्तोहं स्नातुं क्षणमपि जपं कर्तुमपि
वौदनाभावादेवातिथिजनसपर्या च न कृता । कुतो ज्ञानं
ध्यानं त्वकृतगुरुसेवस्य मम भो भवेदेवैकाशा वसति तव
भक्तत्वजनिता ॥ ४४ ॥ असंदे मंदारद्रुमवरसमीपे मणि-
मये सुखासीनं पीठे सुरवरमुनींद्रादिविनुतम् । स्वहृत्प-
द्मे वापि स्थितमनुदिनं त्वां भजति यः स चेहामुष्मिन्वा
सकलजनपूज्यश्च भवति ॥ ४५ ॥ तृणं मेरुं कुर्यात्सुरवर-
गिरिं वापि च तृणं भवत्सामर्थ्यं वाऽघटितघटनाप्रौढिम-
तनो । इदं जाने तस्मै पुनरपि न जानंति कवयोऽप्यहो
युष्मन्माया सकलजनमोहोन्मदकरी ॥ ४६ ॥ नटो भूयो
वेषैर्बहुविध इवाभाति सगुणो यथैको वाकाशो घटमठगु-

हास्वंतरगतः। यथैकं गांगेयं कटकमुकुटाद्याकृतिवशा-त्तथा दत्तात्रेय त्वमपि बहुरूपस्त्रिभुवनम् ॥ ४७ ॥ सह-स्रांशुप्राभे सुरतरुसमाढ्येऽधिकतरे विमाने हंसाख्ये स्थित-ममृतनीहारवपुषम्। परीतं त्वां ध्यायेद्यदरजसमारूढ-मनिलैरशेषैराज्ञायां भवति खचरो व्योमगमनैः ॥ ४८ ॥ स्थितं मूलाधारे कनकरुचिरांगं हुतभुजः शिखाभिः प्रख्या-भिर्वृतमखिलतेजोरसघटम्। धरंतं भ्रूमध्ये प्रसृतनयनः पश्यति च यः परं त्वां सत्यं स्यादखिलरसविद्यातिनिपुणः ॥ ४९ ॥ शिरःप्रांतभ्रांतायतकुटिलबालार्कमतुलं प्रदीप्तः स्वर्णाढ्यारुणशतलसत्कुंडलधरम्। मरुत्पुत्रं लंकाधिपत-नुजनाशोद्यतकरं स्मरेद्यस्त्वां यंता सकलभयभूतापहरणे ॥५०॥ गरुत्मंतं चंचच्चलकनकपक्षद्वययुतं सुधाकुंभोद्भा-स्वत्करमखिललोकाभिगमनम्। अचिंत्यं वेदैस्त्वां परम-मुनिनाथं स्मरति यः स दक्षोऽसौ वादी कपटविषजंतुप्रह-रणे ॥ ५१ ॥ स्मृतिं निंदंतं ये मनुजमुपतिष्ठंत्यतिबलात्कृ-ताशामिथ्या स्यात्प्रणतजनमंदार भवता। अदत्ते दत्तत्वाद-मलतरचिद्रम्यविभवः सदा दत्तात्रेयो भवसि भजतामि-ष्टफलदः ॥ ५२ ॥ विधिं विष्णुं मायां शशिमदनयोनिं दिनकरं मिलित्वानंगेनानलयुवतियुक्तां जपति यः। त्वदा-ख्यामाख्येयां निखिलनिगमाढ्यामखिलदां स संपद्भिर्देवा-धिपविभवयुक्तो विहरति ॥ ५३ ॥ परामायावाणीमद-

नकमलाबीजसहितं मनुं प्रत्येकं ते जपति सततं निश्चलधिया । यतोऽश्येत्यैश्वर्याश्रुतसकलविद्यानिपुणता वशित्वं ब्रह्मैक्यं सपदि यदि थायात्परमुने ॥ ५४ ॥ अविज्ञातं किंचित्तव जगति नास्ति प्रभवितुस्तदा विज्ञातोऽहं यदपि सकलज्ञेन भवता । अदृष्टं मन्येऽहं प्रतिभटमविज्ञानकरणे मुने दत्तात्रेय प्रकुरु मयि कारुण्यमतुलम् ॥५५॥ भवत्पादांभोजद्वयशुभरसास्वादचतुरा भ्रमद्भृंगीसंघायितहृदयवृद्धिं कलय माम् । अनाधाराधाराश्रितसुरतरो तावकजने मुने कारुण्याब्धे प्रकुरु मयि संपत्प्रकटनम् ॥ ५६ ॥ वदंत्येकेऽपार्थां तव गतिमनेकार्थहरिणीमजानंतो ज्ञेयामनधिगततत्त्वार्थमतयः । महायोगिंल्लोके जडमतिकृते त्वं धृतवपुस्तथा नोचेद्भक्तस्वजनपरिरक्षा कथमहो ॥ ५७ ॥ स्मृतस्त्वच्छिष्यो वा जगति कृतवीर्यस्य तनयोऽर्जुनो राजा चोराद्भयमहिभयं वृश्चिकभयम् । हिनस्त्याजौ शत्रूदितमपि भयं चेति गदितं भवेयुस्त्वच्छिष्याः किमुत हृतचोराधिकभयाः ॥ ५८ ॥ पदानां सेव्यो वा न भवसि यदा किंचन नृणां प्रियः साधूनां त्वं तव च सुहृदस्तेऽपि सुजनाः । मयि त्वार्ते दीने जननमरणाद्यैः कुरु दयां दयावान्को वा मे भ्रमनिगडनिर्मोचनविधौ ॥ ५९ ॥ यथा माता पुत्रं सकलगुणहीनं च कुटिलं प्रपुष्णात्यन्नाद्यैरनुदिनमतीवादरयुता । तथा त्वं लोकानां मम च पितरा-

वित्यभिमतं ततस्त्रातुं दातुं फलमभिमतं चार्हसि विभो ॥ ६० ॥ जडं वाचाधीशं सुधियमपि मूकं च कुरुषे रवेर्वा शीतत्वं यदि च कुरुषे दृष्टिवसतेः । अकर्तुं कर्तुं वान्यदपि परिकर्तुं च मनुषे तदा सर्वं कुर्याः क्वचन किमसाध्यं त्रिभुवने ॥ ६१ ॥ पुमान्यो वै युष्मच्चरणपरिचर्याकृतिपरो महालापास्थानाशनशयनपानानि कुरुते । स वै धन्यो लोके सकलजगदाराध्यगरिमा अहो भाग्यं तस्यागणितयशसः कोपि न भजेत् ॥ ६२ ॥ प्रसादात्ते यस्मिन्प्रबलतरदारिद्र्यविभवः स यायादिंद्रत्वं सकलसुरनारीपरिवृतः । तवोपेक्षा यस्मिन्भवति स सुराणामधिपतिः परत्र ह्यत्यंतं प्रविहतमहैश्वर्यविभवः ॥ ६३ ॥ सदा मंत्रैर्जाप्यः पुनरपि मनूनेव जपसि स्वयं तंत्रध्येयो यदपि कुरुते तंत्रनिचयम् । सदा ब्रह्मानंदामृतजलधिकेलीकलितधीः स भूतेर्भूयस्या भवतु भगवन्नः कुरु दयाम् ॥ ६४ ॥ तुरीयाग्निश्वेतद्युतिदिनकृदर्कैर्मुनिपतेर्महाविद्याखंडैः परियुतमहानुष्टुभमनोः । चतुर्भिश्चक्राब्जांकुशगुणधरं सामि युवतिं नृसिंहं त्वद्रूपं भजति स पुमर्थैकनिलयः ॥ ६५ ॥ मुने ते माणिक्यप्रवरखचिते हेममुकुटे पुरा कल्पध्वंसे परिकलितसूर्यापररुचः । वसंत्यस्मिन्नूनं नहि यदि तदा भूतमुनयो न विद्यंते लोकाः प्रखरतिमिरांतैकचतुराः ॥ ६६ ॥ अहो योगिन्नाना-

मणिखचितभावत्कमुकुटः शिखाग्रालंविन्याश्लिकतलमसौ रत्नशिखरात् । महामेरोर्लीलां कलयति सदा यामकलितां शरत्सौदामिन्याः कटकवरतेजोमयतनोः ॥ ६७ ॥ सुविज्ञातं लोकैरनवधिसदादेशनपरैः सुधाभानोः खंडं तव निबिडभावांधकरणम् । द्वितीयं सोमेंदुस्फुटमुकुटतः कांतमनघं महासूर्तिर्ज्योत्स्ना हरति नतदारिद्र्यतिमिरम् ॥ ६८ ॥ धृतं पुंड्रं मात्रात्रितयरुचिरं साक्षरमिदं सहस्रारे हंसः स्थितपरमहंसाजिगमिषोः । वहंती पादाब्जद्वयसरललाक्षारसपदं पराशक्तेश्चंद्रोपलरचितसोपानपदवी ॥ ६९॥ श्रयेते हंसंते तरुविमलपत्रे मधुकरौ शुभं गर्भांभोजें स्थितमिति सुचित्रं शमनिधे । कठोरेंदुप्रांशुप्रवरनिकरीभूततिमिरं सुधांशुर्भावत्को मुकुलयति विद्युत्कुवलयम् ॥ ७० ॥ तमोभिर्मूकालीगृहमिदमनुज्जृम्भितमिति त्वदीये नेत्राब्जे कमलसदना जृंभितवती । सदा सुज्ञानेनाविशति सदयाक्षि प्रसरति प्रभो यस्मिन्स्यात्ते ध्रुवमतिधनोऽयं मुनिपते ॥ ७१ ॥ यदा योगिन्नीषद्दलिरविलसत्कोरकदृशोरुपांते नीलाली उदरयुगली कंजदलयोः । घरं कारायेते कनकमकरीकुंडलयुगे कटाक्षौ चांपेयस्तबकविचरंताविव वरौ ॥ ७२ ॥ त्रयीविद्यारूपस्त्रितनुरहिमांशुः प्रतिदिनं श्रुती भावत्केचिद्द्विविधमकरीकुंडलपदे । मिलित्वात्मायं ते घनतरमुपाधिद्वयमिति व्यनक्ति

श्रीकारं निखिलजगदुद्दीपकमुने ॥७३॥ कपोलौ यौष्माकौ स्फुटमुकुरबिंबप्रतिभटौ भृशं संघर्षित्वाप्रतिदिनसमारोपितरुचौ। निजा कांतिर्नित्या कनकनिकषोत्यंतमहिमा त्वदीया नीचैव प्रचुरतरकांतिस्तव मुने ॥ ७४ ॥ मुखेंदुं दृष्ट्वा ते यदि विशति राहुं प्रति भयाच्छशी वक्रं प्राप्य द्विगुणितकलानां निधिरभूत्। द्विजानां राजत्वं प्रकटितमतो दत्तशरणीबलेनाहो स्वामिन् कथमपि च लभ्यो हि महिमा ॥ ७५ ॥ तवायं बिंबोष्ठश्चुबुकसहितो विद्रुमलतासमाक्षिप्ता तिर्यग्यदि बहुपदं स्यात्फलयुगम्। व्रजे तत्साम्यं तन्निहितमुत वा पल्लवपदं यदि स्यात्ते नालं तुलयितुमहो संयमिपते ॥ ७६ ॥ भवद्वाणीश्रेणीं श्रवणपुटसौख्यप्रकरणीं विजेतुं वाक् श्रुत्वा स्वयमुत विदित्वाहमिति भाक्। अशक्ता तेऽत्यंतं फणिललितजिह्वाग्रमिषतः प्रविष्टा वक्रांतं सितमणिलसद्विद्रुमगृहम् ॥ ७७ ॥ तवावृत्ता रेखात्रयविलसिता कंबुरभवच्छिराणामाधारः कथमभवदेतन्न यदि चेत्। अथेमामूहेहं त्विति कविहराद्याकृतिधरां तथा नो चेद्वेदत्रितयकलितां वापि गणये ॥ ७८ ॥ महानंतश्चासीद्विषधरवरो वासुकिरसौ निबर्हंतौ मर्त्याधिकभयकरत्वं गणयताम्। भुजाकारौ स्वीयौ तव तु भुजसत्त्वं विदधतां मुने भूतौ स्निग्धौ सपदि वरदौ चाभयकरौ ॥ ७९ ॥ मुने गंगास्रोतोमरवरगिरिप्रस्थफलके

प्रसादे स्वर्णाढ्यं प्रभवदभवद्भागलुलितम् । त्रिसूत्रं सुस्निग्धं धवलमुपवीतं कलयते महायोगिन्मूर्तित्रयमपि विलीनं तदथवा ॥ ८० ॥ प्रसिद्धः स्वर्णाद्रिर्दिवि विबुधवाचावितरणात्प्रशस्तौ ते हस्तावखिलपुरुषार्थप्रकरणात् । जनानां पादाब्जद्वितयमधिकं प्रेम भजतां मुनींद्र त्रैलोक्याद्भुतगणमणिक्षीरजलधे ॥ ८१ ॥ इयं रोम्णां राजिर्विलसति महानाभिसरसः प्रवृत्ता कुल्येव प्रतिपतितभंग्यस्त्रिवलयः । नवालेखालोकत्रयविभजनार्थे विरचिता मुने दत्तात्रेय त्वदुदरविलग्ना विलसिताः ॥ ८२ ॥ ध्रुवं शंपा मौंजीत्रितयवलिरेखावरतनो रुरुक्षोः प्रासादं स्वशय हृदयाख्यं तव हरे । महालक्ष्म्याश्चंचत्कनकमयसोपानपदवी न चेन्नाभीकुंडोपरि चिदुपलब्धा सुपरिखा ॥८३॥ प्रवृत्तावूरू ते लसदुदरलोकव्रजधृतेर्धृतौ तावद्रींद्रस्फुटपट्टकटौ संप्रकटितौ । कटौ विस्तारौ यत्कटकफलकौ ताविव मुने महायोगिन्विश्वंभर इति च नूनं त्वमधिसूः ॥ ८४ ॥ कृपालो विश्वेश त्रिभुवनतले ते प्रमितितो द्विवारात्रौ स्थानं मिलति वपुषो जानुयुगलम् । अभक्तानित्येतत्कथितमभियुक्तैः समतनोः प्रपुष्टं त्वं संप्रत्यपि तदिदमर्थं हि सुदृढम् ॥ ८५ ॥ जगन्मूलं स्रष्टा सकलजगतां सर्गकुशलो भवज्जंघे लक्ष्मीकृदसमशरस्य प्रकुरुते । प्रकृष्टे ते वीक्ष्य भ्रमवदविलक्ष्योऽल्पगुणवान् मुने ते-

नानंगस्तव तु विमुखो लक्षणवतः ॥ ८६ ॥ नराणां नानार्थप्रदरसगुटित्वं च दधतौ मुने गुल्फौ गूढौ तव चरणपुष्ट्या प्रकटितौ । घटावृत्ती नार्या इव सकलकौ वृत्तरुचिरौ विराजेते तेजोनिकरकलितायाः सुवपुषः ॥ ८७ ॥ सदाधारं युष्मत्प्रपदमतिपूज्यं सुरुचिरं ध्रुवात्मानं मत्वा जितमिति सदा कच्छपपतिः । विवेशाधो भूमेर्यदि तदिदमेकं स्मयकरं त्विदानीं तज्जातिर्मुकुलितशिराश्चाभवदहो ॥ ८८ ॥ मया दत्तं किंचिन्न यदि कलितं वासवमहं तदा रोचिर्जातं जननमपि पंकप्रकटिनम् । प्रविश्येत्यायोज्यं न चलति ह यत्तत्पदधिया पदं ते तु श्रीदं सकलसमये श्रीनिलयनम् ॥ ८९ ॥ मुने ते पादाब्जं नवममृतपादोद्भवमहो श्रितस्तत् सोदर्यं पशुपतिशिरोब्जं हिमकरः । निवृत्तं स्वस्यांकं भवति भवदेकात्मवपुषः कथं ब्रह्मागारे परमपुरुषा नांघ्रिभजनाः ॥९०॥ न चित्रं ते पादौ वितरत इति प्रार्थितफलं विधिं श्रीशं रक्षाकलुषविपदं दृश्यमतुलम् । स्मरांतश्रीगंगाधरचरणशंखांबुजसुरद्रुमांश्च त्वद्भावानतजनसदानंदकलनात् ॥ ९१ ॥ त्रिखंडैः श्रीविद्यामनुवरभवैर्भावकरिपो विवृद्धस्ते मंत्रो विषवदतियो ज्योतिरमलम् । षडर्णं चंद्रार्कप्रकररुचि तन्मे प्रभवतां सदा ज्ञानानंदं युवतिनृमयं लोचनपदम् ॥ ९२ ॥ समुन्मीलद्भानुप्रकररुचि वाग्बीजममलं मरुत्वद्गोपाभां मदनलि-

पिसाधारकमले । हृदब्जे शक्त्याख्यं सितकरकराभं शिरसिजे सरोजे त्वां ध्यायेत्सकलपुरुषार्थान् स लभते ॥ ९३ ॥ चिदंशस्त्वद्रूपं किमपि सवितुर्मंडलगतं वरेण्यं भर्गो वै त्रिविधतनुदेवस्य वपुषि । मुने धीमह्यासीर्हरिरपि धियो यो न इतरत्प्रचोदायास्तत्वं स्थितिलयसृजस्त्वं मुनिपते ॥ ९४ ॥ हरित्तंतुप्रोतः सदसि शिखरे शुभ्रकपटो जगन्मूलस्थाणुस्त्वमिति शुभमस्पंदमुनिभिः । झरीभिः स्वर्णाढ्यैः पवनहतवार्बिंदुनिकरैर्जटासक्ताजाह्नीरुचिरमभिषिक्तः स्थित इव ॥ ९५ ॥ दुराचारो जारश्चपलमतिराजः परवशः परद्रव्याकांक्षी बहुजनविरोधी च सततम् । तथा चाहं पूतस्तव पदयुगस्पर्शवशतो ह्ययःखंडः स्वर्णं भवति हि यदा सिद्धसुरतिः ॥ ९६ ॥ परिक्रांता देशा बहुतरधनस्यार्जनधिया कुलाचारं हित्वा कुमतिनृपसेवापि च कृता । विधायाहं श्रांतः किमपि नच लब्धं तु वपुषाश्रितं त्वत्पादाब्जं श्रितमनुजमंदारमधुना ॥९७॥ त्वदीयो मे देहस्त्वमपि पितरौ भ्रातृसुहृदस्त्वमेव ब्रह्मन्मे सुतहितगृहक्षेत्रनिवहाः । त्वमेव प्राणो मे धनमपि मम त्वं तव पदं न जाने मय्येव स्थितमपि महन्मेयमधुना ॥ ९८ ॥ नमस्ते तारायामृतजलधिधाम्नेऽधिमहसे नमस्ते ब्रह्माद्यैर्मुनिसुरवरैः क्लृप्तमहसे । नमस्तुभ्यं नारायणमुनिविलासाय भवते मनूनां कोटीनामचल-

गणितानां च पतये ॥ ९९ ॥ नमस्ते देवैरप्यविदितमहिम्नेऽतियशसे नमस्ते दिक्पालप्रकटमुकुटालंकृतपदे । नमस्ते तेजस्विन्नतमनुजमंदारवपुषे नमो दत्तात्रेयाकृतिहरिहराजाय महते ॥ १०० ॥ नमस्ते पापौघाचलविततिसंहारपवये नमस्ते दारिद्र्यव्यथितजनदैवांतविधये । नमस्ते रोगार्तानतमनुजदिव्यौषधिदृशे नमस्ते दैवं मे नहि नहि जगत्यां तव पदम् ॥ १०१ ॥ असौ दत्तात्रेयस्तुतियुतकृतिर्ज्ञानलहरी सुधाधारापूराखिलनिगमसारा नु पठताम् । श्रुतश्रीविद्यायुर्विभवधनधान्यामृतचयं ददात्येवात्यंतं जयति सकलाह्लादजनिका ॥ १०२ ॥ इति श्रीदत्तात्रेयज्ञानलहरी दलादनमुनिविरचिता श्रीदत्तपदप्रापिका संपूर्णा ॥

९१. दत्तात्रेयस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जटाधरं पांडुरांगं शूलहस्तं कृपानिधिम् । सर्वरोगहरं देवं दत्तात्रेयमहं भजे ॥ १ ॥ अस्य श्रीदत्तात्रेयस्तोत्रमंत्रस्य भगवान्नारद ऋषिः । अनुष्टुप् छंदः । श्रीदत्तः परमात्मा देवता । श्रीदत्तप्रीत्यर्थे जपे विनियोगः । जगदुत्पत्तिकर्त्रे च स्थितिसंहारहेतवे । भवपाशविमुक्ताय दत्तात्रेय नमोस्तु ते ॥ १ ॥ जराजन्मविनाशाय देहशुद्धिकराय च । दिगंबर दयामूर्ते दत्तात्रेय० ॥ २ ॥ कर्पूरकांतिदेहाय ब्रह्ममूर्तिधराय च । वेदशास्त्रपरिज्ञाय

दत्तात्रेय० ॥ ३ ॥ ह्रस्वदीर्घकृशस्थूलनामगोत्रविवर्जित । पंचभूतैकदीप्ताय दत्तात्रेय० ॥ ४ ॥ यज्ञभोक्ते च यज्ञाय यज्ञरूपधराय च । यज्ञप्रियाय सिद्धाय दत्तात्रेय नमोऽस्तु ते ॥ ५ ॥ आदौ ब्रह्मा मध्ये विष्णुरंते देवः सदाशिवः । मूर्तित्रयस्वरूपाय दत्तात्रेय० ॥ ६ ॥ भोगालयाय भोगाय योगयोग्याय धारिणे । जितेंद्रियजितज्ञाय दत्तात्रेय० ॥ ७ ॥ दिगंबराय दिव्याय दिव्यरूपधराय च । सदोदितपरब्रह्म दत्तात्रेय० ॥ ८ ॥ जंबुद्वीपमहाक्षेत्रमातापुरनिवासिने । जयमान सतां देव दत्तात्रेय० ॥ ९ ॥ भिक्षाटनं गृहे ग्रामे पात्रं हेममयं करे । नानास्वादमयी भिक्षा दत्तात्रेय० ॥ १० ॥ ब्रह्मज्ञानमयी मुद्रा वस्त्रे चाकाशभूतले । प्रज्ञानघनबोधाय दत्तात्रेय० ॥११॥ अवधूत सदानंद परब्रह्मस्वरूपिणे । विदेहदेहरूपाय दत्तात्रेय० ॥ १२ ॥ सत्यरूप सदाचार सत्यधर्मपरायण । सत्याश्रय परोक्षाय दत्तात्रेय० ॥ १३ ॥ शूलहस्त गदापाणे वनमालासुकंधर । यज्ञसूत्रधर ब्रह्मन्दत्तात्रेय० ॥ १४ ॥ क्षराक्षरस्वरूपाय परात्परतराय च । दत्तमुक्तिपरस्तोत्र दत्तात्रेय० ॥ १५ ॥ दत्तविद्याढ्यलक्ष्मीशदत्तस्वात्मस्वरूपिणे । गुणनिर्गुणरूपाय दत्तात्रेय० ॥ १६ ॥ शत्रुनाशकरं स्तोत्रं ज्ञानविज्ञानदायकम् । सर्वपापं शमं याति दत्तात्रेय० ॥ १७ ॥ इदं स्तोत्रं महद्दिव्यं दत्तप्रत्यक्षकारक-

म् । दत्तात्रेयप्रसादाच्च नारदेन प्रकीर्तितम् ॥ १८ ॥ इति श्रीनारदपुराणे नारदविरचितं दत्तात्रेयस्तोत्रं संपूर्णम् ॥

९२. शंकराचार्यकृतगुर्वष्टकम् ।

श्रीगणेशाय नमः ॥ शरीरं सुरूपं तथा वा कलत्रं यशश्चारु चित्रं धनं मेरुतुल्यम् । मनश्चेन्न लग्नं हरेरंघ्रिपद्मे ततः किं ततः किं ततः किं ततः किम् ॥ १ ॥ कलत्रं धनं पुत्रपौत्रादि सर्वं गृहं बांधवाः सर्वमेतद्धि जातम् । गुरोरंघ्रिपद्मे मनश्चेन्न लग्नं ततः किं० ॥ २ ॥ षडंगादिवेदो मुखे शास्त्रविद्या कवित्वादि गद्यं सुपद्यं करोति । गुरोरंघ्रिपद्मे० ॥ ३ ॥ विदेशेषु मान्यः स्वदेशेषु धन्यः सदाचारवृत्तेषु मत्तो न चान्यः । गुरोरंघ्रिपद्मे० ॥ ४ ॥ क्षमामंडले भूपभूपालवृंदैः सदा सेवितं यस्य पादारविंदम् । गुरोरंघ्रिपद्मे० ॥ ५ ॥ यशो मे गतं दिक्षु दानप्रतापाज्जगद्वस्तु सर्वं करे यत्प्रसादात् । गुरोरंघ्रिपद्मे० ॥६॥ न भोगे न योगे न वा वाजिराजौ न कांतासुखे नैव वित्तेषु चित्तम् । गुरोरंघ्रिपद्मे० ॥ ७ ॥ अरण्ये न वा स्वस्य गेहे न कार्ये न देहे मनो वर्तते मे त्वनर्घ्ये । गुरोरंघ्रिपद्मे० ॥ ८ ॥ अनर्घ्याणि रत्नानि मुक्तानि सम्यक्समालिंगिता कामिनी यामिनीषु । गुरोरंघ्रिपद्मे० ॥ ९ ॥ गुरोरष्टकं यः पठेत्पुण्यदेही यतिर्भूपतिर्ब्रह्मचारी च गेही । लभेद्वांछितार्थं पदं ब्रह्मसंज्ञं गुरोरुक्तवाक्ये मनो यस्य लग्नम् ॥१०॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं गुरोरष्टकं समाप्तम् ॥

९३. गुरुवरप्रार्थनापंचरत्नस्तोत्रम्।

श्रीगणेशाय नमः ॥ यं विज्ञातुं भृगुर्यः स्वपितरमुपगतः पंचवारं यथावज्ज्ञानादेवामृताप्तेः सततमनुपमं चिद्विवेकादि लब्ध्वा। तस्मै तुभ्यं नमः श्रीहरिहरगुरवे सच्चिदानंदमुक्तानंताद्वैतप्रतीते न कुरु कितवतां पाहि मां दीनबंधो ॥ १ ॥ यस्माद्दृश्यस्य जन्मस्थितिविलयमिमे तैत्तिरीयाः पठंति स्वाविद्यामात्रयोगात्सुखशयनतले मुख्यतः स्वप्नवच्च। तस्मै० ॥२॥ यो वेदांतैकलभ्यः श्रुतिषु नियमितस्तैत्तिरीयैश्च काण्वैरन्यैरप्यानिषेकादुदयपरिमितं चारुसंस्कारभाजाम्। तस्मै० ॥ ३ ॥ यस्मिन्नेवावसन्नाः सकलनिगमवाङ्मौलयः सुप्तपुंसि प्रोक्तं तन्नाम यद्वन्निजमहिमगतध्वांततत्कार्यरूपे। तस्मै० ॥ ४ ॥ चित्त्वात्संकल्पपूर्वं सृजति जगदिदं योगिवन्मायया यः स्वात्मन्येवाद्वितीये परमसुखदृशि स्वप्नवद्भूम्नि नित्ये। तस्मै० ॥ ५ ॥ इत्यच्युतविरचितं गुरुवरप्रार्थनापंचरत्नस्तोत्रं संपूर्णम् ॥

९४. दक्षिणामूर्तिस्तोत्रम्।

श्रीगणेशाय नमः ॥ विश्वं दर्पणदृश्यमाननगरीतुल्यं निजांतर्गतं पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया। यः साक्षी कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं तस्मै

श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ १ ॥ बीजस्यां-तरिवांकुरो जगदिदं प्राङ्निर्विकल्पं पुनर्मायाकल्पितदे-शकालकलनावैचित्र्यचित्रीकृतम् । मायावीव विजृंभय-त्यपि महायोगीव यः स्वेच्छया तस्मै श्रीगुरु० ॥ २ ॥ यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते साक्षात्त-त्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् । यत्साक्षा-त्करणाद्भवेन्न पुनरावृत्तिर्भवांभोनिधौ तस्मै श्रीगुरु० ॥३॥ नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पंदते । जानामीति तमेव भांतमनुभात्येतत्समस्तं जगत्तस्मै श्रीगुरु० ॥ ४ ॥ देह-प्राणमपींद्रियाण्यपि चलां बुद्धिं च शून्यं विदुः स्त्रीबालां-धजडोपमास्त्वहमिति भ्रांता भृशं वादिनः । मायाश-क्तिविलासकल्पितमहाव्यामोहसंहारिणे तस्मै श्रीगुरु० ॥ ५ ॥ राहुग्रस्तदिवाकरेंदुसदृशो मायासमाच्छादनात्स-न्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् । प्राग-स्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते तस्मै श्रीगुरु० ॥ ६ ॥ बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि व्यावृत्तास्वनुवर्तमानमहमित्यंतः स्फुरंतं सदा । स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया तस्मै श्रीगुरु० ॥ ७ ॥ विश्वं पश्यति कार्यकारणतया स्वस्वामिसंबंधतः शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः । स्वप्ने

जाग्रति वा य एष पुरुषो मायापरिभ्रामितस्तस्मै श्रीगुरु० ॥ ८ ॥ भूरंभांस्यनलोऽनिलोंऽबरमहर्नाथो हिमांशुः पुमानित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् । नान्यत्किंचन विद्यते विमृशतां यस्मात्परस्माद्विभोस्तस्मै श्रीगुरु० ॥ ९ ॥ सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिन्स्तवे तेनास्य श्रवणात्तथार्थमननाद्ध्यानाच्च संकीर्तनात् । सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः सिद्ध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥ १० ॥ वटविटपिसमीपे भूमिभागे निषण्णं सकलमुनिजनानां ज्ञानदातारमारात् । त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं जननमरणदुःखच्छेददक्षं नमामि ॥ ११ ॥ चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा । गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥ १२ ॥ ॐनमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये । निर्मलाय प्रशांताय दक्षिणामूर्तये नमः ॥ १३ ॥ निधये सर्वविद्यानां भिषजे भवरोगिणाम् । गुरवे सर्वलोकानां दक्षिणामूर्तये नमः ॥ १४ ॥ मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं वर्षिष्ठांतेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः । आचार्येंद्रं करकलितचिन्मुद्रमानंदरूपं स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥ १५ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं दक्षिणामूर्तिस्तोत्रं संपूर्णम् ॥

अवतारस्तोत्राणि ।

९५. मत्स्यस्तोत्रम् ।

श्रीगणेशाय नमः ॥ नूनं त्वं भगवान्साक्षाद्धरिर्नाराय-णोऽव्ययः । अनुग्रहाय भूतानां धत्से रूपं जलौकसाम् ॥ १ ॥ नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर । भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो ॥ २ ॥ सर्वे लीला-वतारास्ते भूतानां भूतिहेतवः । ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतम् ॥ ३ ॥ न तेऽरविन्दाक्ष पदोपस-र्पणं मृषा भवेत्सर्वसुहृत्प्रियात्मन. । यथेतरेषां पृथ-गात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ॥ ४ ॥ इति श्रीमद्भागवतांतर्गतं मत्स्यस्तोत्रं संपूर्णम् ॥

९६. कूर्मस्तोत्रम् ।

श्रीगणेशाय नमः ॥ देवा ऊचुः । नमाम ते देव पदा-रविंदं प्रपन्नतापोपशमातपत्रम् । यन्मूलकेता यतयोंऽज-सोरुसंसारदुःखं बहिरुत्क्षिपंति ॥ १ ॥ धातर्यदस्मिन्भव-ईश जीवास्तापत्रयेणोपहता न शर्म । आत्मंल्लभंते भग-वंस्तवांघ्रिच्छायां सविद्यामत आश्रयेम ॥ २ ॥ मार्गंति यत्ते मुखपद्मनीडैश्छंदःसुपर्णैर्ऋषयो विविक्ते । यस्या-घमर्षोदसरिद्वरायाः पदंपदं तीर्थपदः प्रपन्नाः ॥ ३ ॥ यच्छ्रद्धया श्रुतवत्या च भक्त्या संमृज्यमाने हृदयेऽव-

धाय । ज्ञानेन वैराग्यबलेन धीरा व्रजेम तत्तेऽङ्घ्रिसरोज-पीठम् ॥ ४ ॥ विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदांबुजं ते । व्रजेम सर्वे शरणं यदीश स्मृतं प्रयच्छत्य-भयं स्वपुंसाम् ॥ ५ ॥ यत्सानुबंधेऽसति देहगेहे ममाह-मित्यूढदुराग्रहाणाम् । पुंसां सुदूरं वसतोऽपि पुर्यां भजेम तत्ते भगवन्पदाब्जम् ॥ ६ ॥ तान्वा असद्वृत्तिभि-रक्षिभिर्ये पराहृतांतर्मनसः परेश । अथो न पश्यंत्यु-रुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ॥ ७ ॥ पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये । वै-राग्यसारं प्रतिलभ्य बोधं यथांजसान्वीयुरकुण्ठधिष्ण्यम् ॥ ८ ॥ तथापरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठाम् । त्वामेव धीराः पुरुषं विशंति तेषां श्रमः स्यान्न तु सेवया ते ॥ ९ ॥ तत्ते वयं लोकसिसृक्षयाद्य त्वया-नुसृष्टास्त्रिभिरात्मभिः स्म । सर्वे वियुक्ताः स्वविहारतंत्रं न शक्नुमस्तत्प्रतिहर्तवे ते ॥ १० ॥ यावद्बलिं तेऽज हराम काले यथा वयं चान्नमदाम यत्र । यथोभयेषां त इमे हि लोका बलिं हरंतोऽन्नमदंत्यनूहाः ॥ ११ ॥ त्वं नः सुराणामसि सान्वयानां कूटस्थ आद्यः पुरुषः पुराणः । त्वं देवशक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविमादधेऽजः ॥ १२ ॥ ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन्करवाम किं ते । त्वं नः स्वचक्षुः परिदेहि शक्त्या देवक्रियार्थे

यदनुग्रहाणाम् ॥ १३ ॥ इति श्रीमद्भागवतांतर्गतं कूर्मस्तोत्रं समाप्तम् ॥

९७. वराहस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ऋषय ऊचुः । जितं जितं तेऽजित यज्ञभावन त्रयीं तनुं स्वां परिधुन्वते नमः । यद्रोमगर्तेषु निलिल्युरध्वरास्तस्मै नमः कारणसूकराय ते ॥ १ ॥ रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव तदध्वरात्मकम् । छंदांसि यस्य त्वचि बर्हि रोमस्वाज्यं दृशि त्वंघ्रिषु चातुर्होत्रम् ॥ २ ॥ स्रुक् तुण्ड आसीत्स्रुव ईश नासयोरिडोदरे चमसाः कर्णरंध्रे । प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रम् ॥ ३ ॥ दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः । जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चितयोऽसवो हि ते ॥ ४ ॥ सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव धातवः । सत्राणि सर्वाणि शरीरसंधिस्त्वं सर्वयज्ञक्रतुरिष्टिबंधनः ॥ ५ ॥ नमो नमस्तेऽखिलयन्त्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने । वैराग्यभक्त्यात्मजयानुभावितज्ञानाय विद्यागुरवे नमो नमः ॥ ६ ॥ दंष्ट्राग्रकोट्या भगवंस्त्वया धृता विराजते भूधर भूः सभूधरा । यथा वनान्निःसरतो दता धृता मतंगजेंद्रस्य सपत्रपद्मिनी ॥ ७ ॥ त्रयीमयं रूपमिदं च सौकरं भूमंडले नाथ दता धृतेन ते ।

चकास्ति शृंगोढघनेन भूयसा कुलाचलेंद्रस्य यथैव वि-
भ्रमः ॥ ८ ॥ संस्थापयैनां जगतां सतस्थुषां लोकाय पत्नी-
मसि मातरं पिता । विधेम चास्यै नमसा सह त्वया यस्यां
स्वतेजोऽग्निमिवारणावधाः ॥ ९ ॥ कः श्रद्दधीतान्यतम-
स्तव प्रभो रसां गताया भुव उद्विबर्हणम् । न विस्मयो-
ऽसौ त्वयि विश्वविस्मये यो मायेयेदं ससृजेऽतिविस्मयम्
॥ १० ॥ विधुन्वता वेदमयं निजं वपुर्जनस्तपःसत्यनि-
वासिनो जयम् । सटाशिखोद्धूतशिवांबुबिंदुभिर्विमृज्य-
माना भृशमीश पाविताः ॥ ११ ॥ स वै बत भ्रष्टमति-
स्तवैष ते यः कर्मणां पारमपारकर्मणः । यद्योगमायागुण-
योगमोहितं विश्वं समस्तं भगवन्विधेहि शम् ॥ १२ ॥
इति श्रीमद्भागवतांतर्गतं वराहस्तोत्रं समाप्तम् ॥

९८. नृसिंहस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ब्रह्मोवाच । नतोऽस्म्यनंताय दुरं-
तशक्तये विचित्रवीर्याय पवित्रकर्मणे । विश्वस्य सर्गस्थि-
तिसंयमान्गुणैः स्वलीलया संदधतेऽव्ययात्मने ॥ १ ॥
श्रीरुद्र उवाच । कोपकालो युगांतस्ते हतोऽयमसुरो-
ऽल्पकः । तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल ॥ २ ॥
इंद्र उवाच । प्रत्यानीताः परम भवता त्रायता नः
स्वभागा दैत्याक्रांतं हृदयकमलं त्वद्गृहं प्रत्यबोधि ।
कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां

नहि बहुमता नारसिंहापरैः किम् ॥ ३ ॥ ऋषय ऊचुः । त्वं नस्तपः परमसात्थ यदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज । तद्विप्रलुप्तममुनाद्य शरण्यपाल रक्षागृहीतवपुषा पुनरन्वमंस्थाः ॥ ४ ॥ पितर ऊचुः । श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽप्यपिबत्तिलाम्बु । तस्योदरान्नखविदीर्णवपाद्य आर्च्छत्तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे ॥ ५ ॥ सिद्धा ऊचुः । यो नो गतिं योगसिद्धामसाधुरहारषीद्योगतपोबलेन । नानादर्पं तं नखैर्निर्ददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ॥ ६ ॥ विद्याधरा ऊचुः । विद्यां पृथग्धारणयाऽनुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः । स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यम् ॥ ७ ॥ नागा ऊचुः । येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः । तद्वक्षःपाटनेनासां दत्तानन्द नमोऽस्तु ते ॥ ८॥ मनव ऊचुः । मनवो वयं तव निदेशकारिणो दितिजेन देव परिभूतसेतवः । भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किंकरान् ॥ ९ ॥ प्रजापतय ऊचुः । प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः । स एष त्वया भिन्नवक्षानुशेते जगन्मङ्गलं सत्त्वमूर्तेऽवतारः ॥१०॥ गन्धर्वा ऊचुः । वयं विभो ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः । स एष नीतो भवता दशा-

मिश्रां किमुत्पथस्थः कुशलाय कल्पते ॥ ११ ॥ चारणा ऊचुः । हरे तवांघ्रिपंकजं भवापवर्गमाश्रिताः । यदेव साधुहृच्छयस्त्वयाऽसुरः समापितः ॥ १२ ॥ यक्षा ऊचुः । वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वम् । स तु जनपरितापं तत्कृतं जानता ते नरहर उपनीतः पंचतां पंचविंशः ॥ १३ ॥ किंपुरुषा ऊचुः । वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः । अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा ॥ १४ ॥ वैतालिका ऊचुः । सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लभामहे । यस्तां व्यनैषीद्भृशमेष दुर्जनो दिष्ट्या हतस्ते भगवन्यथामयः ॥ १५ ॥ किन्नरा ऊचुः । वयमीश किन्नरगणास्तवानुगा दितिजेन विष्टिममुनाऽनुकारिताः । भवता हरे सवृजिनोऽवसादितो नरसिंह नाथ विभवाय नो भव ॥ १६ ॥ विष्णुपार्षदा ऊचुः । अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म । सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनुग्रहाय विद्मः ॥ १७ ॥ इति श्रीमद्भागवतांतर्गतं नृसिंहस्तोत्रं संपूर्णम् ॥

९९. लक्ष्मीनृसिंहस्तोत्रम् ।

श्रीगणेशाय नमः ॥ श्रीमत्पयोनिधिनिकेतन चक्रपाणे भोगींद्रभोगमणिरंजितपुण्यमूर्ते । योगीश शाश्वत शरण्यभवाब्धिपोत लक्ष्मीनृसिंह मम देहि करावलंबम् ॥ १ ॥

ब्रह्मेंद्ररुद्रमरुदर्ककिरीटकोटिसंघट्टिताङ्घ्रिकमलामलकांति-
कांत । लक्ष्मीलसत्कुचसरोरुहराजहंस लक्ष्मीनृसिंह मम
देहि करावलंबम् ॥ २ ॥ संसारघोरगहने चरतो मुरारे
मारोग्रभीकरमृगप्रवरार्दितस्य । आर्तस्य मत्सरनिदाघनि-
पीडितस्य लक्ष्मीनृसिंह० ॥ ३ ॥ संसारकूपमतिघोरमगा-
धमूलं संप्राप्य दुःखशतसर्पसमाकुलस्य । दीनस्य देव
कृपणापदमागतस्य लक्ष्मीनृसिंह० ॥ ४ ॥ संसारसागर-
विशालकरालकालनक्रग्रहग्रसननिग्रहविग्रहस्य । व्यग्रस्य
रागरसनोर्मिनिपीडितस्य लक्ष्मीनृसिंह० ॥ ५ ॥ संसार-
वृक्षमघबीजमनंतकर्मशाखाशतं करणपत्रमनंगपुष्पम् ।
आरुह्य दुःखफलितं पततो दयालो लक्ष्मीनृसिंह०॥ ६ ॥
संसारसर्पघनवक्त्रभयोग्रतीव्रदंष्ट्राकरालविषदग्धविनष्टमू-
र्तेः । नागारिवाहन सुधाब्धिनिवास शौरे लक्ष्मीनृसिंह०
॥ ७ ॥ संसारदावदहनातुरभीकरोरुज्वालावलीभिरति-
दग्धतनूरुहस्य । त्वत्पादपद्मसरसीशरणागतस्य लक्ष्मीनृ-
सिंह० ॥ ८ ॥ संसारजालपतितस्य जगन्निवास सर्वेंद्रि-
यार्थबडिशार्थझषोपमस्य । प्रोत्खंडितप्रचुरतालुकमस्त-
कस्य लक्ष्मीनृसिंह० ॥ ९ ॥ संसारभीकरकरींद्रकलाभि-
घातनिष्पिष्टमर्मवपुषः सकलार्तिनाश । प्राणप्रयाणभव-
भीतिसमाकुलस्य लक्ष्मीनृसिंह० ॥ १० ॥ अंधस्य मे
हृतविवेकमहाधनस्य चोरैः प्रभो बलिभिरिंद्रियनामधेयैः ।

मोहांधकूपकुहरे विनिपातितस्य लक्ष्मीनृसिंह० ॥ ११ ॥ लक्ष्मीपते कमलनाभ सुरेश विष्णो वैकुंठ कृष्ण मधुसूदन पुष्कराक्ष । ब्रह्मण्य केशव जनार्दन वासुदेव देवेश देहि कृपणस्य करा० ॥ १२ ॥ यन्माययोर्जितवपुःप्रचुरप्रवाहमग्नार्थमत्र निवहोरुकरावलंबम् । लक्ष्मीनृसिंहचरणाब्जमधुव्रतेन स्तोत्रं कृतं सुखकरं भुवि शंकरेण ॥१३॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं संकष्टनाशनं लक्ष्मीनृसिंहस्तोत्रं संपूर्णम् ॥

१००. वामनस्तोत्रम् ।

श्रीगणेशाय नमः ॥ अदितिरुवाच । यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद तीर्थश्रवः श्रवणमंगलनामधेय । आपन्नलोकवृजिनोपशमोदयाऽद्य शं नः कृधीश भगवन्नसि दीननाथः ॥ १ ॥ विश्वाय विश्वभवनस्थितिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने । स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नमस्ते ॥ २ ॥ आयुः परं वपुरभीष्टमतुल्यलक्ष्मीर्द्यौर्भूरसाः सकलयोगगुणास्त्रिवर्गः । ज्ञानं च केवलमनंत भवंति तुष्टात्त्वत्तो नृणां किमु सपत्नजयादिराशीः ॥३॥ इति श्रीमद्भागवतांतर्गतं वामनस्तोत्रं संपूर्णम् ॥

१०१. वामनस्तोत्रम् ।

श्रीगणेशाय नमः ॥ अदितिरुवाच । नमस्ते देवदेवेश

सर्वव्यापिन् जनार्दन । सत्वादिगुणभेदेन लोकव्यापारकारण ॥ १ ॥ नमस्ते बहुरूपाय अरूपाय नमो नमः । सर्वैकाद्भुतरूपाय निर्गुणाय गुणात्मने ॥ २ ॥ नमस्ते लोकनाथाय परमज्ञानरूपिणे । सद्भक्तजनवात्सल्यशीलिने मंगलात्मने ॥ ३ ॥ यस्यावताररूपाणि ह्यर्चयंति मुनीश्वराः । तमादिपुरुषं देवं नमामीष्टार्थसिद्धये ॥ ४ ॥ यं न जानंति श्रुतयो यं न जानंति सूरयः । तं नमामि जगद्धेतुं मायिनं तममायिनम् ॥ ५ ॥ यस्यावलोकनं चित्रं मायोपद्रववारणम् । जगद्रूपं जगत्पालं तं वंदे पद्मजाधवम् ॥ ६ ॥ यो देवस्त्यक्तसंगानां शांतानां करुणार्णवः । करोति ह्यात्मना संगं तं वंदे संगवर्जितम् ॥ ७ ॥ यत्पादाब्जजलक्लिन्नसेवारंजितमस्तकाः । अवापुः परमां सिद्धिं तं वंदे सर्ववंदितम् ॥ ८ ॥ यज्ञेश्वरं यज्ञभुजं यज्ञकर्मसु निष्ठितम् । नमामि यज्ञफलदं यज्ञकर्मप्रबोधकम् ॥ ९ ॥ अजामिलोऽपि पापात्मा यन्नामोच्चारणादनु । प्राप्तवान्परमं धाम तं वंदे लोकसाक्षिणम् ॥ १० ॥ ब्रह्माद्या अपि ये देवा यन्मायापाशयंत्रिताः । न जानंति परं भावं तं वंदे सर्वनायकम् ॥ ११ ॥ हृत्पद्मनिलयोऽज्ञानां दूरस्थ इव भाति यः । प्रमाणातीतसद्भावं तं वंदे ज्ञानसाक्षिणम् ॥ १२ ॥ यन्मुखाद्ब्राह्मणो जातो बाहुभ्यां क्षत्रियोऽजनि । तथैव ऊरुतो वैश्यः पद्भ्यां शूद्रो अजायत ॥ १३ ॥ मनस-

श्चंद्रमा जातो जातः सूर्यश्च चक्षुषः । मुखादिंद्रस्तथाग्निश्च प्राणाद्वायुरजायत ॥ १४ ॥ त्वमिंद्रः पवनः सोमस्त्वमीशानस्त्वमंतकः । त्वमग्निर्निर्ऋतिश्चैव वरुणस्त्वं दिवाकरः ॥ १५ ॥ देवाश्च स्थावराश्चैव पिशाचाश्चैव राक्षसाः । गिरयः सिद्धगंधर्वा नद्यो भूमिश्च सागराः ॥ १६ ॥ त्वमेव जगतामीशो यन्नामास्ति परात्परः । त्वद्रूपमखिलं तस्मात्पुत्रान्मे पाहि श्रीहरे ॥१७॥ इति स्तुत्वा देवधात्री देवं नत्वा पुनः पुनः । उवाच प्राञ्जलिर्भूत्वा हर्षाश्रुक्षालितस्तनी ॥ १८ ॥ अनुग्राह्यास्मि देवेश हरे सर्वादिकारण । अकंटकश्रियं देहि मत्सुतानां दिवौकसाम् ॥ १९ ॥ अंतर्यामिन् जगद्रूप सर्वभूतपरेश्वर । तवाज्ञातं किमस्तीह किं मां मोहयसि प्रभो ॥ २० ॥ तथापि तव वक्ष्यामि यन्मे मनसि वर्तते । वृथापुत्रास्मि देवेश रक्षोभिः परिपीडिता ॥ २१ ॥ एतान्न हंतुमिच्छामि मत्सुता दितिजा यतः । तानहत्वा श्रियं देहि मत्सुतानामुवाच सा ॥२२॥ इत्युक्तो देवदेवस्तु पुनः प्रीतिमुपागतः । उवाच हर्षयन्साध्वीं कृपयाभिपरिप्लुतः ॥ २३ ॥ श्रीभगवानुवाच । प्रीतोऽस्मि देवि भद्रं ते भविष्यामि सुतस्तव । यतः सपत्नीतनयेष्वपि वात्सल्यशालिनी ॥ २४ ॥ त्वया च मे कृतं स्तोत्रं पठंति भुवि मानवाः । तेषां पुत्रा धनं संपन्न हीयंते कदाचन ॥ २५ ॥ अंते मत्पदमाप्नोति यद्विष्णोः परमं शुभम् ॥२६॥ इति श्रीपद्मपुराणे वामनस्तोत्रं समाप्तम् ॥

कल्याणानां निदानं कलिमलमथनं पावनं पावनानां
पाथेयं यन्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थितस्य ।
विश्रामस्थानमेकं कविवरवचसां जीवनं सज्जनानां
बीजं धर्मद्रुमस्य प्रभवतु भवतां भूतये रामनाम ॥

रामस्तोत्राणि।

१०२. रामहृदयम्।

श्रीगणेशाय नमः ॥ श्रीमहादेव उवाच। ततो रामः स्वयं प्राह हनूमंतमुपस्थितम्। शृणु तत्त्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मनाम् ॥ १ ॥ आकाशस्य यथा भेदस्त्रिविधो दृश्यते महान्। जलाशये महाकाशस्तदवच्छिन्न एव हि। प्रतिबिंबाख्यमपरं दृश्यते त्रिविधं नभः ॥ २ ॥ बुद्ध्यवच्छिन्नचैतन्यमेकं पूर्णमथापरम्। आभासस्त्वपरं बिंबभूतमेवं त्रिधा चितिः ॥ ३ ॥ साभासबुद्धेः कर्तृत्वमविच्छिन्नेऽविकारिणि। साक्षिण्यारोप्यते भ्रांत्या जीवत्वं च तथाऽबुधैः ॥ ४ ॥ आभासस्तु मृषाबुद्धिरविद्याकार्यमुच्यते। अविच्छिन्नं तु तद्ब्रह्म विच्छेदस्तु विकल्पितः ॥ ५ ॥ अविच्छिन्नस्य पूर्णेन एकत्वं प्रतिपाद्यते। तत्त्वमस्यादिवाक्यैश्च साभासस्याहमस्तथा ॥ ६ ॥ ऐक्यज्ञानं यदोत्पन्नं महावाक्येन चात्मनोः। तदाऽविद्या स्वकार्यैश्च नश्यत्येव न संशयः ॥ ७ ॥ एतद्विज्ञाय मद्भक्तो मद्भावायोपपद्यते ॥ ८ ॥ मद्भक्तिविमुखानां हि शास्त्रगर्तेषु मुह्यताम्। न ज्ञानं न च मोक्षः स्यात्तेषां जन्मशतैरपि ॥ ९ ॥ इदं रहस्यं हृदयं ममात्मनो मयैव साक्षात्कथितं तवानघ। मद्भक्तिहीनाय शठाय न त्वया दातव्यमैंद्रादपि राज्यतोऽधिकम् ॥ १० ॥ इति श्रीमदध्यात्मरामायणे बालकांडे श्रीरामहृदयं संपूर्णम् ॥

१०३. रामस्तवराजः ।

श्रीगणेशाय नमः ॥ अस्य श्रीरामचंद्रस्तवराजस्तोत्र-मंत्रस्य । सनत्कुमार ऋषिः । श्रीरामो देवता । अनुष्टुप् छंदः । सीताबीजम् । हनूमान् शक्तिः । श्रीरामप्रीत्यर्थे जपे विनियोगः । सूत उवाच । सर्वशास्त्रार्थतत्त्वज्ञं व्यासं सत्यवतीसुतम् । धर्मपुत्रः प्रहृष्टात्मा प्रत्युवाच मुनीश्वरम् ॥ १ ॥ युधिष्ठिर उवाच । भगवन्योगिनां श्रेष्ठ सर्वशास्त्रविशारद । किं तत्त्वं किं परं जाप्यं किं ध्यानं मुक्तिसाधनम् ॥ २ ॥ श्रोतुमिच्छामि तत्सर्वं ब्रूहि मे मुनिसत्तम ॥ वेदव्यास उवाच । धर्मराज महाभाग शृणु वक्ष्यामि तत्त्वतः ॥३॥ यत्परं यद्गुणातीतं यज्ज्योतिरमलं शिवम् । तदेव परमं तत्त्वं कैवल्यपदकारणम् ॥ ४ ॥ श्रीरामेति परं जाप्यं तारकं ब्रह्मसंज्ञकम् । ब्रह्महत्यादिपापघ्नमिति वेदविदो विदुः ॥ ५ ॥ श्रीराम रामेति जना ये जपंति च सर्वदा । तेषां भुक्तिश्च मुक्तिश्च भविष्यति न संशयः ॥ ६ ॥ स्तवराजं पुरा प्रोक्तं नारदेन च धीमता । तत्सर्वं संप्रवक्ष्यामि हरिध्यानपुरःसरम् ॥ ७ ॥ तापत्रयाग्निशमनं सर्वाघौघनिकृंतनम् । दारिद्र्यदुःखशमनं सर्वसंपत्करं शिवम् ॥ ८ ॥ विज्ञानफलदं दिव्यं मोक्षैकफलसाधनम् । नमस्कृत्य प्रवक्ष्यामि रामं कृष्णं जगन्मयम् ॥ ९ ॥ अयोध्यानगरे रम्ये रत्नमंडपमध्यगे ।

स्मरेत्कल्पतरोर्मूले रत्नसिंहासनं शुभम् ॥ १० ॥ तन्मध्ये-ऽष्टदलं पद्मं नानारत्नैश्च वेष्टितम् । स्मरेन्मध्ये दाशरथिं सहस्रादित्यतेजसम् ॥ ११ ॥ पितुरंकगतं राममिंद्रनीलम-णिप्रभम् । कोमलांगं विशालाक्षं विद्युद्वर्णांबरावृतम् ॥१२ भानुकोटिप्रतीकाशं किरीटेन विराजितम् । रत्नग्रैवेयकेयू-ररत्नकुंडलमंडितम् ॥ १३ ॥ रत्नकंकणमंजीरकटिसूत्रैर-लंकृतम् । श्रीवत्सकौस्तुभोरस्कं मुक्ताहारोपशोभितम् ॥ १४ ॥ दिव्यरत्नसमायुक्तमुद्रिकाभिरलंकृतम् । राघवं द्विभुजं बालं राममीषत्स्मितराननम् ॥ १५ ॥ तुलसीकुंद-मंदारपुष्पमाल्यैरलंकृतम् । कर्पूरागुरुकस्तूरीदिव्यगंधानु-लेपनम् ॥ १६ ॥ योगशास्त्रेष्वभिरतं योगेशं योगदाय-कम् । सदा भरतसौमित्रिशत्रुघ्नैरुपशोभितम् ॥ १७ ॥ विद्याधरसुराधीशसिद्धगंधर्वकिन्नरैः । योगींद्रैर्नारदाद्यैश्च स्तूयमानमहर्निशम् ॥ १८ ॥ विश्वामित्रवसिष्ठादिमु-निभिः परिसेवितम् । सनकादिमुनिश्रेष्ठैर्योगिवृंदैश्च सेवितम् ॥ १९ ॥ रामं रघुवरं वीरं धनुर्वेदविशारदम् । मंगलायतनं देवं रामं राजीवलोचनम् ॥ २० ॥ सर्वशा-स्त्रार्थतत्त्वज्ञमानंदकरसुंदरम् । कौसल्यानंदनं रामं धनु-र्बाणधरं हरिम् ॥ २१ ॥ एवं संचिंतयन्विष्णुं यज्ज्यो-तिरमलं विभुम् । प्रहृष्टमानसो भूत्वा मुनिवर्यः स नारदः ॥ २२ ॥ सर्वलोकहितार्थाय तुष्टाव रघुनंदनम् ।

कृतांजलिपुटो भूत्वा चिंतयन्नद्भुतं हरिम् ॥ २३ ॥ यदेकं यत्परं नित्यं यदनंतं चिदात्मकम् । यदेकं व्यापकं लोके तद्रूपं चिंतयाम्यहम् ॥ २४ ॥ विज्ञानहेतुं विमलायताक्षं प्रज्ञानरूपं स्वसुखैकहेतुम् । श्रीरामचंद्रं हरिमादिदेवं परात्परं राममहं भजामि ॥ २५ ॥ कविं पुराणं पुरुषं पुरस्तात्सनातनं योगिनमीशितारम् । अणोरणीयांसमनंतवीर्यं प्राणेश्वरं राममसौ ददर्श ॥ २६ ॥ नारद उवाच । नारायणं जगन्नाथमभिरामं जगत्पतिम् । कविं पुराणं वागीशं रामं दशरथात्मजम् ॥ २७ ॥ राजराजं रघुवरं कौसल्यानंदवर्धनम् । भर्गं वरेण्यं विश्वेशं रघुनाथं जगद्गुरुम् ॥ २८ ॥ सत्यं सत्यप्रियं श्रेष्ठं जानकीवल्लभं विभुम् । सौमित्रिपूर्वजं शांतं कामदं कमलेक्षणम् ॥ २९ ॥ आदित्यं रविमीशानं घृणिं सूर्यमनामयम् । आनंदरूपिणं सौम्यं राघवं करुणामयम् ॥ ३० ॥ जामदग्न्यं तपोमूर्तिं रामं परशुधारिणम् । वाक्पतिं वरदं वाच्यं श्रीपतिं पक्षिवाहनम् ॥ ३१ ॥ श्रीशार्ङ्गधारिणं रामं चिन्मयानंदविग्रहम् । हलधृग्विष्णुमीशानं बलरामं कृपानिधिम् ॥ ३२ ॥ श्रीवल्लभं कृपानाथं जगन्मोहनमच्युतम् । मत्स्यकूर्मवराहादिरूपधारिणमव्ययम् ॥ ३३ ॥ वासुदेवं जगद्योनिमनादिनिधनं हरिम् । गोविंदं गोपतिं विष्णुं गोपीजनमनोहरम् ॥ ३४ ॥ गोगोपालपरीवारं

गोपकन्यासमावृतम् । विद्युत्पुंजप्रतीकाशं रामं कृष्णं जगन्मयम् ॥ ३५ ॥ गोगोपिकासमाकीर्णं वेणुवादनतत्परम् । कामरूपं कलावंतं कामिनीकामदं विभुम् ॥ ३६ ॥ मन्मथं मथुरानाथं माधवं मकरध्वजम् । श्रीधरं श्रीकरं श्रीशं श्रीनिवासं परात्परम् ॥ ३७ ॥ भूतेशं भूपतिं भद्रं विभूतिं भूतिभूषणम् । सर्वदुःखहरं वीरं दुष्टदानववैरिणम् ॥ ३८ ॥ श्रीनृसिंहं महाबाहुं महांतं दीप्ततेजसम् । चिदानंदमयं नित्यं प्रणवं ज्योतिरूपिणम् ॥ ३९ ॥ आदित्यमंडलगतं निश्चितार्थस्वरूपिणम् । भक्तप्रियं पद्मनेत्रं भक्तानामीप्सितप्रदम् ॥ ४० ॥ कौसल्येयं कलामूर्तिं काकुत्स्थं कमलाप्रियम् । सिंहासने समासीनं नित्यव्रतमकल्मषम् ॥ ४१ ॥ विश्वामित्रप्रियं दांतं स्वदारनियतव्रतम् । यज्ञेशं यज्ञपुरुषं यज्ञपालनतत्परम् ॥ ४२ ॥ सत्यसंधं जितक्रोधं शरणागतवत्सलम् । सर्वक्लेशापहरणं विभीषणवरप्रदम् ॥ ४३ ॥ दशग्रीवहरं रौद्रं केशवं केशिमर्दनम् । वालिप्रमथनं वीरं सुग्रीवेप्सितराज्यदम् ॥४४॥ नरवानरदेवैश्च सेवितं हनुमत्प्रियम् । शुद्धं सूक्ष्मं परं शांतं तारकब्रह्मरूपिणम् ॥ ४५ ॥ सर्वभूतात्मभूतस्थं सर्वाधारं सनातनम् । सर्वकारणकर्तारं निदानं प्रकृतेः परम् ॥ ४६ ॥ निरामयं निराभासं निरवद्यं निरंजनम् । नित्यानंदं निराकारमद्वैतं तमसः परम् ॥ ४७ ॥ परात्पर-

तरं तत्त्वं सत्यानंदं चिदात्मकम् । मनसा शिरसा नित्यं प्रणमामि रघूत्तमम् ॥ ४८ ॥ सूर्यमंडलमध्यस्थं रामं सीतासमन्वितम् । नमामि पुंडरीकाक्षममेयं गुरुतत्परम् ॥ ४९ ॥ नमोस्तु वासुदेवाय ज्योतिषां पतये नमः । नमोस्तु रामदेवाय जगदानंदरूपिणे ॥ ५० ॥ नमो वेदांतनिष्ठाय योगिने ब्रह्मवादिने । मायामयनिरासाय प्रपन्नजनसेविने ॥५१॥ वंदामहे महेशानचंडकोदंडखंडनम् । जानकीहृदयानंदवर्धनं रघुनंदनम् ॥ ५२ ॥ उत्फुल्लामलकोमलोत्पलदलश्यामाय रामाय ते कामाय प्रमदामनोहरगुणग्रामाय रामात्मने । योगारूढमुनींद्रमानससरोहंसाय संसारविध्वंसाय स्फुरदोजसे रघुकुलोत्तंसाय पुंसे नमः ॥ ५३ ॥ भवोद्भवं वेदविदां वरिष्ठमादित्यचंद्रानलसुप्रभावम् । सर्वात्मकं सर्वगतस्वरूपं नमामि रामं तमसः परस्तात् ॥ ५४ ॥ निरंजनं निष्प्रतिमं निरीहं निराश्रयं निष्कलमप्रपंचम् । नित्यं ध्रुवं निर्विषयस्वरूपं निरंतरं राममहं भजामि ॥ ५५ ॥ भवाब्धिपोतं भरताग्रजं तं भक्तप्रियं भानुकुलप्रदीपम् । भूतत्रिनाथं भुवनाधिपं तं भजामि रामं भवरोगवैद्यम् ॥ ५६ ॥ सर्वाधिपत्यं समरांगधीरं सत्यं चिदानंदमयस्वरूपम् । सत्यं शिवं शांतिमयं शरण्यं सनातनं राममहं भजामि ॥ ५७ ॥ कार्यक्रियाकारणमप्रमेयं कविं पुराणं कमलायताक्षम् ।

कुमारवेद्यं करुणामयं तं कल्पद्रुमं राममहं भजामि ॥ ५८ ॥ त्रैलोक्यनाथं सरसीरुहाक्षं दयानिधिं द्वंद्वविनाशहेतुम् । महाबलं वेदविधिं सुरेशं सनातनं राममहं भजामि ॥ ५९ ॥ वेदांतवेद्यं कविमीशितारमनादिमध्यांतमचिंत्यमाद्यम् । अगोचरं निर्मलमेकरूपं नमामि रामं तमसः परस्तात् ॥ ६० ॥ अशेषवेदात्मकमादिसंज्ञमजं हरिं विष्णुमनंतमाद्यम् । अपारसंवित्सुखमेकरूपं परात्परं राममहं भजामि ॥ ६१ ॥ तत्त्वस्वरूपं पुरुषं पुराणं स्वतेजसा पूरितविश्वमेकम् । राजाधिराजं रविमंडलस्थं विश्वेश्वरं राममहं भजामि ॥ ६२ ॥ लोकाभिरामं रघुवंशनाथं हरिं चिदानंदमयं मुकुंदम् । अशेषविद्याधिपतिं कवींद्रं नमामि रामं तमसः परस्तात् ॥ ६३ ॥ योगींद्रसंघैश्च सुसेव्यमानं नारायणं निर्मलमादिदेवम् । नतोऽस्मि नित्यं जगदेकनाथमादित्यवर्णं तमसः परस्तात् ॥ ६४ ॥ विभूतिदं विश्वसृजं विरामं राजेंद्रमीशं रघुवंशनाथम् । अचिंत्यमव्यक्तमनंतमूर्तिं ज्योतिर्मयं राममहं भजामि ॥ ६५ ॥ अशेषसंसारविहारहीनमादित्यगं पूर्णसुखाभिरामम् । समस्तसाक्षिं तमसः परस्तान्नारायणं विष्णुमहं भजामि ॥६६॥ मुनींद्रगुह्यं परिपूर्णकामं कलानिधिं कल्मषनाशहेतुम् । परात्परं यत्परमं पवित्रं नमामि रामं महतो महांतम् ॥ ६७ ॥ ब्रह्मा विष्णुश्च रुद्रश्च

देवेंद्रो देवतास्तथा । आदित्यादिग्रहाश्चैव त्वमेव रघुनंदन ॥ ६८ ॥ तापसा ऋषयः सिद्धाः साध्याश्च मरुतस्तथा । विप्रा वेदास्तथा यज्ञाः पुराणधर्मसंहिताः ॥ ६९ ॥ वर्णाश्रमास्तथा धर्मा वर्णधर्मास्तथैव च । यक्षराक्षसगंधर्वा दिक्पाला दिग्गजादयः ॥ ७० ॥ सनकादिमुनिश्रेष्ठास्त्वमेव रघुपुंगव । वसवोऽष्टौ त्रयः काला रुद्रा एकादश स्मृताः ॥ ७१॥ तारका दश दिक् चैव त्वमेव रघुनंदन । सप्तद्वीपाः समुद्राश्च नगा नद्यस्तथा द्रुमाः ॥ ७२ ॥ स्थावरा जंगमाश्चैव त्वमेव रघुनायक । देवतिर्यङ्मनुष्याणां दानवानां तथैव च ॥ ७३ ॥ माता पिता तथा भ्राता त्वमेव रघुवल्लभ । सर्वेषां त्वं परं ब्रह्म त्वन्मयं सर्वमेव हि ॥७४॥ त्वमक्षरं परं ज्योतिस्त्वमेव पुरुषोत्तम । त्वमेव तारकं ब्रह्म त्वत्तोऽन्यन्नैव किंचन ॥ ७५ ॥ शांतं सर्वगतं सूक्ष्मं परं ब्रह्म सनातनम् । राजीवलोचनं रामं प्रणमामि जगत्पतिम् ॥७६॥ व्यास उवाच । ततः प्रसन्नः श्रीरामः प्रोवाच मुनिपुंगवम् । तुष्टोऽस्मि मुनिशार्दूल वृणीष्व वरमुत्तमम् ॥७७॥ नारद उवाच । यदि तुष्टोऽसि सर्वज्ञ श्रीराम करुणानिधे । त्वन्मूर्तिदर्शनेनैव कृतार्थोऽहं च सर्वदा ॥७८॥ धन्योऽहं कृतकृत्योऽहं पुण्योऽहं पुरुषोत्तम । अद्य मे सफलं जन्म जीवितं सफलं च मे॥७९॥ अद्य मे सफलं ज्ञानमद्य मे सफलं तपः । अद्य मे सफलं कर्म

त्वत्पादांभोजदर्शनात् । अद्य मे सफलं सर्वं त्वन्नामस्मरणं तथा ॥ ८० ॥ त्वत्पादांभोरुहद्वंद्वसद्भक्तिं देहि राघव । ततः परमसंप्रीतः स रामः प्राह नारदम् ॥८१॥ श्रीराम उवाच । मुनिवर्य महाभाग मुने त्विष्टं ददामि ते । यत्त्वया चेप्सितं सर्वं मनसा तद्भविष्यति ॥ ८२ ॥ नारद उवाच । वरं न याचे रघुनाथ युष्मत्पादाब्जभक्तिः सततं ममास्तु । इदं प्रियं नाथ वरं प्रयाचे पुनः पुनस्त्वामिदमेव याचे ॥ ८३ ॥ व्यास उवाच । इत्येवमीडितो रामः प्रादात्तस्मै वरांतरम् । वीरो रामो महातेजाः सच्चिदानंदविग्रहः ॥८४॥ अद्वैतममलं ज्ञानं स्वनामस्मरणं तथा । अंतर्दधौ जगन्नाथः पुरतस्तस्य राघवः ॥८५॥ इति श्रीरघुनाथस्य स्तवराजमनुत्तमम् । सर्वसौभाग्यसंपत्तिदायकं मुक्तिदं शुभम् ॥ ८६ ॥ कथितं ब्रह्मपुत्रेण वेदानां सारमुत्तमम् । गुह्याद्गुह्यतमं दिव्यं तव स्नेहात्प्रकीर्तितम् ॥ ८७ ॥ यः पठेच्छृणुयाद्वापि त्रिसंध्यं श्रद्धयान्वितः । ब्रह्महत्यादिपापानि तत्समानि बहूनि च ॥ ८८ ॥ स्वर्णस्तेयं सुरापानं गुरुतल्पगतिस्तथा । गोवधाद्युपपापानि अनृतात्संभवानि च ॥ ८९ ॥ सर्वैः प्रमुच्यते पापैः कल्पायुतशतोद्भवैः । मानसं वाचिकं पापं कर्मणा समुपार्जितम् ॥ ९० ॥ श्रीरामस्मरणेनैव तत्क्षणान्नश्यति ध्रुवम् । इदं सत्यमिदं सत्यं सत्यमेतदिहोच्यते ॥ ९१ ॥ रामं सत्यं

परं ब्रह्म रामात्किंचिन्न विद्यते । तस्माद्रामस्वरूपं हि सत्यं सत्यमिदं जगत् ॥ ९२ ॥ श्रीरामचंद्र रघुपुंगव राजवर्य राजेंद्र राम रघुनायक राघवेश । राजाधिराज रघुनंदन रामचंद्र दासोऽहमद्य भवतः शरणागतोऽस्मि ॥९३॥ वैदेहीसहितं सुरद्रुमतले हैमे महामंडपे मध्ये पुष्पकृतासने मणिमये वीरासने संस्थितम् । अग्रे वाचयति प्रभंजनसुते तत्त्वं मुनींद्रैः परं व्याख्यातं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥ ९४ ॥ रामं रत्नकिरीटकुंडलयुतं केयूरहारान्वितं सीतालंकृतवामभागममलं सिंहासनस्थं विभुम् । सुग्रीवादिहरीश्वरैः सुरगणैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनिभिः संस्तूयमानं प्रभुम् ॥९५॥ सकलगुणनिधानं योगिभिः स्तूयमानं भुजविजितसमानं राक्षसेंद्रादिमानम् । महितनृपभयानं सीतया शोभमानं स्मर हृदय विमानं ब्रह्म रामाभिधानम् ॥ ९६ ॥ रघुवर तव मूर्तिर्मामके मानसाब्जे नरकगतिहरं ते नामधेयं मुखे मे । अनिशमतुलभक्त्या मस्तकं त्वत्पदाब्जे भवजलनिधिमग्नं रक्ष मामार्तबंधो ॥ ९७ ॥ रामरत्नमहं वंदे चित्रकूटपतिं हरिम् । कौसल्याभक्तिसंभूतं जानकीकंठभूषणम् ॥९८॥ इति श्रीसनत्कुमारसंहितायां नारदोक्तं श्रीरामचंद्रस्तवराजस्तोत्रं संपूर्णम् ॥

१०४. रामगीता ।

श्रीगणेशाय नमः ॥ श्रीमहादेव उवाच । ततो जगन्मंग-
लमंगलात्मना विधाय रामायणकीर्तिमुत्तमाम् । चचार
पूर्वाचरितं रघूत्तमो राजर्षिवर्यैरभिसेवितं यथा ॥ १ ॥
सौमित्रिणा पृष्ट उदारबुद्धिना रामः कथाः प्राह पुरातनीः
शुभाः । राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्व-
मथाह राघवः ॥ २ ॥ कदाचिदेकांत उपस्थितं प्रभुं
रामं रमालालितपादपंकजम् । सौमित्रिरासादितशुद्ध-
भावनः प्रणम्य भक्त्या विनयान्वितोऽब्रवीत् ॥ ३ ॥
सौमित्रिरुवाच । त्वं शुद्धबोधोऽसि हि सर्वदेहिनामा-
त्मास्यधीशोऽसि निराकृतिः स्वयम् । प्रतीयसे ज्ञानदृशां
महामते पादाब्जभृंगाहितसंगसंगिनाम् ॥ ४ ॥ अहं प्रप-
न्नोऽस्मि पदांबुजं प्रभो भवापवर्गं तव योगिभावितम् ।
यथांजसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथानुशाधि
माम् ॥ ५ ॥ श्रुत्वाथ सौमित्रिवचोऽखिलं तदा प्राह
प्रपन्नार्तिहरः प्रसन्नधीः । विज्ञानमज्ञानतमोपशांतये
श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥ श्रीराम उवाच ।
आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशु-
द्धमानसः । समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गु-
रुमात्मलब्धये ॥ ७ ॥ क्रिया शरीरोद्भवहेतुरादृता प्रिया-
प्रियौ तौ भवतः सुरागिणः । धर्मेतरौ तत्र पुनः शरीरकं

पुनः क्रिया चक्रवदीर्यते भवः ॥ ८ ॥ अज्ञानमेवास्य हि मूलकारणं तद्धानमेवात्र विधौ विधीयते । विद्यैव तन्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितम् ॥ ९ ॥ नाज्ञानहानिर्न च रागसंक्षयो भवेत्ततः कर्म सदोषमुद्भवेत् । ततः पुनः संसृतिरप्यवारिता तस्माद्बुधो ज्ञानविचारवान्भवेत् ॥ १० ॥ ननु क्रिया वेदमुखेन चोदिता यथैव विद्या पुरुषार्थसाधनम् । कर्तव्यता प्राणभृतः प्रचोदिता विद्यासहायत्वमुपैति सा पुनः ॥ ११ ॥ कर्माकृतौ दोषमपि श्रुतिर्जगौ तस्मात्सदा कार्यमिदं मुमुक्षुणा । ननु स्वतंत्रा ध्रुवकार्यकारिणी विद्या न किंचिन्मनसाप्यपेक्षते ॥ १२ ॥ न सत्यकार्योऽपि हि यद्वदध्वरः प्रकांक्षतेऽन्यानपि कारकादिकान् । तथैव विद्या विधितः प्रकाशितैर्विशिष्यते कर्मभिरेव मुक्तये ॥ १३ ॥ केचिद्वदंतीति वितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् । देहाभिमानादभिवर्धते क्रिया विद्यागताहंकृतितः प्रसिध्यति ॥ १४ ॥ विशुद्धविज्ञानविरोचनांचिता विद्यात्मवृत्तिश्चरमेति भण्यते । उदेति कर्माखिलकारकादिभिर्निहंति विद्याऽखिलकारकादिकम् ॥ १५ ॥ तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्न समुच्चयो भवेत् । आत्मानुसंधानपरायणः सदा निवृत्तसर्वेंद्रियवृत्तिगोचरः ॥ १६॥ यावच्छरीरादिषु माययात्मधीस्तावद्विधेयो विधिवादक-

र्मणाम् । नेतीति वाक्यैरखिलं निषिध्य तज्ज्ञात्वा परात्मानमथ त्यजेत्क्रियाः ॥ १७ ॥ यदा परात्मात्मविभेदभेदकं विज्ञानमात्मन्यवभाति भास्वरम् । तदैव माया प्रविलीयतेऽजसा सकारका कारणमात्मसंसृतेः ॥ १८ ॥ श्रुतिप्रमाणाभिविनाशिता च सा कथं भविष्यत्यपि कार्यकारिणी । विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्या न पुनर्भविष्यति ॥ १९ ॥ यदि स्म नष्टा न पुनः प्रसूयते कर्ताहमस्येति मतिः कथं भवेत् । तस्मात्स्वतंत्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥ सा तैत्तिरीयश्रुतिराह सादरं न्यासं प्रशस्ताखिलकर्मणां स्फुटम् । एतावदित्याह च वाजिनां श्रुतिर्ज्ञानं विमोक्षाय न कर्मसाधनम् ॥ २१ ॥ विद्यासमत्वेन तु दर्शितस्त्वया क्रतुर्न दृष्टांत उदाहृतः समः । फलैः पृथक्त्वाद्बहुकारकैः क्रतुः संसाध्यते ज्ञानमतो विपर्ययम् ॥ २२ ॥ सप्रत्यवायो ह्यहमित्यनात्मधीरज्ञप्रसिद्धा न तु तत्त्वदर्शिनः । तस्माद्बुधस्त्याज्यमपि क्रियात्मभिर्विधानतः कर्म विधिप्रकाशितम् ॥ २३ ॥ श्रद्धान्वितस्तत्त्वमसीति वाक्यतो गुरोः प्रसादादपि शुद्धमानसः । विज्ञाय चैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकंपनः ॥ २४ ॥ आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः । तत्त्वंपदार्थौ परमात्मजीवकावसीति चैकात्म्य-

मथानयोर्भवेत् ॥ २५ ॥ प्रत्यक्परोक्षादिविरोधमात्मनो-
र्विहाय संगृह्य तयोश्चिदात्मताम् । संशोधितां लक्षणया
च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत् ॥ २६ ॥
एकात्मकत्वाज्जहती न संभवेत्तथाऽजहल्लक्षणता विरोधतः ।
सोऽयंपदार्थाविव भागलक्षणा युज्येत तत्त्वंपदयोरदोषतः
॥ २७ ॥ रसादिपंचीकृतभूतसंभवं भोगालयं दुःख-
सुखादिकर्मणाम् । शरीरमाद्यंतवदादिकर्मजं मायामयं
स्थूलमुपाधिमात्मनः ॥ २८ ॥ सूक्ष्मं मनोबुद्धिदशेंद्रियै-
र्युतं प्राणैरपंचीकृतभूतसंभवम् । भोक्तुः सुखादेरनुसाधनं
भवेच्छरीरमन्यद्विदुरात्मनो बुधः ॥ २९ ॥ अनाद्यनि-
र्वाच्यमपीह कारणं मायाप्रधानं तु परं शरीरकम् । उपा-
धिभेदात्तु यतः पृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्र-
मात् ॥३०॥ कोशेषु पंचस्वपि तत्तदाकृतिर्विभाति संगा-
त्स्फटिकोपलो यथा । असंगरूपोऽयमजो यतोऽद्वयो विज्ञा-
यतेऽस्मिन्परितो विचारिते ॥३१॥ बुद्धेस्त्रिधा वृत्तिरपीह
दृश्यते स्वप्नादिभेदेन गुणत्रयात्मनः । अन्योन्यतोऽस्मिन्व्य-
भिचारतो मृषा नित्ये परे ब्रह्मणि केवले शिवे ॥३२॥ देहें-
द्रियप्राणमनश्चिदात्मनां संघादजस्रं परिवर्तते धियः ।
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः
॥ ३३ ॥ नेति प्रमाणेन निराकृताऽखिलो हृदा समास्वा-
दितचिद्घनामृतः । त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथां-

ऽभः प्रजहाति तत्फलम् ॥३४॥ कदाचिदात्मा न मृतो न जायते न क्षीयते नापि विवर्धते नवः । निरस्तसर्वातिशयः सुखात्मकः स्वयंप्रभः सर्वगतोऽयमद्वयः ॥३५॥ एवंविधे ज्ञानमये सुखात्मके कथं भवो दुःखमयः प्रतीयते । अज्ञानतोऽध्यासवशात्प्रकाशते ज्ञाने विलीयेत विरोधतः क्षणात् ॥ ३६ ॥ यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः । असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत् ॥३७॥ विकल्पमायारहिते चिदात्मकेऽहंकार एष प्रथमः प्रकल्पितः । अध्यास एवात्मनि सर्वकारणे निरामये ब्रह्मणि केवले परे ॥३८॥ इच्छादिरागादिसुखादिधर्मिकाः सदा धियः संसृतिहेतवः परे । यस्मात्प्रसुप्तौ तदभावतः परः सुखस्वरूपेण विभाव्यते हि नः ॥ ३९ ॥ अनाद्यविद्योद्भवबुद्धिबिंबितो जीवः प्रकाशोयमितीर्यते चितः । आत्मा धियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः स एव हि ॥ ४० ॥ चिद्बिंबसाक्षात्मधियां प्रसंगतस्त्वेकत्र वातादनलात्तलोहवत् । अन्योन्यमध्यासवशात्प्रतीयते जडाजडत्वं च चिदात्मचेतसोः ॥ ४१ ॥ गुरोः सकाशादपि वेदवाक्यतः संजातविद्यानुभवो निरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥४२॥ प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीव निर्मलः ।

विशुद्धविज्ञानघनो निरामयः संपूर्ण आनंदमयोऽहमक्रियः ॥४३॥ सदैव मुक्तोऽहमचिंत्यशक्तिमानतींद्रियज्ञानमविक्रियात्मकः । अनंतपारोहमहर्निशं बुधैर्विभावितोऽहं हृदि वेदवादिभिः ॥ ४४ ॥ एवं सदात्मानमखंडितात्मना विचार्यमाणस्य विशुद्धभावना । हन्यादविद्यामचिरेण कारकै रसायनं यद्वदुपासितं रुजः ॥ ४५ ॥ विविक्त आसीन उपारतेंद्रियो विनिर्जितात्मा विमलांतराशयः । विभावयेदेकमनन्यसाधनो विज्ञानदृक्केवल आत्मसंस्थितः॥४६॥ विश्वं यदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे । पूर्णश्चिदानंदमयोऽवतिष्ठते न वेद बाह्यं न च किंचिदांतरम् ॥ ४७ ॥ पूर्वं समाधेरखिलं विचिंतयेदोंकारमात्रं सचराचरं जगत् । तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बोधतः ॥ ४८ ॥ अकारसंज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात् । प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधिपूर्वं न तु तत्त्वतो भवेत् ॥४९॥ विश्वं त्वकारं पुरुषं विलापयेदुकारमध्ये बहुधा व्यवस्थितम् । ततो मकारे प्रविलाप्य तैजसं द्वितीयवर्णं प्रणवस्य चांतिमम् ॥ ५० ॥ मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् । सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥ एवं सदा जातपरात्मभावनः स्वानंदतुष्टः परिविस्मृताखिलः । आस्ते

स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसिंधुवत् ॥५२॥ एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेंद्रियगोचरस्य हि । विनिर्जिताशेषरिपोरहं सदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३॥ ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबंधनः । प्रारब्धमश्नन्नभिमानवर्जितो मय्येव साक्षात्प्रविलीयते ततः ॥ ५४ ॥ आदौ च मध्ये च तथैव चांततो भयं विदित्वा भयशोककारणम् । हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मानमथाखिलात्मनाम् ॥ ५५ ॥ आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयात्मना तदा । यथा जलं वारिनिधौ यथा पयः क्षीरे वियद्व्योम्न्यनिले यथानिलः ॥ ५६ ॥ इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेति विभावयन्मुनिः । निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेंदुभेदो दिशि दिग्भ्रमादयः ॥५७॥ यावन्न पश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् । श्रद्धालुरत्यूर्जितभक्तिलक्षणो यस्तस्य दृश्योऽहमहर्निशं हृदि ॥ ५८ ॥ रहस्यमेतच्छ्रुतिसारसंग्रहं मया विनिश्चित्य तवोदितं प्रिय । यस्त्वेतदालोचयतीह बुद्धिमान्स मुच्यते पातकराशिभिः क्षणात् ॥ ५९ ॥ भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा । मद्भावनाभावितशुद्धमानसः सुखी भवानंदमयो निरामयः ॥ ६० ॥ यः सेवते मामगुणं गुणात्परं

हृदा कदा वा यदि वा गुणात्मकम् । सोऽहं स्वपादांचित-रेणुभिः स्पृशन्पुनाति लोकत्रितयं यथा रविः ॥ ६१ ॥ विज्ञानमेतदखिलं श्रुतिसारमेकं वेदांतवेद्यचरणेन मयैव गीतम् । यः श्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषु भक्तिः ॥ ६२ ॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकांडे रामगीता समाप्ता ॥

१०५. रामरक्षास्तोत्रम् ।

श्रीगणेशाय नमः ॥ अस्य श्रीरामरक्षास्तोत्रमंत्रस्य बुधकौशिक ऋषिः। श्रीसीतारामचंद्रो देवता । अनुष्टुप् छंदः। सीता शक्तिः । श्रीमद्धनुमान् कीलकम् । श्रीरामचंद्रप्रीत्यर्थे रामरक्षास्तोत्रजपे विनियोगः ॥ अथ ध्यानम् ॥ ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम् । वामांकारूढसीतामुखकमलमिलल्लोचनं नीरदाभं नानाऽलंकारदीप्तं दधतमुरुजटामंडलं रामचंद्रम् ॥ १ ॥ इति ध्यानम् ॥ चरितं रघुनाथस्य शतकोटिप्रविस्तरम् । एकैकमक्षरं पुंसां महापातकनाशनम् ॥ १ ॥ ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम् । जानकीलक्ष्मणोपेतं जटामुकुटमंडितम् ॥ २ ॥ सासितूणधनुर्बाणपाणिं नक्तंचरांतकम् । स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् ॥३॥ रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम् । शिरो

मे राघवः पातु भालं दशरथात्मजः ॥ ४ ॥ कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती । घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ॥ ५ ॥ जिह्वां विद्यानिधिः पातु कंठं भरतवंदितः । स्कंधौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः ॥ ६ ॥ करौ सीतापतिः पातु हृदयं जामदग्न्यजित् । मध्यं पातु खरध्वंसी नाभिं जांबवदाश्रयः ॥ ७ ॥ सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः । ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् ॥ ८ ॥ जानुनी सेतुकृत्पातु जंघे दशमुखांतकः । पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः ॥ ९ ॥ एतां रामबलोपेतां रक्षां यः सुकृती पठेत् । स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ॥ १० ॥ पातालभूतलव्योमचारिणश्छद्मचारिणः । न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ॥ ११ ॥ रामेति रामभद्रेति रामचंद्रेति वा स्मरन् । नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विंदति ॥१२॥ जगज्जैत्रैकमंत्रेण रामनाम्नाऽभिरक्षितम् । यः कंठे धारयेत्तस्य करस्थाः सर्वसिद्धयः ॥१३॥ वज्रपंजरनामेदं यो रामकवचं स्मरेत् । अव्याहताज्ञः सर्वत्र लभते जयमंगलम् ॥ १४ ॥ आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हरः । तथा लिखितवान्प्रातः प्रबुद्धो बुधकौशिकः ॥१५॥ आरामः कल्पवृक्षाणां विरामः सकलापदाम् । अभिरामस्त्रिलोकानां रामः श्रीमान्स नः प्रभुः ॥ १६ ॥

तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ । पुंडरीकविशालाक्षौ चीरकृष्णाजिनांबरौ ॥ १७ ॥ फलमूलाशिनौ दांतौ तापसौ ब्रह्मचारिणौ । पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥ १८ ॥ शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम् । रक्षःकुलनिहंतारौ त्रायेतां नो रघूत्तमौ ॥ १९ ॥ आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषंगसंगिनौ । रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छताम् ॥ २० ॥ सन्नद्धः कवची खड्गी चापबाणधरो युवा । गच्छन्मनोरथोऽस्माकं रामः पातु सलक्ष्मणः ॥ २१ ॥ रामो दाशरथिः शूरो लक्ष्मणानुचरो बली । काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघूत्तमः ॥ २२ ॥ वेदांतवेद्यो यज्ञेशः पुराणपुरुषोत्तमः । जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ॥ २३ ॥ इत्येतानि जपन्नित्यं मद्भक्तः श्रद्धयान्वितः । अश्वमेधाधिकं पुण्यं संप्राप्नोति न संशयः ॥ २४ ॥ रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम् । स्तुवंति नामभिर्दिव्यैर्न ते संसारिणो नरः ॥ २५ ॥ रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुंदरं काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम् । राजेंद्रं सत्यसंधं दशरथतनयं श्यामलं शांतमूर्तिं वंदे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥२६॥ रामाय रामभद्राय रामचंद्राय वेधसे । रघुनाथाय नाथाय सीतायाः पतये

नमः ॥ २७ ॥ श्रीराम राम रघुनंदन राम राम श्रीराम राम भरताग्रज राम राम । श्रीराम राम रणकर्कश राम राम श्रीराम राम शरणं भव राम राम ॥२८॥ श्रीरामचंद्रचरणौ मनसा स्मरामि श्रीरामचंद्रचरणौ वचसा गृणामि । श्रीरामचंद्रचरणौ शिरसा नमामि श्रीरामचंद्रचरणौ शरणं प्रपद्ये ॥२९॥ माता रामो मत्पिता रामचंद्रः स्वामी रामो मत्सखा रामचंद्रः । सर्वस्वं मे रामचंद्रो दयालुर्नान्यं जाने नैव जाने न जाने ॥ ३० ॥ दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा । पुरतो मारुतिर्यस्य तं वंदे रघुनंदनम् ॥ ३१ ॥ लोकाभिरामं रणरंगधीरं राजीवनेत्रं रघुवंशनाथम् । कारुण्यरूपं करुणाकरं तं श्रीरामचंद्रं शरणं प्रपद्ये ॥ ३२ ॥ मनोजवं मारुततुल्यवेगं जितेंद्रियं बुद्धिमतां वरिष्ठम् । वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥३३॥ कूजंतं रामरामेति मधुरं मधुराक्षरम् । आरुह्य कविताशाखां वंदे वाल्मीकिकोकिलम् ॥ ३४ ॥ आपदामपहर्तारं दातारं सर्वसंपदाम् । लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ ३५ ॥ भर्जनं भवबीजानामर्जनं सुखसंपदाम् । तर्जनं यमदूतानां रामरामेति गर्जनम् ॥ ३६ ॥ रामो राजमणिः सदा विजयते रामं रमेशं भजे रामेणाभिहता निशाचरचमू रामाय तस्मै नमः । रामान्नास्ति परायणं परतरं रामस्य

दासोऽस्म्यहं रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥३७॥ राम रामेति रामेति रमे रामे मनोरमे। सहस्रनाम तत्तुल्यं रामनाम वरानने ॥३८॥ इति श्रीबुधकौशिकविरचितं रामरक्षास्तोत्रं संपूर्णम् ॥

१०६. ब्रह्मदेवकृतरामस्तुतिः ।

श्रीगणेशाय नमः ॥ ब्रह्मोवाच । वंदे देवं विष्णुमशेषस्थितिहेतुं त्वामध्यात्मज्ञानिभिरंतर्हृदि भाव्यम् । हेयाहेयद्वंद्वविहीनं परमेकं सत्तामात्रं सर्वहृदिस्थं दृशिरूपम् ॥ १ ॥ प्राणापानौ निश्चयबुद्ध्या हृदि रुद्ध्वा छित्त्वा सर्वं संशयबंधं विषयौघान् । पश्यंतीशं यं गतमोहा यतयस्तं वंदे रामं रत्नकिरीटं रविभासम् ॥२॥ मायातीतं माधवमाद्यं जगदादिं मानातीतं मोहविनाशं मुनिवंद्यम्। योगिध्येयं योगविधानं परिपूर्णं वंदे रामं रंजितलोकं रमणीयम् ॥ ३ ॥ भावाभावप्रत्ययहीनं भवमुख्यैर्भोगासक्तैरर्चितपादांबुजयुग्मम् । नित्यं शुद्धं बुद्धमनंतं प्रणवाख्यं वंदे रामं वीरमशेषासुरदावम् ॥ ४ ॥ त्वं मे नाथो नाथितकार्याखिलकारी मानातीतो माधवरूपोऽखिलधारी । भक्त्या गम्यो भावितरूपो भवहारी योगाभ्यासैर्भावितचेतःसहचारी ॥ ५ ॥ त्वामाद्यंतं लोकततीनां परमीशं लोकानां नो लौकिकमानैरधिगम्यम् । भक्तिश्रद्धाभावसमेतैर्भजनीयं वंदे रामं सुंदरमिंदीवरनीलम् ॥ ६ ॥

को वा ज्ञातुं त्वामतिमानं गतमानं मानासक्तो माधव शक्तो मुनिमान्यम् । वृंदारण्ये वंदितवृंदारकवृंदं वंदे रामं भवमुखवंद्यं सुखकंदम् ॥ ७ ॥ नानाशास्त्रैर्वेदकदंबैः प्रतिपाद्यं नित्यानंदं निर्विषयज्ञानमनादिम् । मत्सेवार्थं मानुषभावं प्रतिपन्नं वंदे रामं मरकतवर्णं मथुरेशम् ॥ ८ ॥ श्रद्धायुक्तो यः पठतीमं स्तवमाद्यं ब्राह्मं ब्रह्मज्ञानविधानं भुवि मर्त्यः । रामं श्यामं कामितकामप्रदमीशं ध्यात्वा ध्याता पातकजालैर्विगतः स्यात् ॥ ९ ॥ इति श्रीमदध्यात्मरामायणे युद्धकांडे ब्रह्मदेवकृतं रामस्तोत्रं संपूर्णम् ॥

१०७. जटायुकृतरामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जटायुरुवाच । अगणितगुणमप्रमेयमाद्यं सकलजगत्स्थितिसंयमादिहेतुम् । उपरमपरमं परात्मभूतं सततमहं प्रणतोऽस्मि रामचंद्रम् ॥ १ ॥ निरवधिसुखमिंदिराकटाक्षं क्षपितसुरेंद्रचतुर्मुखादिदुःखम् । नरवरमनिशं नतोऽस्मि रामं वरदमहं वरचापबाणहस्तम् ॥ २ ॥ त्रिभुवनकमनीयरूपमीड्यं रविशतभासुरमीहितप्रदानम् । शरणदमनिशं सुरागमूले कृतनिलयं रघुनंदनं प्रपद्ये ॥ ३ ॥ भवविपिनदवाग्निनामधेयं भवमुखदैवतदैवतं दयालुम् । दनुजपतिसहस्रकोटिनाशं रवितनयासदृशं हरिं प्रपद्ये ॥ ४ ॥ अविरतभवभावनातिदूरं भवविमुखैर्मुनिभिः सदैव दृश्यम् । भवजलधिसुतारणांघ्रि-

पोतं शरणमहं रघुनंदनं प्रपद्ये ॥५॥ गिरिशगिरिसुताम-
नोनिवासं गिरिवरधारिणमीहिताभिरामम् । सुरवरदनु-
जेंद्रसेवितांघ्रिं सुरवरदं रघुनायकं प्रपद्ये ॥ ६ ॥ परधन-
परदारवर्जितानां परगुणभूतिषु तुष्टमानसानाम् । परहि-
तनिरतात्मनां सुसेव्यं रघुवरमंबुजलोचनं प्रपद्ये ॥ ७ ॥
स्मितरुचिरविकासिताननाब्जमतिसुलभं सुरराजनीलनी-
लम् । सितजलरुहचारुनेत्रशोभं रघुपतिमीशगुरोर्गुरुं प्रपद्ये
॥८॥ हरिकमलजशंभुरूपभेदात्त्वमिह विभासि गुणत्रयानु-
वृत्तः । रविरिव जलपूरितोदपात्रेष्वमरपतिस्तुतिपात्रमीश-
मीडे ॥ ९ ॥ रतिपतिशतकोटिसुंदरांगं शतपथगोचरभा-
वनाविदूरम् । यतिपतिहृदये सदा विभातं रघुपतिमार्ति-
हरं प्रभुं प्रपद्ये ॥ १० ॥ इत्येवं स्तुवतस्तस्य प्रसन्नोऽभूद्र-
घूत्तमः । उवाच गच्छ भद्रं ते मम विष्णोः परं पदम् ॥ ११॥
शृणोति य इदं स्तोत्रं लिखेद्वा नियतः पठेत् । स याति मम
सारूप्यं मरणे मत्स्मृतिं लभेत् ॥ १२॥ इति राघवभाषितं
तदा श्रुतवान् हर्षसमाकुलो द्विजः । रघुनंदनसाम्यमा-
स्थितः प्रययौ ब्रह्मसुपूजितं पदम् ॥ १३ ॥ इति श्रीमद-
ध्यात्मरामायणे अरण्यकांडे जटायुकृतरामस्तोत्रं संपूर्णम् ॥

१०८. रामाष्टकम् ।

श्रीगणेशाय नमः ॥ भजे विशेषसुंदरं समस्तपापखडनम् ।
स्वभक्तचित्तरंजनं सदैव राममद्वयम् ॥ १ ॥ जटाकला-

पशोभितं समस्तपापनाशकम् । स्वभक्तभीतिभंजनं भजे ह राममद्वयम् ॥ २ ॥ निजस्वरूपबोधकं कृपाकरं भवापहम् । समं शिवं निरंजनं भजे ह राममद्वयम् ॥ ३ ॥ सहप्रपंचकल्पितं ह्यनामरूपवास्तवम् । निराकृतिं निरामयं भजे ह राममद्वयम् ॥ ४ ॥ निष्प्रपंचनिर्विकल्पनिर्मलं निरामयम् । चिदेकरूपसंततं भजे ह राममद्वयम् ॥ ५ ॥ भवाब्धिपोतरूपकं ह्यशेषदेहकल्पितम् । गुणाकरं कृपाकरं भजे ह राममद्वयम् ॥ ६ ॥ महावाक्यबोधकैर्विराजमानवाक्पदैः । परब्रह्म व्यापकं भजे ह राममद्वयम् ॥ ७ ॥ शिवप्रदं सुखप्रदं भवच्छिदं भ्रमापहम् । विराजमानदैशिकं भजे ह राममद्वयम् ॥ ८ ॥ रामाष्टकं पठति यः सुकरं सुपुण्यं व्यासेन भाषितमिदं शृणुते मनुष्यः । विद्यां श्रियं विपुलसौख्यमनंतकीर्तिं संप्राप्य देहविलये लभते च मोक्षम् ॥९॥ इति श्रीव्यासविरचितं रामाष्टकं संपूर्णम् ॥

१०९. रामाष्टकम् ।

श्रीगणेशाय नमः ॥ कृतार्तदेववंदनं दिनेशवंशनंदनम् । सुशोभिभालचंदनं नमामि राममीश्वरम् ॥ १ ॥ मुनींद्रयज्ञकारकं शिलाविपत्तिहारकम् । महाधनुर्विदारकं नमामि राममीश्वरम् ॥ २ ॥ स्वतातवाक्यकारिणं तपोवने विहारिणम् । करेषु चापधारिणं नमामि राममीश्वरम् ॥ ३ ॥

कुरंगमुक्तसायकं जटायुमोक्षदायकम् । प्रविद्धकीशनायकं नमामि राममीश्वरम् ॥ ४ ॥ प्लवंगसंगसंमतिं निबद्धनिम्नगापतिम् । दशास्यवंशसंक्षतिं नमामि राममीश्वरम् ॥ ५ ॥ विदीनदेवहर्षणं कपीप्सितार्थवर्षणम् । स्वबंधुशोककर्षणं नमामि राममीश्वरम् ॥ ६ ॥ गतारिराज्यरक्षणं प्रजाजनार्तिभक्षणम् । कृतास्तमोहलक्षणं नमामि राममीश्वरम् ॥७॥ हृताखिलाचलाभरं स्वधामनीतनागरम् । जगत्तमोदिवाकरं नमामि राममीश्वरम् ॥८॥ इदं समाहितात्मना नरो रघूत्तमाष्टकम् । पठन्निरंतरं भयं भवोद्भवं न विंदते ॥ ९ ॥ इति श्रीपरमहंसस्वामिब्रह्मानंदविरचितं श्रीरामाष्टकं संपूर्णम् ॥

११०. श्रीमहादेवकृतरामस्तुतिः ।

श्रीगणेशाय नमः ॥ श्रीमहादेव उवाच । नमोऽस्तु रामाय सशक्तिकाय नीलोत्पलश्यामलकोमलाय । किरीटहारांगदभूषणाय सिंहासनस्थाय महाप्रभाय ॥ १ ॥ त्वमादिमध्यांतविहीन एकः सृजस्यवस्यत्सि च लोकजातम् । स्वमायया तेन न लिप्यसे त्वं यत्स्वे सुखेऽजस्त्ररतोऽनवद्यः ॥ २ ॥ लीलां विधत्से गुणसंवृतस्त्वं प्रसन्नभक्तानुविधानहेतोः । नानाऽवतारैः सुरमानुषाद्यैः प्रतीयसे ज्ञानिभिरेव नित्यम् ॥ ३ ॥ स्वांशेन लोकं सकलं विधाय तं बिभर्षि च त्वं तदधः फणीश्वरः । उपर्यधो भान्वनिलोडु-

पौषधीप्रवर्षरूपोऽवसि नैकधा जगत् ॥ ४ ॥ त्वमिह देहभृतां शिखिरूपः पचसि भक्तमशेषमजस्रम् । पवनपंचकरूपसहायो जगदखंडमनेन बिभर्षि ॥ ५ ॥ चंद्रसूर्यशिखिमध्यगतं यत्तेज ईश चिदशेषतनूनाम् । प्राभवत्तनुभृतामिह धैर्यं शौर्यमात्रमखिलं तव सत्त्वम् ॥ ६ ॥ त्वं विरिंचिशिवविष्णुविभेदात्कालकर्मशशिसूर्यविभागात् । वादिनां पृथगिवेश विभासि ब्रह्म निश्चितमनन्यदिहैकम् ॥ ७ ॥ मत्स्यादिरूपेण यथा त्वमेकः श्रुतौ पुराणेषु च लोकसिद्धः । तथैव सर्वं सदसद्विभागस्त्वमेव नान्यद्भवतो विभाति ॥ ८ ॥ यद्यत्समुत्पन्नमनंतसृष्टावुत्पत्स्यते यच्च भवच्च यच्च । न दृश्यते स्थावरजंगमादौ त्वया विनाऽतः परतः परस्त्वम् ॥९॥ तत्त्वं न जानंति परात्मनस्ते जनाः समस्तास्तव माययातः । त्वद्भक्तसेवामलमानसानां विभाति तत्त्वं परमेकमैशम् ॥१०॥ ब्रह्मादयस्ते न विदुः स्वरूपं चिदात्मतत्त्वं बहिरर्थभावाः । ततो बुधस्त्वामिदमेव रूपं भक्त्या भजन्मुक्तिमुपैत्यदुःखः ॥ ११ ॥ अहं भवन्नामगुणैः कृतार्थो वसामि काश्यामनिशं भवान्या । मुमूर्षमाणस्य विमुक्तयेऽहं दिशामि मंत्रं तव राम नाम ॥१२॥ इमं स्तवं नित्यमनन्यभक्त्या शृण्वंति गायंति लिखंति ये वै । ते सर्वसौख्यं परमं च लब्ध्वा भवत्पदं यांतु भवत्प्रसादात् ॥१३॥ इति श्रीमहादेवकृतरामस्तोत्रं संपूर्णम् ॥

१११. अहल्याकृतरामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ अहल्योवाच । अहो कृतार्थाऽस्मि जगन्निवास ते पादाब्जसंलग्नरजःकणादहम् । स्पृशामि यत्पद्मजशंकरादिभिर्विमृग्यते रंधितमानसैः सदा ॥ १ ॥ अहो विचित्रं तव राम चेष्टितं मनुष्यभावेन विमोहितं जगत् । चलस्यजस्रं चरणादिवर्जितः संपूर्ण आनंदमयोऽतिमायिकः ॥२॥ यत्पादपंकजपरागपवित्रगात्रा भागीरथी भवविरिंचिमुखान्पुनाति । साक्षात्स एव मम दृग्विषयो यदास्ते किं वर्ण्यते मम पुराकृतभागधेयम् ॥ ३ ॥ मर्त्यावतारे मनुजाकृतिंहरिं रामाभिधेयं रमणीयदेहिनम् । धनुर्धरं पद्मविशाललोचनं भजामि नित्यं न परान्भजिष्ये ॥ ४ ॥ यत्पादपंकजरजः श्रुतिभिर्विमृग्यं यन्नाभिपंकजभवः कमलासनश्च । यन्नामसाररसिको भगवान्पुरारिस्तं रामचंद्रमनिशं हृदि भावयामि ॥ ५ ॥ यस्यावतारचरितानि विरंचिलोके गायंति नारदमुखा भवपद्मजाद्याः । आनंदजाश्रुपरिषिक्तकुचाग्रसीमा वागीश्वरी च तमहं शरणं प्रपद्ये ॥ ६ ॥ सोऽयं परात्मा पुरुषः पुराण एषः स्वयंज्योतिरनंत आद्यः । मायातनुं लोकविमोहनीयां धत्ते परानुग्रह एष रामः ॥ ७ ॥ अयं हि विश्वोद्भवसंयमानामेकः स्वमायागुणबिंबितो यः । विरिंचिविष्णवीश्वरनामभेदान् धत्ते स्वतंत्रः परिपूर्ण आत्मा ॥ ८ ॥ नमोऽस्तु ते राम

तवांघ्रिपंकजं श्रिया धृतं वक्षसि लालितं प्रियात् । आक्रांतमेकेन जगत्त्रयं पुरा ध्येयं मुनींद्रैरभिमानवर्जितैः ॥९॥ जगतामादिभूतस्त्वं जगत्त्वं जगदाश्रयः । सर्वभूतेष्वसंबद्ध एको भाति भवान्परः ॥ १० ॥ ॐकारवाच्यस्त्वं राम वाचामविषयः पुमान् । वाच्यवाचकभेदेन भवानेव जगन्मयः ॥ ११ ॥ कार्यकारणकर्तृत्वफलसाधनभेदतः । एको विभासि राम त्वं मायया बहुरूपया ॥ १२ ॥ त्वन्मायामोहितधियस्त्वां न जानंति तत्त्वतः । मानुषं त्वाभिमन्यंते मायिनं परमेश्वरम् ॥ १३ ॥ आकाशवत्त्वं सर्वत्र बहिरंतर्गतोऽमलः । असंगो ह्यचलो नित्यः शुद्धो बुद्धः सदव्ययः ॥ १४ ॥ योषिन्मूढाहमज्ञा ते तत्त्वं जाने कथं विभो । तस्मात्ते शतशो राम नमस्कुर्यामनन्यधीः ॥१५॥ देव मे यत्र कुत्रापि स्थिताया अपि सर्वदा । त्वत्पादकमले सक्ता भक्तिरेव सदाऽस्तु मे ॥१६॥ नमस्ते पुरुषाध्यक्ष नमस्ते भक्तवत्सल । नमस्तेऽस्तु हृषीकेश नारायण नमोस्तु ते ॥ १७ ॥ भवभयहरमेकं भानुकोटिप्रकाशं करधृतशरचापं कालमेघावभासम् । कनकरुचिरवस्त्रं रत्नवत्कुंडलाढ्यं कमलविशदनेत्रं सानुजं राममीडे ॥१८॥ स्तुत्वैवं पुरुषं साक्षाद्राघवं पुरतः स्थितम् । परिक्रम्य प्रणम्याशु सानुज्ञाता ययौ पतिम् ॥ १९ ॥ अहल्यया कृतं स्तोत्रं यः पठेद्भक्तिसंयुतः । स मुच्यतेऽखिलैः

पापैः परं ब्रह्माधिगच्छति ॥ २० ॥ पुत्राद्यर्थे पठेद्भक्त्या रामं हृदि निधाय च । संवत्सरेण लभते वंध्या अपि सुपुत्रकम् ॥२१॥ सर्वान्कामानवाप्नोति रामचंद्रप्रसादतः॥२२॥ ब्रह्मघ्नो गुरुतल्पगोऽपि पुरुषः स्तेयी सुरापोऽपि वा मातृभ्रातृविहिंसकोऽपि सततं भोगैकबद्धादरः । नित्यं स्तोत्रमिदं जपन्रघुपतिं भक्त्या हृदिस्थं स्मरन् ध्यायन्मुक्तिमुपैति किं पुनरसौ स्वाचारयुक्तो नरः ॥२३॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे बालकांडांतर्गतमहल्याविरचितं रामचंद्रस्तोत्रं संपूर्णम् ॥

११२. इन्द्रकृतरामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ इंद्र उवाच । भजेऽहं सदा राममिंदीवराभं भवारण्यदावानलाभाभिधानम् । भवानीहृदा भावितानंदरूपं भवाभावहेतुं भवादिप्रपन्नम् ॥ १ ॥ सुरानीकदुःखौघनाशैकहेतुं नराकारदेहं निराकारमीड्यम् । परेशं परानंदरूपं वरेण्यं हरिं राममीशं भजे भारनाशम् ॥ २ ॥ प्रपन्नाखिलानंददोहं प्रपन्नं प्रपन्नार्तिनिःशेषनाशाभिधानम् । तपोयोगयोगीशभावाभिभाव्यं कपीशादिमित्रं भजे राममित्रम् ॥ ३ ॥ सदा भोगभाजां सुदूरे विभातं सदा योगभाजामदूरे विभातम् । चिदानंदकंदं सदा राघवेशं विदेहात्मजानंदरूपं प्रपद्ये ॥ ४ ॥ महायोगमायाविशेषानुयुक्तो विभासीश

लीलानराकारवृत्तिः । त्वदानंदलीलाकथापूर्णकर्णाः सदानंदरूपा भवंतीह लोके ॥ ५ ॥ अहं मानपानाभिमत्तप्रमत्तो न वेदाखिलेशाभिमानाभिमानः । इदानीं भवत्पादपद्मप्रसादात्त्रिलोकाधिपत्याभिमानो विनष्टः ॥ ६ ॥ स्फुरद्रत्नकेयूरहाराभिरामं धराभारभूतासुरानीकदावम् । शरच्चंद्रवक्त्रं लसत्पद्मनेत्रं दुरावारपारं भजे राघवेशम् ॥७॥ सुराधीशनीलाभ्रनीलांगकांतिं विराधादिरक्षोवधाल्लोकशांतिम् । किरीटादिशोभं पुरारातिलाभं भजे रामचंद्रं रघूणामधीशम् ॥ ८ ॥ लसच्चंद्रकोटिप्रकाशादिपीठे समासीनमंके समाधाय सीताम् । स्फुरद्धेमवर्णां तडित्पुंजभासां भजे रामचंद्रं निवृत्तार्तितंद्रम् ॥९॥ इति श्रीमदध्यात्मरामायणे युद्धकांडे इंद्रकृतं रामस्तोत्रं संपूर्णम् ॥

११३. रामचंद्राष्टकम् ।

श्रीगणेशाय नमः ॥ ॐ चिदाकारो धाता परमसुखदः पावनतनुर्मुनींद्रैर्योगींद्रैर्यतिपतिसुरेंद्रैर्हनुमता । सदा सेव्यः पूर्णो जनकतनयांगः सुरगुरू रमानाथो रामो रमतु मम चित्ते तु सततम् ॥१॥ मुकुंदो गोविंदो जनकतनयालालितपदः पदं प्राप्ता यस्याधमकुलभवा चापि शबरी । गिरातीतोऽगम्यो विमलधिषणैर्वेदवचसा रमानाथो रामो रमतु मम चित्ते तु सततम् ॥२॥ धराधीशोऽधीशः सुरनरवराणां रघुपतिः किरीटी केयूरी कनककपिशः शोभि-

तवपुः । समासीनः पीठे रविशतनिभे शांतमनसो रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ३ ॥ वरेण्यः शारण्यः कपिपतिसखा शांतविधुरो ललाटे काश्मीरो रुचिरगतिभंगः शशिमुखः । नराकारो रामो यतिपतिनुतः संस्मृतिहरो रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ४ ॥ विरूपाक्षः काश्यामुपदिशति यन्नाम शिवदं सहस्रं यन्नाम्नां पठति गिरिजा प्रत्युषसि वै । कलौ के गायंतीश्वरविधिमुखा यस्य चरितं रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ५ ॥ परो धीरोऽधीरोऽसुरकुलभवश्चासुरहरः परात्मा सर्वज्ञो नरसुरगणैर्गीतसुयशाः । अहल्याशापघ्नः शरकर अजः कौशिकसखा रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ६ ॥ हृषीकेशः शौरिर्धरणिधरशायी मधुरिपुरुपेंद्रो वैकुंठो गजरिपुहरस्तुष्टमनसः । बलिध्वंसी वीरो दशरथसुतो नीतिनिपुणो रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ७ ॥ कविः सौमित्रीड्यः कपटमृगघाती वनचरो रणश्लाघी दांतो धरणिभरहर्ता सुरनुतः । अमानी मानज्ञो निखिलजनपूज्यो हृदिशयो रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ८ ॥ इदं रामस्तोत्रं वरममरदासेन रचितमुषःकाले भक्त्या यदि पठति यो भावसहितम् । मनुष्यः स क्षिप्रं जनिमृतिभयं तापजनकं परित्यज्य श्रेष्ठं रघुपतिपदं याति शिवदम् ॥९॥

इति श्रीमद्रामदासपूज्यपादशिष्यश्रीमद्धंसदासशिष्येणा॰ मरदासाख्यकविना विरचितं श्रीमद्रामचंद्राष्टकं समाप्तम् ।

११४. श्रीसीतारामाष्टकम् ।

श्रीः ॥ ब्रह्ममहेंद्रसुरेंद्रमरुद्गणरुद्रमुनींद्रगणैरतिरम्यं क्षीरसरित्पतितीरमुपेत्य नुतं हि सतामवितारमुदारम् । भूमिभरप्रशमार्थमथ प्रथितप्रकटीकृतचिद्घनमूर्तिं त्वां भजतो रघुनंदन देहि दयाघन मे स्वपदांबुजदास्यम् ॥ १ ॥ पद्मदलायतलोचन हे रघुवंशविभूषण देव दयालो निर्मलनीरदनीलतनोऽखिललोकहृदंबुजभासक भानो । कोमलगात्र पवित्रपदाब्जरजःकणपावितगौतमकांत त्वां भजतो॰ ॥२॥ पूर्णपरात्पर पालय मामतिदीनमनाथमनंत सुखाब्धे प्रावृडदभ्रतडित्सुमनोहरपीतवरांबर राम नमस्ते । कामविभंजन कांततरानन कांचनभूषण रत्नकिरीट त्वां भजतो॰ ॥ ३ ॥ दिव्यशरच्छशिकांतिहरोज्वलमौक्तिकमाल विशालसुमौले कोटिरविप्रभ चारुचरित्र पवित्रविचित्रधनुःशरपाणे । चंडमहाभुजदंडविखंडितराक्षसराजमहागजदंड त्वां भजतो॰ ॥ ४ ॥ दोषविहिंस्रभुजंगसहस्रसुरोपमहानलकीलकलापे जन्मजरामरणोर्मिमनोमदमन्मथनक्रविचक्रभवाब्धौ । दुःखनिधौ च चिरं पतितं कृपयाऽद्य समुद्धर राम ततो मां त्वां भजतो॰ ॥ ५ ॥ संभूतिघोरमदोत्कटकुंजरतृट्क्षुदनीरदपिंडिततुंड दंडक-

रोन्मथितं च रजस्तम उन्मदमोहपदोज्झितवार्तम् । दीन-मनन्यगतिं कृपणं शरणागतमाशु विमोचय मूढं त्वां भजतो० ॥ ६ ॥ जन्मशतार्जितपापसमन्वितहृत्कमले पतिते पशुकल्पे हे रघुवीर महारणधीर दयां कुरु मय्यति-मंदमनीषे । त्वं जननी भगिनी च पिता मम तावदसि त्ववितापि कृपालो त्वां भजतो० ॥७॥ त्वां तु दयालु-मकिंचनवत्सलमुत्पलहारमपारमुदारं राम विहाय कम-न्यमनामयमीश जनं शरणं ननु यायाम् । त्वत्पदपद्ममतः श्रितमेव मुदा खलु देव सदाऽव ससीतं त्वां भजतो० ॥ ८ ॥ यः करुणामृतसिंधुरनाथजनोत्तमबंधुरजोत्तम-कारी भक्तभयोर्मिभवाब्धितरी सरयूतटिनीतटचारुवि-हारी । तस्य रघुप्रवरस्य निरंतरमष्टकमेतदनिष्टहरं वै यस्तु पठेदमरः स नरो लभतेऽच्युतरामपदांबुजदास्यम् ॥ ९ ॥

इति श्रीमन्मधुसूदनाश्रमशिष्याऽच्युतयतिविरचितं श्रीमत्सीतारामाष्टकं संपूर्णम् ॥

मारुतिस्तोत्राणि ।

मनोजवं मारुततुल्यवेगं
जितेंद्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शरणं प्रपद्ये ॥
राम कथा

मारुतिस्तोत्राणि ।

११५. मारुतिस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ॐनमो भगवते विचित्रवीरहनुमते प्रलयकालानलप्रभाप्रज्वलनाय । प्रतापवज्रदेहाय । अंजनीगर्भसंभूताय । प्रकटविक्रमवीरदैत्यदानवयक्षरक्षोगणग्रहबंधनाय । भूतग्रहबंधनाय । प्रेतग्रहबंधनाय । पिशाचग्रहबंधनाय । शाकिनीडाकिनीग्रहबंधनाय । काकिनीकामिनीग्रहबंधनाय । ब्रह्मग्रहबंधनाय । ब्रह्मराक्षसग्रहबंधनाय । चोरग्रहबंधनाय । मारीग्रहबंधनाय । एहि एहि । आगच्छ आगच्छ । आवेशय आवेशय । मम हृदये प्रवेशय प्रवेशय । स्फुर स्फुर । प्रस्फुर प्रस्फुर । सत्यं कथय । व्याघ्रमुखबंधन सर्पमुखबं० राजमु० नारीमु० सभामु० शत्रुमु० सर्वमु० लंकाप्रासादभंजन । अमुकं मे वशमानय । क्रीं क्रीं क्रीं ह्रीं श्रीं श्रीं राजानं वशमानय । श्रीं ह्रीं क्लीं स्त्रिय आकर्षय आकर्षय शत्रून्मर्दय मर्दय मारय मारय चूर्णय चूर्णय खे खे श्रीरामचंद्राज्ञया मम कार्यसिद्धिं कुरु कुरु ॐह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः फट् स्वाहा विचित्रवीर हनूमन् मम सर्वशत्रून् भस्म कुरु कुरु । हन् हन् हुं फट् स्वाहा ॥ एकादशशतवारं जपित्वा सर्वशत्रून् वशमानयति नान्यथा इति ॥ इति श्रीमारुतिस्तोत्रं समाप्तम् ॥

११६. हनुमत्स्तोत्रम् ।

श्रीगणेशाय नमः ॥ ॐअस्य श्रीहनुमान्वडवानलस्तोत्रमंत्रस्य । श्रीरामचंद्र ऋषिः । श्रीवडवानलहनुमान् देवता। मम समस्तरोगप्रशमनार्थं आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं समस्तपापक्षयार्थं सीतारामचंद्रप्रीत्यर्थं हनुमान्वडवानलस्तोत्रजपमहं करिष्ये । ॐह्रां ह्रीं ॐनमो भगवते श्रीमहाहनुमते प्रकटपराक्रम सकलदिङ्मंडलयशोवितानधवलीकृतजगत्त्रितय वज्रदेह रुद्रावतार लंकापुरीदहन उमाअमलमंत्र उदधिबंधन दशशिरःकृतांतक सीताश्वसन वायुपुत्र अंजनीगर्भसंभूत श्रीरामलक्ष्मणानंदकर कपिसैन्यप्राकार सुग्रीवसाह्य रणपर्वतोत्पाटन कुमारब्रह्मचारिन् गभीरनाद सर्वपापग्रहवारण सर्वज्वरोच्चाटन डाकिनीविध्वंसन ॐह्रां ह्रीं ॐनमो भगवते महावीरवीराय सर्वदुःखनिवारणाय ग्रहमंडलसर्वभूतमंडलसर्वपिशाचमंडलोच्चाटन भूतज्वरएकाहिकज्वरद्व्याहिकज्वरत्र्याहिकज्वरचातुर्थिकज्वरसंतापज्वरविषमज्वरतापज्वरमाहेश्वरवैष्णवज्वरान् छिंधि छिंधि यक्षब्रह्मराक्षसभूतप्रेतपिशाचान् उच्चाटय उच्चाटय ॐह्रां श्रीं ॐनमो भगवते श्रीमहाहनुमते ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः आं हां हां हां हां औं सौं एहि एहि एहि ॐहं ॐहं ॐहं ॐहं ॐ नमो भगवते श्रीमहाहनुमते श्रवणचक्षुर्भूतानां शाकिनीडाकि-

नीनां विषमदुष्टानां सर्वविषं हर हर आकाशभुवनं भेदय भेदय छेदय छेदय मारय मारय शोषय शोषय मोहय मोहय ज्वालय ज्वालय प्रहारय प्रहारय सकलमायां भेदय भेदय ॐ ह्रां ह्रीं ॐ नमो भगवते महाहनुमते सर्वग्रहोच्चाटन परबलं क्षोभय क्षोभय सकलबंधनमोक्षणं कुरु कुरु शिरःशूलगुल्मशूलसर्वशूलान्निर्मूलय निर्मूलय नागपाशानंतवासुकितक्षककर्कोटककालियान् यक्षकुलजलगतबिलगतरात्रिंचरदिवाचरसर्वान्निर्विषं कुरु कुरु स्वाहा । राजभयचोरभयपरमंत्रपरयंत्रपरतंत्रपरविद्याश्छेदय छेदय स्वमंत्रस्वयंत्रस्वतंत्रस्वविद्याः प्रकटय प्रकटय सर्वारिष्टान्नाशय नाशय सर्वशत्रून्नाशय नाशय असाध्यं साधय साधय हुं फट् स्वाहा ॥ इति बिभीषणकृतं हनुमद्वडवानलस्तोत्रं संपूर्णम् ॥

श्रियाश्लिष्टो विष्णुः स्थिरचरगुरुर्वेदविषयो
धियां साक्षी शुद्धो हरिरसुरहंताब्जनयनः ।
गदी शंखी चक्री विमलवनमाली स्थिररुचिः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥

कृष्णस्तोत्राणि ।

११७. त्रैलोक्यमंगलकवचम् ।

श्रीगणेशाय नमः ॥ नारद उवाच । भगवन्सर्वधर्मज्ञ कवचं यत्प्रकाशितम् । त्रैलोक्यमंगलं नाम कृपया कथय प्रभो ॥ १ ॥ सनत्कुमार उवाच । शृणु वक्ष्यामि विप्रेंद्र कवचं परमाद्भुतम् । नारायणेन कथितं कृपया ब्रह्मणे पुरा ॥ २ ॥ ब्रह्मणा कथितं मह्यं परं स्नेहाद्वदामि ते । अतिगुह्यतरं तत्त्वं ब्रह्ममंत्रौघविग्रहम् ॥३॥ यद्धृत्वा पठना-द्ब्रह्मा सृष्टिं वितनुते ध्रुवम् । यद्धृत्वा पठनात्पाति महाल-क्ष्मीर्जगत्त्रयम् ॥ ४ ॥ पठनाद्धारणाच्छंभुः संहर्ता सर्वमं-त्रवित् । त्रैलोक्यजननी दुर्गा महिषादिमहासुरान् ॥ ५ ॥ वरदृप्तान् जघानैव पठनाद्धारणाद्यतः । एवमिंद्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः ॥ ६ ॥ इदं कवचमत्यंतगुप्तं कुत्रापि नो वदेत् । शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् ॥७॥ शठाय परशिष्याय दत्त्वा मृत्युमवाप्नुयात् । त्रैलोक्यमंग-लस्यास्य कवचस्य प्रजापतिः ॥ ८ ॥ ऋषिश्छंदश्च गायत्री देवो नारायणः स्वयम् । धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥९॥ प्रणवो मे शिरः पातु नमो नारायणाय च । भालं मे नेत्रयुगलमष्टार्णो भुक्तिमुक्तिदः ॥ १० ॥ क्लीं पायाच्छ्रोत्रयुग्मं चैकाक्षरः सर्वमोहनः । क्लीं कृष्णाय सदा घ्राणं गोविंदायेति जिह्विकाम् ॥ ११ ॥ गोपीजनप-

श्रियाश्लिष्टो विष्णुः स्थिरचरगुरुर्वेदविषयो
धियां साक्षी शुद्धो हरिरसुरहंताब्जनयनः ।
गदी शंखी चक्री विमलवनमाली स्थिररुचिः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥

कृष्णस्तोत्राणि ।

११७. त्रैलोक्यमंगलकवचम् ।

श्रीगणेशाय नमः ॥ नारद उवाच । भगवन्सर्वधर्मज्ञ कवचं यत्प्रकाशितम् । त्रैलोक्यमंगलं नाम कृपया कथय प्रभो ॥ १ ॥ सनत्कुमार उवाच । शृणु वक्ष्यामि विप्रेंद्र कवचं परमाद्भुतम् । नारायणेन कथितं कृपया ब्रह्मणे पुरा ॥ २ ॥ ब्रह्मणा कथितं मह्यं परं स्नेहाद्वदामि ते । अतिगुह्यतरं तत्त्वं ब्रह्ममंत्रौघविग्रहम् ॥३॥ यद्धृत्वा पठनाद्ब्रह्मा सृष्टिं वितनुते ध्रुवम् । यद्धृत्वा पठनात्पाति महालक्ष्मीर्जगत्त्रयम् ॥ ४ ॥ पठनाद्धारणाच्छंभुः संहर्ता सर्वमंत्रवित् । त्रैलोक्यजननी दुर्गा महिषादिमहासुरान् ॥ ५ ॥ वरदृप्तान् जघानैव पठनाद्धारणाद्यतः । एवमिंद्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः ॥ ६ ॥ इदं कवचमत्यंतगुप्तं कुत्रापि नो वदेत् । शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् ॥७॥ शठाय परशिष्याय दत्त्वा मृत्युमवाप्नुयात् । त्रैलोक्यमंगलस्यास्य कवचस्य प्रजापतिः ॥ ८ ॥ ऋषिश्छंदश्च गायत्री देवो नारायणः स्वयम् । धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥९॥ प्रणवो मे शिरः पातु नमो नारायणाय च । भालं मे नेत्रयुगलमष्टार्णो भुक्तिमुक्तिदः ॥ १० ॥ क्लीं पायाच्छ्रोत्रयुग्मं चैकाक्षरः सर्वमोहनः । क्लीं कृष्णाय सदा घ्राणं गोविंदायेति जिह्विकाम् ॥ ११ ॥ गोपीजनप-

दवल्लभाय स्वाहाननं मम । अष्टादशाक्षरो मंत्रः कंठं पातु दशाक्षरः ॥१२॥ गोपीजनपदवल्लभाय स्वाहा भुजद्वयम् । क्लीं ग्लौं क्लीं श्यामलांगाय नमः स्कन्धौ दशाक्षरः ॥१३॥ क्लीं कृष्णः क्लीं करौ पायात् क्लीं कृष्णो मां गतोऽवतु । हृदयं भुवनेशानः क्लीं कृष्णः क्लीं स्तनौ मम ॥ १४ ॥ गोपालायाग्निजायांतं कुक्षियुग्मं सदाऽवतु । क्लीं कृष्णाय सदा पातु पार्श्वयुग्ममनुत्तमः ॥ १५ ॥ कृष्णगोविंदकौ पातां स्मराद्यौ ङेयुतौ मनुः । अष्टाक्षरः पातु नाभिं कृष्णेति द्व्यक्षरोऽवतु ॥ १६ ॥ पृष्ठं क्लीं कृष्णकं गल्लं क्लीं कृष्णाय द्विठान्तकः । सक्थिनी सततं पातु श्रीं ह्रीं क्लीं कृष्णठद्वयम् ॥१७॥ ऊरू सप्ताक्षरः पायात्त्रयोदशाक्षरोऽवतु । श्रीं ह्रीं क्लीं पदतो गोपीजनवल्लभदन्ततः ॥ १८ ॥ भाय स्वाहेति पायुं वै क्लीं ह्रीं श्रीं सदशार्णकः । जानुनी च सदा पातु ह्रीं श्रीं क्लीं च दशाक्षरः ॥ १९ ॥ त्रयोदशाक्षरः पातु जंघे चक्राद्युदायुधः । अष्टादशाक्षरो ह्रीं श्रीं पूर्वको विंशदर्णकः ॥ २० ॥ सर्वांगं मे सदा पातु द्वारकानायको बली । नमो भगवते पश्चाद्वासुदेवाय तत्परम् ॥ २१ ॥ ताराद्यो द्वादशार्णोऽयं प्राच्यां मां सर्वदाऽवतु । श्रीं ह्रीं क्लीं च दशार्णस्तु ह्रीं क्लीं श्रीं षोडशार्णकः ॥ २२ ॥ गदाद्युदायुधो विष्णुर्मामग्नेर्दिशि रक्षतु । ह्रीं श्रीं दशारो मंत्रो दक्षिणे मां सदाऽवतु ॥ २३ ॥ तारो नमो

भगवते रुक्मिणीवल्लभाय च । स्वाहेति षोडशार्णोऽयं नैर्ऋत्यां दिशि रक्षतु ॥२४॥ क्लीं हृषीके पदं शाय नमो मां वारुणोऽवतु । अष्टादशार्णः कामान्तो वायव्ये मां सदावतु ॥ २५ ॥ श्रीं मायाकामकृष्णाय गोविंदाय द्विठो मनुः । द्वादशार्णात्मको विष्णुरुत्तरे मां सदाऽवतु ॥२६॥ वाग्भयं कामकृष्णाय ह्रीं गोविंदाय तत्परम् । श्रीं गोपीजनवल्लभांताय स्वाहा हस्तौ ततः ॥ २७ ॥ द्वाविंशत्यक्षरो मंत्रो मामैशान्ये सदावतु । कालियस्य फणामध्ये दिव्यं नृत्यं करोति तम् ॥ २८ ॥ नमामि देवकीपुत्रं नृत्यराजानमच्युतम् । द्वात्रिंशदक्षरो मंत्रोऽप्यधो मां सर्वदावतु ॥२९॥ कामदेवाय विद्महे पुष्पबाणाय धीमहि । तन्नोऽनंगः प्रचोदयादेषा मां पातु चोर्ध्वतः ॥ ३० ॥ इति ते कथितं विप्र ब्रह्ममंत्रौघविग्रहम् । त्रैलोक्यमंगलं नाम कवचं ब्रह्मरूपकम् ॥ ३१ ॥ ब्रह्मणा कथितं पूर्वं नारायणमुखाच्छ्रुतम् । तव स्नेहान्मयाख्यातं प्रवक्तव्यं न कस्यचित् ॥ ३२ ॥ गुरुं प्रणम्य विधिवत्कवचं प्रपठेत्ततः । सकृद्द्विस्त्रिर्यथाज्ञानं स हि सर्वतपोमयः ॥ ३३ ॥ मंत्रेषु सकलेष्वेव देशिको नात्र संशयः । शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः ॥ ३४ ॥ हवनादीन्दशांशेन कृत्वा तत्साधयेद्ध्रुवम् । यदि स्यात्सिद्धकवचो विष्णुरेव भवेत्स्वयम् ॥ ३५ ॥ मंत्रसिद्धिर्भवेत्तस्य पुरश्चर्याविधानतः ।

स्पर्धामुत्सृज्य सततं लक्ष्मीर्वाणी वसेत्ततः ॥३६॥ पुष्पांजल्यष्टकं दत्वा मूलेनैव पठेत्सकृत् । दशवर्षसहस्राणि पूजायाः फलमाप्नुयात् ॥ ३७ ॥ भूर्जे विलिख्यांगुलिकां स्वर्णस्थां धारयेद्यदि । कंठे वा दक्षिणे बाहौ सोऽपि विष्णुर्न संशयः ॥ ३८ ॥ अश्वमेधसहस्राणि वाजपेयशतानि च । महादानानि यान्येव प्रादक्षिण्यं भुवस्तथा ॥ ३९ ॥ कलां नार्हंति तान्येव सकृदुच्चारणात्ततः । कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः ॥ ४० ॥ त्रैलोक्यं क्षोभयत्येव त्रैलोक्यविजयी भवेत् । इदं कवचमज्ञात्वा यजेद्यः पुरुषोत्तमम् । शतलक्षं प्रजप्तोऽपि न मंत्रस्तस्य सिध्यति ॥ ४१ ॥ इति श्रीनारदपंचरात्रे ज्ञानामृतसारे त्रैलोक्यमंगलं नाम कवचं संपूर्णम् ॥

११८. श्रीबालरक्षा ।

श्रीगणेशाय नमः ॥ श्रीकृष्णाय नमः ॥ अव्यादजोंऽघ्रिर्मणिमांस्तव जान्वथोरू यज्ञोऽच्युतः कटितटं जठरं हयास्यः । हृत्केशवस्त्वदुर ईश इनस्तु कंठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कम् ॥१॥ चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्त्वत्पार्श्वयोर्धनुरसी मधुहाऽजनश्च । कोणेषु शंख उरुगाय उपर्युपेंद्रस्तार्क्ष्यः क्षितौ हलधरः पुरुषः समंतात् ॥ २ ॥ इंद्रियाणि हृषीकेशः प्राणान्नारायणोऽवतु । श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु ॥ ३ ॥ पृश्निगर्भश्च ते बुद्धिमात्मानं

भगवान्परः । क्रीडंतं पातु गोविंदः शयानं पातु माधवः ॥ ४ ॥ व्रजंतमव्याद्वैकुंठ आसीनं त्वां श्रियः पतिः । भुंजानं यज्ञभुक्पातु सर्वग्रहभयंकरः ॥ ५ ॥ डाकिन्यो यातुधान्यश्च कूष्मांडा येऽर्भकग्रहाः । भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः ॥ ६ ॥ कोटरारेवतीज्येष्ठापूतनामातृकादयः । उन्मादा ये ह्यपस्मारा देहप्राणेंद्रियद्रुहः ॥७॥ स्वप्नदृष्टा महोत्पाता वृद्धबालग्रहाश्च ये । सर्वे नश्यंतु ते विष्णोर्नामग्रहणभीरवः ॥ ८ ॥ इति श्रीमद्भागवते दशमस्कंधे गोपीकृतबालरक्षा समाप्ता ॥

११९. श्रीकृष्णस्तवराजः ।

श्रीगणेशाय नमः ॥ श्रीमहादेव उवाच । शृणु देवि प्रवक्ष्यामि स्तोत्रं परमदुर्लभम् । यज्ज्ञात्वा न पुनर्गच्छेन्नरो निरययातनाम् ॥ १ ॥ नारदाय च यत्प्रोक्तं ब्रह्मपुत्रेण धीमता । सनत्कुमारेण पुरा योगींद्रगुरुवर्त्मना ॥२॥ श्रीनारद उवाच । प्रसीद भगवन्मह्यमज्ञानात्कुंठितात्मने । तवांघ्रिपंकजरजोरागिणीं भक्तिमुत्तमाम् ॥ ३ ॥ अज प्रसीद भगवन्नमितद्युतिपंजर । अप्रमेय प्रसीदास्मद्दुःखहन्पुरुषोत्तम ॥ ४ ॥ स्वसंवेद्य प्रसीदास्मदानंदात्मन्ननामय । अचिन्त्यसार विश्वात्मन्प्रसीद परमेश्वर ॥ ५ ॥ प्रसीद तुंगतुंगानां प्रसीद शिव शोभन । प्रसीद गुणगंभीर गंभीराणां महाद्युते ॥ ६ ॥ प्रसीद व्यक्त विस्तीर्ण

विस्तीर्णानामगोचर । प्रसीदार्द्रार्द्रजातीनां प्रसीदांतांतदायिनाम् ॥ ७ ॥ गुरोर्गरीयः सर्वेश प्रसीदानंत देहिनाम् । जय माधव मायात्मन् जय शाश्वत शंखभृत् ॥८॥ जय शंखधर श्रीमन् जय नंदकनंदन । जय चक्रगदापाणे जय देव जनार्दन ॥ ९ ॥ जय रत्नवराबद्धकिरीटाक्रांतमस्तक । जय पक्षिपतिच्छायानिरुद्धार्ककरारुण ॥१०॥ नमस्ते नरकाराते नमस्ते मधुसूदन । नमस्ते ललितापांग नमस्ते नरकांतक ॥११॥ नमः पापहरेशान नमः सर्वभयापह । नमः संभूतसर्वात्मन्नमः संभृतकौस्तुभ ॥ १२ ॥ नमस्ते नयनातीत नमस्ते भयहारक । नमो विभिन्नवेषाय नमः श्रुतिपथातिग ॥ १३ ॥ नमस्त्रिमूर्तिभेदेन सर्गस्थित्यंतहेतवे । विष्णवे त्रिदशारातिजिष्णवे परमात्मने ॥ १४ ॥ चक्रभिन्नारिचक्राय चक्रिणे चक्रवल्लभ । विश्वाय विश्ववंद्याय विश्वभूतानुवर्तिने ॥१५॥ नमोऽस्तु योगिध्येयात्मन्नमोऽस्त्वध्यात्मरूपिणे । भक्तिप्रदाय भक्तानां नमस्ते भक्तिदायिने ॥ १६ ॥ पूजनं हवनं चेज्या ध्यानं पश्चान्नमस्क्रिया । देवेश कर्म सर्वं मे भवेदाराधनं तव ॥१७॥ इति हवनजपार्चाभेदतो विष्णुपूजानियतहृदयकर्मा यस्तु मंत्री चिराय । स खलु सकलकामान् प्राप्य कृष्णांतरात्मा जननमृतिविमुक्तोऽत्युत्तमां भक्तिमेति ॥ १८ ॥ गोगोपगोपिकावीतं गोपालं गोषु गोप्रदम् । गोपैरीड्यं

गोसहस्रैर्नौमि गोकुलनायकम् ॥ १९ ॥ प्रीणयेदनया स्तुत्या जगन्नाथं जगन्मयम् । धर्मार्थकाममोक्षाणामाप्तये पुरुषोत्तमम् ॥ २० ॥ इति श्रीनारदपंचरात्रे ज्ञानामृतसारे श्रीकृष्णस्तवराजः संपूर्णः ॥

१२०. भगवन्मानसपूजा ।

श्रीगणेशाय नमः ॥ हृदंभोजे कृष्णः सजलजलदश्यामलतनुः सरोजाक्षः स्रग्वी मुकुटकटकाद्याभरणवान् । शरद्राकानाथप्रतिमवदनः श्रीमुरलिकां वहन्ध्येयो गोपीगणपरिवृतः कुंकुमचितः ॥ १ ॥ पयोंभोधेर्द्वीपान्मम हृदयमायाहि भगवन्मणिव्रातभ्राजत्कनकवरपीठं भज हरे । सुचिह्नौ ते पादौ यदुकुलज नेनेज्मि सुजलैर्गृहाणेदं दूर्वाफलजलवदर्घ्यं मुररिपो ॥ २ ॥ त्वमाचामोपेंद्र त्रिदशसरिदंभोऽतिशिशिरं भजस्वेमं पंचामृतरचितमाप्लावमघहम् । द्युनद्याः कालिंद्या अपि कनककुंभस्थितमिदं जलं तेन स्नानं कुरु कुरु कुरुष्वाचमनकम् ॥ ३ ॥ तडिद्वर्णे वस्त्रे भयविजयकांताधिहरणं प्रलंबारिभ्रातर्मृदुलमुपवीतं कुरु गले । ललाटे पाटीरं मृगमदयुतं धारय हरे गृहाणेदं माल्यं शतदलतुलस्यादिरचितम् ॥ ४ ॥ दशांगं धूपं सद्वरदचरणाग्रेऽर्पितमये मुखं दीपेनेंदुप्रभवरजसा देव कलये । इमौ पाणी वाणीपतिनुत सकर्पूररजसा विशोध्याग्रे दत्तं सलिलमिदमाचाम नृहरे ॥ ५ ॥ सदा तृप्तान्नं षड्सवद-

खिलऽव्यंजनयुतं सुवर्णामत्रे गोघृतचषकयुक्ते स्थितमिदम्। यशोदासूनो तत्परमदययाऽश्नान सखिभिः प्रसादं वांच्छद्भिः सह तदनु नीरं पिब विभो ॥ ६ ॥ सचंद्रं तांबूलं मुखरुचिकरं भक्षय हरे फलं स्वादु प्रीत्या परिमलवदास्वादय चिरम्। सपर्यापर्याप्त्यै कनकमणिजातं स्थितमिदं प्रदीपैरारार्तिं जलधितनयाश्लिष्ट रचये ॥ ७ ॥ विजातीयैः पुष्पैरभिसुरभिभिर्बिल्वतुलसीयुतैश्चेमं पुष्पांजलिमजित ते मूर्ध्नि निदधे। तव प्रादक्षिण्यक्रमणमघविध्वंसितचितं चतुर्वारं विष्णो जनिपथगतिश्रांतविदुषा ॥ ८ ॥ नमस्कारोऽष्टांगः सकलदुरितध्वंसनपटुः कृतं नृत्यं गीतं स्तुतिरपि रमाकांत न इमम्। तव प्रीत्यै भूयादहमपि च दासस्तव विभो कृतं छिद्रं पूर्णं कुरु कुरु नमस्तेऽस्तु भगवन् ॥ ९ ॥ सदा सेव्यः कृष्णः सजलघननीलः करतले दधानो दध्यन्नं तदनु नवनीतं मुरलिकाम्। कदाचित्कांतानां कुचकलशपत्रालिरचनासमासक्तः स्निग्धैः सह शिशुविहारं विरचयन् ॥ १० ॥ मणिकर्णीच्छया जातमिदं मानसपूजनम्। यः कुर्वीतोषसि प्राज्ञस्तस्य कृष्णः प्रसीदति ॥ ११ ॥ इति श्रीशंकराचार्यविरचितं भगवन्मानसपूजनम् ॥

१२१. देवकृतगर्भस्तुतिः।

श्रीगणेशाय नमः ॥ देवा ऊचुः। जगद्योनिरयोनिस्त्वमनंतोऽव्यय एवच। ज्योतिःस्वरूपो ह्यनिशः सगुणो निर्गुणो

महान् ॥१॥ भक्तानुरोधात्साकारो निराकारो निरंकुशः । निर्व्यूहो निखिलाधारो निःशंको निरुपद्रवः ॥ २ ॥ निरुपाधिश्च निर्लिप्तो निरीहो निधनांतकः । स्वात्मारामः पूर्णकामोऽनिमिषो नित्य एव च ॥ ३ ॥ स्वेच्छामयः सर्वहेतुः सर्वः सर्वगुणाश्रयः । सर्वदो दुःखदो दुर्गो दुर्जनांतक एव च ॥४॥ सुभगो दुर्भगो वाग्मी दुराराध्यो दुरत्ययः । वेदहेतुश्च वेदश्च वेदांगो वेदविद्विभुः ॥ ५ ॥ इत्येवमुक्त्वा देवाश्च प्रणेमुश्च मुहुर्मुहुः । हर्षाश्रुलोचनाः सर्वे ववृषुः कुसुमानि च ॥ ६ ॥ द्विचत्वारिंशन्नामानि प्रातरुत्थाय यः पठेत् । दृढां भक्तिं हरेर्दास्यं लभते वांछितं फलम् ॥७॥ इत्येवं स्तवनं कृत्वा देवास्ते स्वालयं ययुः । बभूव जलवृष्टिश्च निश्चेष्टा मथुरा पुरी ॥ ८ ॥ इति देवकृतगर्भस्तुतिः संपूर्णा ॥

१२२. वसुदेवकृतश्रीकृष्णस्तोत्रम् ।

श्रीगणेशाय नमः॥ वसुदेव उवाच । त्वामतींद्रियमव्यक्तमक्षरं निर्गुणं विभुम् । ध्यानासाध्यं च सर्वेषां परमात्मानमीश्वरम् ॥ १ ॥ स्वेच्छामयं सर्वरूपं स्वेच्छारूपधरं परम् । निर्लिप्तं परमं ब्रह्म बीजरूपं सनातनम् ॥ २ ॥ स्थूलात्स्थूलतरं प्राप्तमतिसूक्ष्ममदर्शनम् । स्थितं सर्वशरीरेषु साक्षिरूपमदृश्यकम् ॥३॥ शरीरवंतं सगुणमशरीरं गुणोत्करम् । प्रकृतिं प्रकृतीशं च प्राकृतं प्रकृतेः परम् ॥४॥

सर्वेशं सर्वरूपं च सर्वांतकरमव्ययम् । सर्वाधारं निराधारं निर्व्यूहं स्तौमि किं विभुम् ॥ ५ ॥ अनंतः स्तवनेऽशक्तोऽशक्ता देवी सरस्वती । यं वा स्तोतुमशक्तश्च पंचवक्त्रः षडाननः ॥६॥ चतुर्मुखो वेदकर्ता यं स्तोतुमक्षमः सदा । गणेशो न समर्थश्च योगींद्राणां गुरोर्गुरुः ॥ ७ ॥ ऋषयो देवताश्चैव मुनींद्रमनुमानवाः । स्वप्ने तेषामदृश्यं च त्वामेवं किं स्तुवंति ते ॥ ८ ॥ श्रुतयः स्तवनेऽशक्ताः किं स्तुवंति विपश्चितः । विहायैवं शरीरं च बालो भवितुमर्हसि ॥ ९ ॥ वसुदेवकृतं स्तोत्रं त्रिसंध्यं यः पठेन्नरः । भक्तिदास्यमवाप्नोति श्रीकृष्णचरणांबुजे ॥ १० ॥ विशिष्टं पुत्रं लभते हरिदासं गुणान्वितम् । संकटं निस्तरेत्तूर्णं शत्रुभीतेः प्रमुच्यते ॥ ११ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे वसुदेवकृतं कृष्णस्तोत्रं संपूर्णम् ॥

१२३. श्रीवेंकटेश्वरमंगलस्तोत्रम् ।

श्रीवेंकटेश्वराय नमः ॥ श्रियः कांताय देवाय कल्याणनिधयेऽर्थिनाम् । श्रीवेंकटनिवासाय श्रीनिवासाय मंगलम् ॥ १ ॥ लक्ष्मीसविभ्रमालोकसभ्रूविभ्रमचक्षुषे । चक्षुषे सर्वलोकानां वेंकटेशाय मंगलम् ॥२॥ श्रीवेंकटाद्रिशृंगाय मंगलाभरणांघ्रये । मंगलानां निवासाय श्रीनिवासाय मंगलम् ॥ ३ ॥ सर्वावयवसौंदर्यसंपदा सर्वचेतसाम् । सदा संमोहनायास्तु वेंकटेशाय मंगलम् ॥ ४ ॥

नित्याय निरवद्याय सत्यानंतचिदात्मने । सर्वांतरात्मने श्रीमद्वेंकटेशाय मंगलम् ॥ ५ ॥ स्वतःसर्वविदे सर्वशक्तये सर्वशेषिणे । सुलभाय सुशीलाय वेंकटेशाय मंगलम् ॥ ६ ॥ परस्मै ब्रह्मणे पूर्णकामाय परमात्मने । प्रपद्यपरतत्त्वाय वेंकटेशाय मंगलम् ॥ ७ ॥ अकालतत्त्वविश्रांतावात्मानमनुपश्यताम् । अतृप्तामृतरूपाय वेंकटेशाय मंगलम् ॥ ८ ॥ प्रायः स्वचरणौ पुंसां शरणत्वेन पाणिना । कृपया दिशते श्रीमद्वेंकटेशाय मंगलम् ॥ ९ ॥ दयामृततरंगिण्यस्तरंगैरपि शीतलैः । अपांगैः सिंचते विश्वं वेंकटेशाय मंगलम् ॥ १० ॥ स्रग्भूषांबरहेतीनां सुषमावहमूर्तये । सर्वार्तिशमनायास्तु वेंकटेशाय मंगलम् ॥ ११ ॥ श्रीवैकुंठविरक्ताय स्वामिपुष्करिणीतटे । रमया रममाणाय वेंकटेशाय मंगलम् ॥ १२ ॥ श्रीमत्सुंदरजामातृमुनिमानसवासिने । सर्वलोकनिवासाय श्रीनिवासाय मंगलम् ॥ १३ ॥ नमः श्रीवेंकटेशाय शुद्धज्ञानस्वरूपिणे । वासुदेवाय शांताय श्रीनिवासाय मंगलम् ॥ १४ ॥ मंगलाशासनपरैर्मदाचार्यपुरोगमैः । सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मंगलम् ॥ १५ ॥ इति श्रीवेंकटेशमंगलस्तोत्रं संपूर्णम् ॥

१२४. बालकृतकृष्णस्तोत्रम् ।

श्रीगणेशाय नमः ॥ बाला ऊचुः । यथा संरक्षितं ब्रह्मन्सर्वापत्स्वेव नः कुलम् । तथा रक्षां कुरु पुनर्दावाग्नेर्मु-

सूदन ॥ १ ॥ त्वमिष्टदेवताऽस्माकं त्वमेव कुलदेवता । स्रष्टा दाता च संहर्ता जगतां च जगत्पते ॥ २ ॥ वह्निर्वा वरुणो वापि चंद्रो वा सूर्य एव च । यमः कुबेरः पवन ईशानाद्याश्च देवताः ॥ ३ ॥ ब्रह्मेशशेषधर्मेन्द्रा मुनींद्रा मनवः स्मृताः । मानवाश्च तथा दैत्या यक्षराक्षसकिंनराः ॥ ४ ॥ ये ये चराचराश्चैव सर्वे तव विभूतयः । आविर्भावस्तिरोभावः सर्वेषां च तवेच्छया ॥ ५ ॥ अभयं देहि गोविंद वह्निसंहरणं कुरु । वयं त्वां शरणं यामो रक्ष नः शरणागतान् ॥ ६ ॥ इत्येवमुक्त्वा ते सर्वे तस्थुर्ध्यात्वा पदांबुजम् । दूरीभूतस्तु दावाग्निः श्रीकृष्णामृतदृष्टितः ॥ ७ ॥ दूरीभूते च दावाग्नौ ननृतुस्ते मुदान्विताः । सर्वापदः प्रणश्यंति हरिस्मरणमात्रतः ॥ ८ ॥ इदं स्तोत्रं महापुण्यं प्रातरुत्थाय यः पठेत् । वह्नितो न भवेत्तस्य भयं जन्मनि जन्मनि ॥ ९ ॥ शत्रुग्रस्ते च दावाग्नौ विपत्तौ प्राणसंकटे । स्तोत्रमेतत्पठित्वा तु मुच्यते नात्र संशयः ॥ १० ॥ शत्रुसैन्यं क्षयं याति सर्वत्र विजयी भवेत् । इह लोके हरेर्भक्तिमंते दास्यं लभेद्ध्रुवम् ॥ ११ ॥ इति बालकृतं श्रीकृष्णस्तोत्रं समाप्तम् ॥

१२५. गोपालस्तोत्रम् ।

श्रीगणेशाय नमः ॥ श्रीनारद उवाच । नवीननीरदश्यामं नीलेंदीवरलोचनम् । बल्लवीनंदनं वंदे कृष्णं गोपालरू-

पिणम् ॥ १ ॥ स्फुरद्बर्हिदलोद्बद्धनीलकुंचितमूर्धजम् । कदंबकुसुमोद्बद्धवनमालाविभूषितम् ॥ २ ॥ गंडमंडलसंसर्गिचलत्कांचनकुंडलम् । स्थूलमुक्ताफलोदारहारद्योतितवक्षसम् ॥ ३ ॥ हेमांगदतुलाकोटिकिरीटोज्वलविग्रहम् । मंदमारुतसंक्षोभवलितांबरसंचयम् ॥४॥ रुचिरौष्ठपुटन्यस्तवंशीमधुरनिःस्वनैः । लसद्गोपालिकाचेतो मोहयंतं मुहुर्मुहुः ॥ ५ ॥ बल्लवीवदनांभोजमधुपानमधुव्रतम् । क्षोभयंतं मनस्तासां सस्मेरापांगवीक्षणैः ॥६॥ यौवनोद्भिन्नदेहाभिः संसक्ताभिः परस्परम् । विचित्रांबरभूषाभिर्गोपनारीभिरावृतम् ॥ ७ ॥ प्रभिन्नांजनकालिंदीजलकेलिकलोत्सुकम् । योधयंतं क्वचिद्गोपान् व्याहरंतं गवां गणम् ॥८॥ कालिंदीजलसंसर्गिशीतलानिलसेविते । कदंबपादपच्छाये स्थितं वृंदावने क्वचित् ॥९॥ रत्नभूधरसंलग्नरत्नासनपरिग्रहम् । कल्पपादपमध्यस्थहेममंडपिकागतम् ॥१०॥ वसंतकुसुमामोदसुरभीकृतदिङ्मुखे । गोवर्धनगिरौ रम्ये स्थितं रासरसोत्सुकम् ॥११॥ सव्यहस्ततलन्यस्तगिरिवर्यातपत्रकम् । खंडिताखंडलोन्मुक्तासुक्तासारघनावनम् ॥१२॥ वेणुवाद्यमहोल्लासकृतहुंकारनिःस्वनैः । सवत्सैरुन्मुखैः शश्वद्गोकुलैरभिवीक्षितम् ॥१३॥ कृष्णमेवानुगायद्भिस्तच्चेष्टावशवर्तिभिः । दंडपाशोद्यतकरैर्गोपालैरुपशोभितम् ॥ १४ ॥ नारदाद्यैर्मुनिश्रेष्ठैर्वेदवेदांगपारगैः ।

प्रीतिसुस्निग्धया वाचा स्तूयमानं परात्परम् ॥ १५ ॥ य एनं चिंतयेदेवं भक्त्या संस्तौति मानवः । त्रिसंध्यं तस्य तुष्टोऽसौ ददाति वरमीप्सितम् ॥१६॥ राजवल्लभतामेति भवेत्सर्वजनप्रियः । अचलां श्रियमाप्नोति स वाग्मी जायते ध्रुवम् ॥१७॥ इति श्रीनारदपंचरात्रे ज्ञानामृतसारे गोपालस्तोत्रं समाप्तम् ॥

१२६. कृष्णाष्टकम् ।

श्रीगणेशाय नमः ॥ श्रियाश्लिष्टो विष्णुः स्थिरचरगुरुर्वेदविषयो धियां साक्षी शुद्धो हरिरसुरहंताब्जनयनः । गदी शंखी चक्री विमलवनमाली स्थिररुचिः शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥१॥ यतः सर्वं जातं वियदनिलमुख्यं जगदिदं स्थितौ निःशेषं योऽवति निजसुखांशेन मधुहा । लये सर्वं स्वस्मिन् हरति कलया यस्तु स विभुः शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ २ ॥ असूनायम्यादौ यमनियममुख्यैः सुकरणैर्निरुध्येदं चित्तं हृदि विलयमानीय सकलम् । यमीड्यं पश्यंति प्रवरमतयो मायिनमसौ शरण्यो लोकेशो मम० ॥ ३ ॥ पृथिव्यां तिष्ठन्यो यमयति महीं वेद न धरा यमित्यादौ वेदो वदति जगतामीशममलम् । नियंतारं ध्येयं मुनिसुरनृणां मोक्षदमसौ शरण्यो लोकेशो मम० ॥ ४ ॥ महेंद्रादिर्देवो जयति दितिजान्यस्य बलतो न कस्य स्वा-

तंग्यं क्वचिदपि कृतौ यत्कृतिमृते । कवित्वादेर्गर्वं परिहरति योऽसौ विजयिनः शरण्यो लोकेशो मम० ॥५॥ विना यस्य ध्यानं व्रजति पशुतां सूकरमुखां विना यस्य ज्ञानं जनमृतिभयं याति जनता । विना यस्य स्मृत्या कृमिशतजनिं याति स विभुः शरण्यो लोकेशो मम० ॥ ६ ॥ नरातंकोत्तंकः शरणशरणो भ्रांतिहरणो घनश्यामो वामो व्रजशिशुवयस्योऽर्जुनसखः । स्वयंभूर्भूतानां जनक उचिताचारसुखदः शरण्यो लोकेशो मम० ॥ ७ ॥ यदा धर्मग्लानिर्भवति जगतां क्षोभकरणी तदा लोकस्वामी प्रकटितवपुः सेतुधृगजः । सतां धाता स्वच्छो निगमगुणगीतो व्रजपतिः शरण्यो लोकेशो मम० ॥ ८ ॥ इति हरिरखिलात्माराधितः शंकरेण श्रुतिविशदगुणोऽसौ मातृमोक्षार्थमाद्यः । यतिवरनिकटे श्रीयुक्त आविर्बभूव स्वगुणवृत उदारः शंखचक्राब्जहस्तः ॥ ९ ॥ इति श्रीमच्छंकराचार्यविरचितं कृष्णाष्टकं संपूर्णम् ॥

१२७. जगन्नाथाष्टकम् ।

श्रीगणेशाय नमः ॥ कदाचित्कालिंदीतटविपिनसंगीतकरवो मुदाभीरीनारीवदनकमलास्वादमधुपः । रमाशंभुब्रह्मामरपतिगणेशार्चितपदो जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ १ ॥ भुजे सव्ये वेणुं शिरसि शिखिपिच्छं कटितटे दुकूलं नेत्रांते सहचरकटाक्षं विदधते । सदा

श्रीमद्वृन्दावनवसतिलीलापरिचयो जगन्नाथः स्वामी० ॥ २ ॥ महांभोधेस्तीरे कनकरुचिरे नीलशिखरे वसन्प्रासादांतः सहजबलभद्रेण बलिना । सुभद्रामध्यस्थः सकलसुरसेवावसरदो जगन्नाथः स्वामी० ॥ ३ ॥ कथापारावारः सजलजलदश्रेणिरुचिरो रमावाणीरामस्फुरदमलपद्मेक्षणमुखैः । सुरेंद्रैराराध्यः श्रुतिगणशिखागीतचरितो जगन्नाथः स्वामी० ॥४॥ रथारूढो गच्छन्पथि मिलितभूदेवपटलैः स्तुतिप्रादुर्भावं प्रतिपदमुपाकर्ण्य सदयः । दयासिंधुर्बंधुः सकलजगतां सिंधुसुतया जगन्नाथः स्वामी० ॥ ५ ॥ परब्रह्मापीडः कुवलयदलोत्फुल्लनयनो निवासी नीलाद्रौ निहितचरणोऽनंतशिरसि । रसानंदो राधासरसवपुरालिंगनसुखो जगन्नाथः स्वामी० ॥ ६ ॥ न वै प्रार्थ्यं राज्यं न च कनकतां भोगविभवं न याचेऽहं रम्यां निखिलजनकाम्यां वरवधूम् । सदा काले काले प्रमथपतिना गीतचरितो जगन्नाथः स्वामी० ॥ ७ ॥ हर त्वं संसारं द्रुततरमसारं सुरपते हर त्वं पापानां विततिमपरां यादवपते । अहो दीनानाथं निहितमचलं निश्चितपदं जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ ८ ॥ इति श्रीजगन्नाथाष्टकं संपूर्णम् ॥

१२८. मोहिनीकृतश्रीकृष्णस्तोत्रम् ।

श्रीगणेशाय नमः ॥ मोहिन्युवाच । सर्वेंद्रियाणां प्रवरं

विष्णोरंशं च मानसम् । तदेव कर्मणां बीजं तदुद्भव नमोऽस्तु ते ॥१॥ स्वयमात्मा हि भगवान् ज्ञानरूपो महेश्वरः । नमो ब्रह्मन् जगत्स्रष्टस्तदुद्भव नमोऽस्तु ते ॥ २ ॥ सर्वाजित जगज्जेतर्जीवजीव मनोहर । रतिबीज रतिस्वामिन् रतिप्रिय नमोऽस्तु ते ॥ ३ ॥ शश्वद्योषिदधिष्ठान योषित्प्राणाधिकप्रिय । योषिद्वाहन योषास्त्र योषिद्बंधो नमोऽस्तु ते ॥४॥ पतिसाध्यकराशेषरूपाधार गुणाश्रय । सुगंधिवातसचिव मधुमित्र नमोऽस्तु ते ॥ ५ ॥ शश्वद्योनिकृताधार स्त्रीसंदर्शनवर्धन । विदग्धानां विरहिणां प्राणांतक नमोऽस्तु ते ॥ ६ ॥ अकृपा येषु तेऽनर्थं तेषां ज्ञानं विनाशनम् । अनूहरूपभक्तेषु कृपासिंधो नमोऽस्तु ते ॥७॥ तपस्विनां च तपसां विघ्नबीजाय लीलया । मनः सकामं मुक्तानां कर्तुं शक्त नमोऽस्तु ते ॥ ८ ॥ तपःसाध्यस्तथाराध्यः सदैवं पांचभौतिकः । पंचेंद्रियकृताधार पंचबाण नमोऽस्तु ते ॥९॥ मोहिनीत्येवमुक्त्वा तु मनसा सा विधेः पुरः । विरराम नम्रवक्त्रा बभूव ध्यानतत्परा ॥ १० ॥ उक्तं माध्यंदिने कांते स्तोत्रमेतन्मनोहरम् । पुरा दुर्वाससा दत्तं मोहिन्यै गंधमादने ॥११॥ स्तोत्रमेतन्महापुण्यं कामी भक्त्या यदा पठेत् । अभीष्टं लभते नूनं निष्कलंको भवेद्ध्रुवम् ॥१२॥ चेष्टां न कुरुते कामः कदाचिदपि तं प्रियम् । भवेदरोगी श्रीयुक्तः कामदेवसम-

प्रभः । वनितां लभते साध्वीं पत्नीं त्रैलोक्यमोहिनीम् ॥ १३ ॥ इति श्रीमोहिनीकृतकृष्णस्तोत्रं समाप्तम् ॥

१२९. ब्रह्मदेवकृतकृष्णस्तोत्रम् ।

श्रीगणेशाय नमः ॥ ब्रह्मोवाच । रक्ष रक्ष हरे मां च निमग्नं कामसागरे । दुष्कीर्तिजलपूर्णे च दुष्पारे बहुसंकटे ॥ १ ॥ भक्तिविस्मृतिबीजे च विपत्सोपानदुस्तरे । अतीव निर्मलज्ञानचक्षुःप्रच्छन्नकारणे ॥ २ ॥ जन्मोर्मिसंगसहिते योषिन्नक्रौघसंकुले । रतिस्रोतसमायुक्ते गंभीरे घोर एव च ॥ ३ ॥ प्रथमामृतरूपे च परिणामिविषालये । यमालयप्रवेशाय मुक्तिद्वारातिविस्मृतौ ॥४॥ बुद्ध्या तरण्या विज्ञानैरुद्धरास्मानतः स्वयम् । स्वयं च त्वं कर्णधार प्रसीद मधुसूदन ॥ ५ ॥ मद्विधा कतिचिन्नाथ नियोज्या भवकर्मणि । संति विश्वेश विधयो हे विश्वेश्वर माधव ॥ ६ ॥ न कर्मक्षेत्रमेवेदं ब्रह्मलोकोऽयमीप्सितः । तथापि न स्पृहा कामे त्वद्भक्तिव्यवधायके ॥ ७ ॥ हे नाथ करुणासिंधो दीनबंधो कृपां कुरु । त्वं महेश महाज्ञाता दुःस्वप्नं मां न दर्शय ॥ ८ ॥ इत्युक्त्वा जगतां धाता विरराम सनातनः । ध्यायं ध्यायं मत्पदाब्जं शश्वत्सस्मार मामिति ॥९॥ ब्रह्मणा च कृतं स्तोत्रं भक्तियुक्तश्च यः पठेत् । स चैवाकर्मविषये न निमग्नो भवेद्ध्रुवम् ॥ १० ॥ मम मायां विनिर्जित्य स ज्ञानं लभते ध्रुवम् । इह लोके भक्तियुक्तो

मद्भक्तप्रवरो भवेत् ॥ ११ ॥ इति श्रीब्रह्मदेवकृतं कृष्णस्तोत्रं संपूर्णम् ॥

१३०. श्रीकृष्णस्तोत्रम् ।

श्रीगणेशाय नमः ॥ वंदे नवघनश्यामं पीतकौशेयवाससम् । सानंदं सुंदरं शुद्धं श्रीकृष्णं प्रकृतेः परम् ॥१॥ राधेशं राधिकाप्राणवल्लभं बल्लवीसुतम् । राधासेवितपादाब्जं राधावक्षःस्थलस्थितम् ॥ २ ॥ राधानुगं राधिकेष्टं राधापहृतमानसम् । राधाधारं भवाधारं सर्वाधारं नमामि तम् ॥ ३ ॥ राधाहृत्पद्ममध्ये च वसंतं संततं शुभम् । राधासहचरं शश्वद्राधाज्ञापरिपालकम् ॥ ४ ॥ ध्यायंते योगिनो योगान् सिद्धाः सिद्धेश्वराश्च यम् । तं ध्यायेत्संततं शुद्धं भगवंतं सनातनम् ॥ ५ ॥ सेवंते सततं संतो ब्रह्मेशशेषसंज्ञकाः । सेवंते निर्गुणं ब्रह्म भगवंतं सनातनम् ॥ ६ ॥ निर्लिप्तं च निरीहं च परमात्मानमीश्वरम् । नित्यं सत्यं च परमं भगवंतं सनातनम् ॥ ७ ॥ यं सृष्टेरादिभूतं च सर्वबीजं परात्परम् । योगिनस्तं प्रपद्यंते भगवंतं सनातनम् ॥ ८ ॥ बीजं नानावताराणां सर्वकारणकारणम् । वेदावेद्यं वेदबीजं वेदकारणकारणम् । योगिनस्तं प्रपद्यंते भगवंतं सनातनम् ॥ ९ ॥ इत्येवमुक्त्वा गंधर्वः पपात धरणीतले । ननाम दंडवद्भूमौ देवदेवं परात्परम् ॥ १० ॥ इति तेन कृतं स्तोत्रं यः पठेत्प्रयतः

शुचिः । इहैव जीवन्मुक्तश्च परं याति परां गतिम् ॥११॥ हरिभक्तिं हरेर्दास्यं गोलोकश्च निरामयः । पार्षदप्रवरत्वं च लभते नात्र संशयः ॥ १२ ॥ इति श्रीनारदपंचरात्रे श्रीकृष्णस्तोत्रं संपूर्णम् ॥

१३१. श्रीकृष्णाष्टोत्तरशतनामस्तोत्रम् ।

श्रीगणेशाय नमः ॥ अस्य श्रीकृष्णाष्टोत्तरशतनामस्तोत्रस्य श्रीशेष ऋषिः । अनुष्टुप् छंदः । श्रीकृष्णो देवता । श्रीकृष्णप्रीत्यर्थे श्रीकृष्णाष्टोत्तरशतनामजपे विनियोगः । शेष उवाच । श्रीकृष्णः कमलानाथो वासुदेवः सनातनः । वसुदेवात्मजः पुण्यो लीलामानुषविग्रहः ॥ १ ॥ श्रीवत्सकौस्तुभधरो यशोदावत्सलो हरिः । चतुर्भुजात्तचक्रासिगदाशंखांबुजायुधः ॥ २ ॥ देवकीनंदनः श्रीशो नंदगोपप्रियात्मजः । यमुनावेगसंहारी बलभद्रप्रियानुजः ॥ ३ ॥ पूतनाजीवितहरः शकटासुरभंजनः । नंदव्रजजनानंदी सच्चिदानंदविग्रहः ॥ ४ ॥ नवनीतनवाहारो मुचुकुंदप्रसादकः । षोडशस्त्रीसहस्रेशस्त्रिभंगमधुराकृतिः ॥ ५ ॥ शुकवागमृताब्धींदुर्गोविंदो गोविदां पतिः । वत्सपालनसंचारी धेनुकासुरभंजनः ॥ ६ ॥ तृणीकृततृणावर्तो यमलार्जुनभंजनः । उत्तालतालभेत्ता च तमालश्यामलाकृतिः ॥ ७ ॥ गोपगोपीश्वरो योगी सूर्यकोटिसमप्रभः । इलापतिः परंज्योतिर्यादवेंद्रो यदूद्वहः

॥ ८ ॥ वनमाली पीतवासाः पारिजातापहारकः । गोवर्धनाचलोद्धर्ता गोपालः सर्वपालकः ॥ ९ ॥ अजो निरंजनः कामजनकः कंजलोचनः । मधुहा मथुरानाथो द्वारकानायको बली ॥ १० ॥ वृंदावनांतःसंचारी तुलसीदामभूषणः । स्यमंतकमणेर्हर्ता नरनारायणात्मकः ॥११॥ कुब्जाकृष्णांबरधरो मायी परमपूरुषः । मुष्टिकासुरचाणूरमहायुद्धविशारदः ॥ १२ ॥ संसारवैरी कंसारिर्मुरारिर्नरकांतकः । अनादिर्ब्रह्मचारी च कृष्णाव्यसनकर्षकः ॥१३॥ शिशुपालशिरश्छेत्ता दुर्योधनकुलांतकृत् । विदुराक्रूरवरदो विश्वरूपप्रदर्शकः ॥ १४ ॥ सत्यवाक् सत्यसंकल्पः सत्यभामारतो जयी । सुभद्रापूर्वजो विष्णुर्भीष्ममुक्तिप्रदायकः ॥ १५ ॥ जगद्गुरुर्जगन्नाथो वेणुवाद्यविशारदः । वृषभासुरविध्वंसी बाणासुरबलांतकृत् ॥ १६ ॥ युधिष्ठिरप्रतिष्ठाता बर्हिबर्हावतंसकः । पार्थसारथिरव्यक्तो गीतामृतमहोदधिः ॥१७॥ कालीयफणिमाणिक्यरंजितश्रीपदांबुजः । दामोदरो यज्ञभोक्ता दानवेन्द्रविनाशनः ॥१८॥ नारायणः परब्रह्म पन्नगाशनवाहनः । जलक्रीडासमासक्तगोपीवस्त्रापहारकः ॥ १९ ॥ पुण्यश्लोकस्तीर्थकरो वेदवेद्यो दयानिधिः । सर्वतीर्थात्मकः सर्वग्रहरूपी परात्परः ॥ २० ॥ इत्येवं कृष्णदेवस्य नाम्नामष्टोत्तरं शतम् । कृष्णेन कृष्णभक्तेन श्रुत्वा गीतामृतं पुरा ॥ २१ ॥ स्तोत्रं कृष्णप्रियकरं

कृतं तस्मान्मया पुरा । कृष्णनामामृतं नाम परमानंददायकम् ॥२२॥ अनुपद्रवदुःखघ्नं परमायुष्यवर्धनम् । दानं श्रुतं तपस्तीर्थं यत्कृतं त्विह जन्मनि ॥ २३ ॥ पठतां शृण्वतां चैव कोटिकोटिगुणं भवेत् । पुत्रप्रदमपुत्राणामगतीनां गतिप्रदम् ॥ २४ ॥ धनावहं दरिद्राणां जयेच्छूनां जयावहम् । शिशूनां गोकुलानां च पुष्टिदं पुष्टिवर्धनम् ॥ २५ ॥ वातग्रहज्वरादीनां शमनं शांतिमुक्तिदम् । समस्तकामदं सद्यः कोटिजन्माघनाशनम् ॥२६॥ अन्ते कृष्णस्मरणदं भवतापभयापहम् । कृष्णाय यादवेंद्राय ज्ञानमुद्राय योगिने । नाथाय रुक्मिणीशाय नमो वेदांतवेदिने ॥ २७ ॥ इमं मंत्रं महादेव जपन्नेव दिवानिशम् । सर्वग्रहानुग्रहभाक् सर्वप्रियतमो भवेत्॥२८॥ पुत्रपौत्रैः परिवृतः सर्वसिद्धिसमृद्धिमान् । निर्विश्य भोगानंतेऽपि कृष्णसायुज्यमाप्नुयात् ॥ २९ ॥ इति श्रीनारदपंचरात्रे ज्ञानामृतसारे उमामहेश्वरसंवादे धरणीशेषसंवादे श्रीकृष्णाष्टोत्तरशतनामस्तोत्रं संपूर्णम् ॥

१३२. इंद्रकृतकृष्णस्तोत्रम् ।

श्रीगणेशाय नमः ॥ इंद्र उवाच । अक्षरं परमं ब्रह्म ज्योतीरूपं सनातनम् । गुणातीतं निराकारं स्वेच्छामयमनंतकम् ॥ १ ॥ भक्तध्यानाय सेवायै नानारूपधरं वरम् । शुक्लरक्तपीतश्यामं युगानुक्रमणेन च ॥ २ ॥ शुक्लतेजःस्व-

रूपं च सत्ये सत्यस्वरूपिणम् । त्रेतायां कुंकुमाकारं ज्वलंतं ब्रह्मतेजसा ॥ ३ ॥ द्वापरे पीतवर्णं च शोभितं पीतवाससा । कृष्णवर्णं कलौ कृष्णं परिपूर्णतमं प्रभुम् ॥ ४ ॥ नवधाराधरोत्कृष्टश्यामसुंदरविग्रहम् । नंदैकनंदनं वंदे यशोदानंदनं प्रभुम् ॥ ५ ॥ गोपिकाचेतनहरं राधाप्राणाधिकं परम् । विनोदमुरलीशब्दं कुर्वंतं कौतुकेन च ॥६॥ रूपेणाप्रतिमेनैव रत्नभूषणभूषितम् । कंदर्पकोटिसौंदर्यं बिभ्रतं शांतमीश्वरम् ॥ ७ ॥ क्रीडंतं राधया सार्धं वृंदारण्ये च कुत्रचित् । कुत्रचिन्निर्जनेऽरण्ये राधावक्षःस्थलस्थितम् ॥८॥ जलक्रीडां प्रकुर्वंतं राधया सह कुत्रचित् । राधिकाकबरीभारं कुर्वंतं कुत्रचिद्वने ॥ ९ ॥ कुत्रचिद्राधिकापादे दत्तवंतमलक्तकम् । राधाचर्विततांबूलं गृह्णंतं कुत्रचिन्मुदा ॥ १० ॥ पश्यंतं कुत्रचिद्राधां पश्यंतीं वक्रचक्षुषा । दत्तवंतं च राधायै कृत्वा मालां च कुत्रचित् ॥ ११ ॥ कुत्रचिद्राधया सार्धं गच्छंतं रासमंडलम् । राधादत्तां गले मालां धृतवंतं च कुत्रचित् ॥ १२ ॥ सार्धं गोपालिकाभिश्च विहरंतं च कुत्रचित् । राधां गृहीत्वा गच्छंतं तां विहाय च कुत्रचित् ॥१३॥ विप्रपत्नीदत्तमन्नं भुक्तवंतं च कुत्रचित् । भुक्तवंतं तालफलं बालकैः सह कुत्रचित् ॥ १४ ॥ वस्त्रं गोपालिकानां च हरंतं कुत्रचिन्मुदा । गवां गणं व्याहरंतं कुत्रचिद्बालकैः सह ॥ १५ ॥

कालीयमूर्ध्नि पादाब्जं दत्तवंतं च कुत्रचित् । विनोदमुरलीशब्दं कुर्वंतं कुत्रचिन्मुदा ॥ १६ ॥ गायंतं रम्यसंगीतं कुत्रचिद्बालकैः सह । स्तुत्वा शक्रः स्तवेंद्रेण प्रणनाम हरिं भिया ॥१७॥ पुरा दत्तेन गुरुणा रणे वृत्रासुरेण च । कृष्णेन दत्तं कृपया ब्रह्मणे च तपस्वते ॥१८॥ एकादशाक्षरो मंत्रः कवचं सर्वलक्षणम् । दत्तमेतत्कुमाराय पुष्करे ब्रह्मणा पुरा ॥१९॥ तेन चांगिरसे दत्तं गुरवेंऽगिरसां मुने । इदमिंद्रकृतं स्तोत्रं नित्यं भक्त्या च यः पठेत् ॥ २० ॥ इह प्राप्य दृढां भक्तिमंते दास्यं लभेद्ध्रुवम् । जन्ममृत्युजराव्याधिशोकेभ्यो मुच्यते नरः ॥ २१ ॥ न हि पश्यति स्वप्नेऽपि यमदूतं यमालयम् ॥ २२ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे कृष्णजन्मखंडे इंद्रकृतं कृष्णस्तोत्रं समाप्तम् ॥

१३२. विप्रपत्नीकृतकृष्णस्तोत्रम् ।

श्रीगणेशाय नमः ॥ विप्रपत्न्य ऊचुः । त्वं ब्रह्म परमं धाम निरीहो निरहंकृतिः । निर्गुणश्च निराकारः साकारः सगुणः स्वयम् ॥ १ ॥ साक्षिरूपश्च निर्लिप्तः परमात्मा निराकृतिः । प्रकृतिः पुरुषस्त्वं च कारणं च तयोः परम् ॥ २ ॥ सृष्टिस्थित्यंतविषये ये च देवास्त्रयः स्मृताः । ते त्वदंशाः सर्वबीजा ब्रह्मविष्णुमहेश्वराः ॥ ३ ॥ यस्य लोम्नां च विवरे चाखिलं विश्वमीश्वर । महाविराण्महाविष्णुस्त्वं तस्य जनको विभो ॥ ४ ॥ तेजस्त्वं चापि तेजस्वी

ज्ञानं ज्ञानी च तत्परः । वेदेऽनिर्वचनीयस्त्वं कस्त्वां स्तोतुमिहेश्वरः ॥ ५ ॥ महदादिसृष्टिसूत्रं पंचतन्मात्रमेव च । बीजं त्वं सर्वशक्तीनां सर्वशक्तिस्वरूपकः ॥६॥ सर्वशक्तीश्वरः सर्वः सर्वशक्त्याश्रयः सदा । त्वमनीहः स्वयंज्योतिः सर्वानंदः सनातनः ॥ ७ ॥ अहो आकारहीनस्त्वं सर्वविग्रहवानपि । सर्वेंद्रियाणां विषयं जानासि नेंद्रियी भवान् ॥ ८ ॥ सरस्वती जडीभूता यत्स्तोत्रे यन्निरूपणे । जडीभूतो महेशश्च शेषो धर्मो विधिः स्वयम् ॥ ९ ॥ पार्वती कमला राधा सावित्री वेदसूरपि । वेदश्च जडतां याति के वा शक्ता विपश्चितः ॥ १० ॥ वयं किं स्तवनं कुर्मः स्त्रियः प्राणेश्वरेश्वर । प्रसन्नो भव नो देव दीनबंधो कृपां कुरु ॥११॥ इति पेतुश्च ता विप्रपत्न्यस्तच्चरणांबुजे । अभयं प्रददौ ताभ्यः प्रसन्नवदनेक्षणः ॥१२॥ विप्रपत्नीकृतं स्तोत्रं पूजाकाले च यः पठेत् । स गतिं विप्रपत्नीनां लभते नात्र संशयः ॥ १३ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे कृष्णजन्मखंडे विप्रपत्नीकृतकृष्णस्तोत्रं समाप्तम् ॥

१३४. गोपालविंशतिस्तोत्रम् ।

श्रीगणेशाय नमः ॥ श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी । वेदांताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥ १ ॥ वंदे वृंदावनचरं बल्लवीजनवल्लभम् । जयंतीसंभवं धाम

वैजयंतीविभूषणम् ॥ २ ॥ वाचं निजांकरसिकां प्रसमीक्षमाणो वक्त्रारविंदविनिवेशितपांचजन्यः । वर्णत्रिकोणरुचिरे वरपुंडरीके बद्धासनो जयति बल्लवचक्रवर्ती ॥ ३ ॥ आम्नायगंधरुचिरस्फुरिताधरोष्ठमस्राविलेक्षणमनुक्षणमंदहासम् । गोपालडिंभवपुषं कुहनाजनन्याः प्राणस्तनंधयमवैमि परं पुमांसम् ॥ ४ ॥ आविर्भवत्यनिभृताभरणं पुरस्तादाकुंचितैकचरणं निहितान्यपादम् । राधानिबद्धमुकुरेण निबद्धतालं नाथस्य नंदभवने नवनीतनाट्यम् ॥ ५ ॥ कुंदप्रसूनविशदैर्दशनैश्चतुर्भिः संदश्य मातुरनिशं कुचचूचुकाग्रम् । नंदस्य वक्त्रमवलोकयतो मुरारेर्मंदस्मितं मम मनीषितमातनोतु ॥ ६ ॥ हर्तुं कुंभे विनिहितकरः स्वादु हैयंगवीनं दृष्ट्वा दामग्रहणचटुलां मातरं जातरोषाम् । पायादीषत्प्रचलितपदो नापगच्छन्न तिष्ठन्मिथ्यागोपः सपदि नयने मीलयन् विश्वगोप्ता ॥ ७ ॥ व्रजयोषिदपांगवेदनीयं मथुराभाग्यमनन्यभोग्यमीडे । वसुदेववधूस्तनंधयं तत् किमपि ब्रह्म किशोरभावदृश्यम् ॥ ८ ॥ परिवर्तितकंधरं भयेन स्मितफुल्लाधरपल्लवं स्मरामि । विटपित्वनिरासकं कयोश्चिद्विपुलोलूखलकर्षकं कुमारम् ॥ ९ ॥ निकटेषु निशामयामि नित्यं निगमांतैरधुनापि मृग्यमाणम् । यमलार्जुनदृष्टबालकेलिं यमुनासाक्षिकयौवनं युवानम् ॥ १० ॥ पदवी

मदवीयसीं विमुक्तेरटवीसंपदमंबुवाहयंतीम् । अरुणाधरसाभिलाषवंशां करुणां कारणमानुषं भजामि ॥ ११ ॥ अनिमेषनिषेवणीयमक्ष्णोरजहद्यौवनमाविरस्तु चित्ते । कलहाहितकुंतलं कलापैः करुणोन्मादकविग्रहं मनो मे ॥ १२ ॥ अनुयायिमनोज्ञवंशनालैरवतु स्पर्शितवल्लवीविमोघैः । अनघस्मितशीतलैरसौ मामनुकंपासरिदंबुजेरपांगैः ॥ १३ ॥ अधराहितचारुवंशनाला मुकुटालंबिमयूरपिच्छमालाः । हरिनीलशिलाविहंगलीलाः प्रतिभास्वंतु समांतिमप्रयाणे ॥ १४ ॥ अखिलानवलोकयामि कालान्महिलादीनभुजांतरस्य यूनः । अभिलाषपदं व्रजांगनानामभिलापक्रमदूरमाभिरूप्यम् ॥ १५ ॥ महसे महिताय मौलिना विनतेनांजलिमंजनत्विषे । कलयामि विदग्धवल्लवीवलयाभाषितमंजुवेणवे ॥ १६ ॥ जयतु ललितकृत्यं शिक्षको बल्लवीनां शिथिलवलयासिंजाशीतलैर्हस्ततालैः । अखिलभुवनरक्षागोपवेषस्य विष्णोरधरमणिसुधाया वंशवान्वंशनालः ॥ १७ ॥ चित्राकल्पश्रवसि कलयंल्लांगलीकर्णपूरं बर्होत्तंसस्फुरितचिकुरो बंधुजीवं दधानः । गुंजाबद्धामुरसि ललितां धारयन् हारयष्टिं गोपस्त्रीणां जयति कितवः कोपि कौमारहारी ॥ १८ ॥ लीलायष्टिं करकिसलये दक्षिणे न्यस्य धन्यामंसे देव्याः पुलकनिबिडे सन्निविष्टान्यबाहुः । मेघश्यामो जयति

ललितं मेखलादत्तवेणुर्गुंजापीडस्फुरितचिकुरो गोपकन्याभुजंगः ॥ १९ ॥ प्रत्यालीढस्मृतिमधिगतां प्राप्तगाढांगपालीं पश्चादीषन्मिलितनयनां प्रेयसीं प्रेक्षमाणः । भस्त्रायंत्रप्रणिहितकरो भक्तजीवातुरव्याद्वारिक्रीडानिबिडवसनो बल्लवीवल्लभो नः ॥ २० ॥ वासो हृत्वा दिनकरसुतासंनिधौ बल्लवीनां लीलास्मेरो जयति ललितामास्थितः कुंदशाखाम् । सव्रीडाभिस्तदनु वसनं ताभिरभ्यर्थ्यमानः कामी कश्चित्करकमलयोरंजलिं याचमानः ॥२१॥ इत्यनन्यमनसा विनिर्मितां वेंकटेशकविना स्तुतिं पठन् । दिव्यवेणुरसिकैः समीक्षते दैवतं किमपि यौवतप्रियम् ॥ २२ ॥ इति गोपालविंशतिः संपूर्णा ॥

१३५. श्रीगोविंदाष्टकम् ।

श्रीगणेशाय नमः ॥ सत्यं ज्ञानमनन्तं नित्यमनाकाशं परमाकाशं गोष्ठप्राङ्गणरिङ्गणलोलमनायासं परमायासम् । मायाकल्पितनानाकारमनाकारं भुवनाकारं क्ष्मामानाथमनाथं प्रणमत गोविन्दं परमानन्दम् ॥ १ ॥ मृत्स्नामत्सीहेति[1] यशोदाताडनशैशवसंत्रासं व्यादितवक्त्रालोकितलोकालोकचतुर्दशलोकालम् । लोकत्रयपुरमूलस्तम्भं लोकालोकमनालोकं लोकेशं परमेशं प्रणमत गोविन्दं परमानन्दम् ॥ २ ॥ त्रैविष्टपरिपुवीरघ्नं क्षितिभारघ्नं भवरोगघ्नं

---

१ पाठान्तरं मृत्स्नामत्सि किमीह.

कैवल्यं नवनीताहारमनाहारं भुवनाहारम् । वैमल्यस्फुटचेतोवृत्तिविशेषाभासमनाभासं शैवं केवलशान्तं प्रणमत गोविन्दं परमानन्दम् ॥ ३ ॥ गोपालं भूलीलाविग्रहगोपालं कुलगोपालं गोपीखेलनगोवर्धनधृतिलीलालालितगोपालम् । गोभिर्निगदितगोविन्दस्फुटनामानं बहुनामानं गोपीगोचरदूरं प्रणमत गोविन्दं परमानन्दम् ॥ ४ ॥ गोपीमण्डलगोष्ठीभेदं भेदावस्थमभेदाभं शश्वद्गोखुरनि[1]र्धूतोत्कृतधूलीधूसरसौभाग्यम् । श्रद्धाभक्तिगृहीतानन्दमचिन्त्यं चिन्तितसद्भावं चिन्तामणिमहिमानं प्रणमत गोविन्दं परमानन्दम् ॥ ५ ॥ स्नानव्याकुलयोषिद्वस्त्रमुपादायागमुपारूढं व्यादित्सन्तीरथ दिग्वस्त्राह्युपदातुमुपाकर्षन्तम् । निर्धूतद्वयशोकविमोहं बुधबुद्धेरप्यन्तस्थं सत्तामात्रशरीरं प्रणमत गोविन्दं परमानन्दम् ॥ ६ ॥ कान्तं कारणकारणमादिमनादिं कालमनाभासं [2]कालिन्दीगतकालियशिरसि मुहुर्नृत्यन्तं च सुनृत्यन्तम् । कालं कालकलातीतं कलिताशेषं कलिदोषघ्नं कालत्रयगतिहेतुं प्रणमत गोविन्दं परमानन्दम् ॥ ७ ॥ वृन्दावनभुवि वृन्दारकगणवृन्दाराधित वंदेऽहं कुन्दाभामलमन्दस्मेरसुधानन्दं सुहृदानन्दम् । वन्द्या-

१ पाठान्तरं निर्धूतोद्धृत. २ पाठान्तरं कालिन्दीगतकालियशिरसि नृत्यन्तं मुहुर्नृत्यन्तम्.

शेषमहामुनिमानसवन्द्यानन्दपदद्वन्द्वं वन्द्याशेषगुणाब्धिं प्रणमत गोविन्दं परमानन्दम् ॥ ८ ॥ गोविन्दाष्टकमेतदधीते गोविन्दार्पितचेता यो गोविन्दाच्युत माधव विष्णो गोकुलनायक कृष्णेति । गोविन्दांघ्रिसरोजध्यानसुधाजलधौतसमस्ताघो गोविन्दं परमानन्दामृतमन्तस्थं स समभ्येति ॥ ९ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं गोविन्दाष्टकस्तोत्रं संपूर्णम् ॥

१३६. श्रीगोपालाष्टकम् ।

श्रीगणेशाय नमः ॥ यस्माद्विश्वं जातमिदं चित्रमतर्क्यं यस्मिन्नानंदात्मनि नित्यं रमते वै । यत्रांते संयाति लयं चैतदशेषं तं गोपालं संततकालं प्रति वंदे ॥ १ ॥ यस्याज्ञानाज्जन्मजरारोगकदंबं ज्ञाते यस्मिन्नश्यति तत्सर्वमिहाशु । गत्वा यत्रायाति पुनर्नो भवभूमिं तं गोपालं संततकालं प्रति वंदे ॥ २ ॥ तिष्ठन्नंतर्यो यमयत्येतदजस्रं यं कश्चिन्नो वेद जनोऽप्यात्मनि संतम् । सर्वं यस्येदं च वशे तिष्ठति विश्वं तं गोपालं संततकालं प्रति वंदे ॥ ३ ॥ धर्मोऽधर्मेणेह तिरस्कारमुपैति काले यस्मिन्मत्स्यमुखैश्चारुचरित्रैः । नानारूपैः पाति तदा योऽवनिबिंबं तं गोपालं संततकालं प्रति वंदे ॥ ४ ॥ प्राणायामैर्ध्वस्तसमस्तेंद्रियदोषा रुध्वा चित्तं यं हृदि पश्यंति समाधौ । ज्योतीरूपं योगिजना मोदनिमग्नास्तं गोपालं संततकालं

प्रति वंदे ॥ ५ ॥ भानुश्चंद्रश्चोडुगणश्चैव हुताशो यस्मिन्नै-वाभाति तडिच्चापि कदापि । यद्भासा चाभाति समस्तं जगदेतत् तं गोपालं संततकालं प्रति वंदे ॥ ६ ॥ सत्य-ज्ञानं मोदमवोचुर्निगमा यं यो ब्रह्मेंद्राद्यादित्यगिरीशार्चि-तपादः । शेतेऽनंतोऽनंततनावंबुनिधौ यस्तं गोपालं संत-तकालं प्रति वंदे ॥ ७ ॥ शैवाः प्राहुर्यं शिवमन्ये गण-नाथं शक्तिं चैकेऽर्कं च तथान्ये मतिभेदात् । नानाकारै-र्भाति य एकोऽखिलशक्तिस्तं गोपालं संततकालं प्रति वंदे ॥८॥ श्रीमद्गोपालाष्टकमेतत् समधीते भक्त्या नित्यं यो मनुजो वै स्थिरचेताः । हित्वा तूर्णं पापकलापं स समेति पुण्यं विष्णोर्धाम यतो नैव निपातः ॥९॥ इति श्रीपरम-हंसस्वामिब्रह्मानंदविरचितं श्रीगोपालाष्टकं संपूर्णम् ॥

१२७. श्रीकृष्णाष्टकम् ।

श्रीगणेशाय नमः ॥ चतुर्मुखादिसंस्तुतं समस्तसात्वतानु-तम् । हलायुधादिसंयुतं नमामि राधिकाधिपम् ॥ १ ॥ बकादिदैत्यकालकं सगोपगोपिपालकम् । मनोहरासि-तालकं नमामि राधिकाधिपम् ॥ २ ॥ सुरेंद्रगर्वगंजनं विरिंचिमोहभंजनम् । व्रजांगनानुरंजनं नमामि राधिका-धिपम् ॥ ३ ॥ मयूरपिच्छमंडनं गजेन्द्रदंतखंडनम् । नृशंसकंसदंडनं नमामि राधिकाधिपम् ॥ ४ ॥ प्रदत्तवि-प्रदारकं सुदामधामकारकम् । सुरद्रुमापहारकं नमामि

राधिकाधिपम् ॥ ५ ॥ धनंजयाजयावहं महाचमूक्षयावहम् । पितामहव्यथापहं नमामि राधिकाधिपम् ॥ ६ ॥ मुनींद्रशापकारणं यदुप्रजापहारिणम् । धराभरावतारणं नमामि राधिकाधिपम् ॥ ७ ॥ सुवृक्षमूलशायिनं मृगारिमोक्षदायिनम् । स्वकीयधाममायिनं नमामि राधिकाधिपम् ॥ ८ ॥ इदं समाहितो हितं वराष्टकं सदा मुदा । जपञ्जनो जनुर्जरादितो द्रुतं प्रमुच्यते ॥ ९ ॥ इति श्रीपरमहंसस्वामिब्रह्मानंदविरचितं श्रीकृष्णाष्टकं संपूर्णम् ॥

१३८. सत्यव्रतोक्तदामोदरस्तोत्रम् ।

श्रीगणेशाय नमः ॥ सिंधुदेशोद्भवो विप्रो नाम्ना सत्यव्रतः सुधीः । विरक्त इंद्रियार्थेभ्यस्त्यक्त्वा पुत्रगृहादिकम् ॥१॥ वृंदावने स्थितः कृष्णमाराराध दिवानिशम् । निःस्वः सत्यव्रतो विप्रो निर्जनेऽव्यग्रमानसः ॥ २ ॥ कार्तिके पूजयामास प्रीत्या दामोदरं नृप । तृतीयेऽह्नि सकृद्भुंक्ते पत्रं मूलं फलं तथा ॥ ३ ॥ पूजयित्वा हरिं स्तौति प्रीत्या दामोदराभिधम् ॥ ४ ॥ सत्यव्रत उवाच । नमामीश्वरं सच्चिदानंदरूपं लसत्कुंडलं गोकुले भ्राजमानम् । यशोदाभियोलूखले धावमानं परामृष्टमत्यंततोदूनगोप्या ॥ ५ ॥ रुदंतं मुहुर्नेत्रयुग्मं मृजंतं कराम्भोजयुग्मेन सातंकनेत्रम् । मुहुः श्वासकं पत्रिरेखांककंठं स्थितं नौमि दामो-

दरं भक्तवंद्यम् ॥ ६ ॥ वरं देव देहीश मोक्षावधिं वा न चान्यं वृणेऽहं वरेशादपीह । इदं ते वपुर्नाथ गोपालबालं सदा मे मनस्याविरस्तां किमन्यैः ॥ ७ ॥ इदं ते मुखांभोजमत्यंतनीलैर्वृतं कुंतलैः स्निग्धवक्रैश्च गोप्या । मुहुश्चुंबितं बिंबरक्ताधरं मे मनस्याविरास्तामलं लक्षलाभैः ॥८॥ नमो देव दामोदरानंत विष्णो प्रसीदप्रभो दुःखजालाब्धिमग्नम् । कृपादृष्टिवृष्ट्याऽतिदीनं च रक्ष गृहाणेश मामज्ञमेवाक्षिदृश्यम् ॥ ९ ॥ कुबेरात्मजौ वृक्षमूर्ती च यद्वत्त्वया मोचितौ भक्तिभाजौ कृतौ च । तथा प्रेमभक्तिं स्विकां मे प्रयच्छ न मोक्षे ग्रहो मेऽस्ति दामोदरेह ॥ १० ॥ नमस्ते सुदाम्ने स्फुरद्दीप्तधाम्ने तथोरःस्थविश्वस्य धाम्ने नमस्ते । नमो राधिकायै त्वदीयप्रियायै नमोऽनंतलीलाय देवाय तुभ्यम् ॥ ११ ॥ नारद उवाच । सत्यव्रतद्विजस्तोत्रं श्रुत्वा दामोदरो हरिः । विद्युल्लीलाचमत्कारो हृदये शनकैरभूत् ॥ १२ ॥ इति श्रीसत्यव्रतकृतदामोदरस्तोत्रं संपूर्णम् ॥

समचरणसरोजं सांद्रनीलांबुदाभं
जवननिहितपाणिं मंडनं मंडनानाम् ।
तरुणतुलसिमालाकंधरं कंजनेत्रं
सदयधवलहासं विठ्ठलं चिंतयामि ॥
B.B.

पांडुरंगस्तोत्राणि ।

१३९. पांडुरंगाष्टकम् ।

श्रीगणेशाय नमः ॥ महायोगपीठे तटे भीमरथ्यां वरं पुंडरीकाय दातुं मुनींद्रैः । समागत्य तिष्ठंतमानंदकंदं परब्रह्मलिंगं भजे पांडुरंगम् ॥ १ ॥ तडिद्वाससं नीलमेघावभासं रमामंदिरं सुंदरं चित्प्रकाशम् । वरं त्विष्टिकायां समन्यस्तपादं परब्रह्मलिंगं भजे पांडुरंगम् ॥ २ ॥ प्रमाणं भवाब्धेरिदं मामकानां नितंबः कराभ्यां धृतो येन तस्मात् । विधातुर्वसत्यै धृतो नाभिकोशः परब्रह्मलिंगं भजे पांडुरंगम् ॥ ३ ॥ स्फुरत्कौस्तुभालंकृतं कंठदेशे श्रिया जुष्टकेयूरकं श्रीनिवासम् । शिवं शांतमीड्यं वरं लोकपालं परब्रह्मरूपं भजे पांडुरंगम् ॥ ४ ॥ शरच्चंद्रबिंबाननं चारुहासं लसत्कुंडलाक्रांतगंडस्थलांगम् । जपारागबिंबाधरं कंजनेत्रं परब्रह्मलिंगं भजे पांडुरंगम् ॥ ५ ॥ किरीटोज्ज्वलत्सर्वदिक्प्रांतभागं सुरैरर्चितं दिव्यरत्नैरनर्घ्यैः । त्रिभंगाकृतिं बर्हमाल्यावतंसं परब्रह्मलिंगं भजे पांडुरंगम् ॥ ६ ॥ विभुं वेणुनादं चरंतं दुरंतं स्वयं लीलया गोपवेषं दधानम् । गवां वृंदकानंदनं चारुहासं परब्रह्मलिंगं भजे पांडुरंगम् ॥ ७ ॥ अजं रुक्मिणीप्राणसंजीवनं तं परं धाम कैवल्यमेकं तुरीयम् । प्रसन्नं प्रसन्ना-

र्तिहं देवदेवं परब्रह्मलिंगं भजे पांडुरंगम् ॥ ८ ॥ स्तवं पांडुरंगस्य वै पुण्यदं ये पठंत्येकचित्तेन भक्त्या च नित्यम् । भवांभोनिधिं तेऽपि तीर्त्वाऽंतकाले हरेरालयं शाश्वतं प्राप्नुवंति ॥ ९ ॥ इति श्रीमच्छंकराचार्यविरचितं पांडुरंगाष्टकं संपूर्णम् ॥

१४०. कल्किस्तवः ।

श्रीगणेशाय नमः ॥ राजान ऊचुः ॥ गद्यानि ॥ जयजय निजमायया कल्पिताशेषविशेषकल्पनापरिणामजलाप्लुतलोकत्रयोपकारणमाकलय्य मनुमनिशम्य पूरितमाविजनाविजनाविर्भूतमहामीनशरीरं त्वं निजकृतधर्मसेतुसंरक्षणकृतावतारः ॥ १ ॥ पुनरिह जलधिमथनादृतदेवदानवगणानां मंदराचलानयनव्याकुलितानां साहाय्येनादृतचित्तः पर्वतोद्धरणामृतप्राशनरचनावतारः कूर्माकारः प्रसीद परेश त्वं दीननृपाणाम् ॥ २ ॥ पुनरिह दितिजबलपरिलंघितवासवसूदनादृत जितभुवनपराक्रमहिरण्याक्षनिधनपृथिव्युद्धरणसंकल्पाभिनिवेशेन धृतकोलावतार पाहि नः ॥ ३ ॥ पुनरिह त्रिभुवनजयिनो महाबलपराक्रमस्य हिरण्यकशिपोरर्दितानां देववराणां भयभीतानां कल्याणाय दितिसुतवधप्रेप्सुर्ब्रह्मणो वरदानादवध्यस्य न शस्त्रास्त्रात्रिदिवास्वर्गमर्त्यपातालतले देवगंधर्वकिन्नरनरनागैरिति विचिंत्य नरहरिरूपेण नखा-

प्रभिन्नोरुं दष्टदंतच्छदं त्यक्तासुं कृतवानसि ॥ ४ ॥ पुनरिह त्रिजगज्जयिनो बलेः सत्रे शक्रानुजो बटुवामनो दैत्यसंमोहनाय त्रिपदभूमियाञ्चाच्छलेन विश्वकायस्तदुत्सृष्टजलसंस्पर्शविवृद्धमनोभिलाषस्त्वं भूतले बलेर्दौवारिकत्वमंगीकृतमुचितं दानफलम् ॥ ५ ॥ पुनरिह हैहयादिनृपाणाममितबलपराक्रमाणां नानामदोल्लंघितमर्यादावर्त्मनां निधनाय भृगुवंशजो जामदग्न्यः पितृहोमधेनुहरणप्रवृद्धमन्युवशात् त्रिःसप्तकृत्वो निःक्षत्रियां पृथिवीं कृतवानसि परशुरामावतारः ॥ ६ ॥ पुनरिह पुलस्त्यवंशावतंसस्य विश्रवसः पुत्रस्य निशाचरस्य रावणस्य लोकत्रयतापनस्य निधनमुररीकृत्य रविकुलजातदशरथात्मजो विश्वामित्रादस्त्राण्युपलभ्य वने सीताहरणवशात्प्रवृद्धमन्युनाऽम्बुधिं वानरैर्निर्बध्य सगणं दशकंधरं हतवानसि रामावतारः ॥ ७ ॥ पुनरिह यदुकुलजलधिकलानिधिः सकलसुरगणसेवितपादारविंदद्वंद्वो विविधदानवदैत्यदलनलोकत्रयदुरिततापनो वसुदेवात्मजो रामावतारो बलभद्रस्त्वमसि ॥ ८ ॥ पुनरिह विधिकृतवेदधर्मानुष्ठानविहितनानादर्शनः सघृणः संसारकर्मत्यागविधिना ब्रह्माभासविलासचातुरीं प्रकृतिविमाननामसंपादयन् बुद्धावतारस्त्वमसि ॥ ९ ॥ अधुना कलिकुलनाशावतारो बौद्धपाषंडम्लेच्छादीनां च वेदधर्मसेतुपरिपालनाय कृता-

वतारः कल्किरूपेणास्मान् स्त्रीत्वनिरयादुद्धृतवानसि त-वानुकंपां किमिह कथयामः ॥ १० ॥ क्व ते ब्रह्मादीनामविजितविलासावतरणं क्व नः कामावामाकुलितमृगतृष्णार्तमनसाम् । सुदुष्प्राप्यं युष्मच्चरणजलजालोकनमिदं कृपापारावारः प्रमुदितदृशाश्वासय निजान् ॥ ११ ॥ इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे नृपकृतकल्किस्तवः संपूर्णः ॥

१४१. कल्किस्तोत्रम् ।

श्रीगणेशाय नमः ॥ सुशांतोवाच । जय हरेऽमराधीशसेवितं तव पदांबुजं भूरिभूषणम् । कुरु ममाग्रतः साधुसत्कृतं त्यज महामते मोहमात्मनः ॥ १ ॥ तव वपुर्जगद्रूपसंपदा विरचितं सतां मानसे स्थितम् । रतिपतेर्मनोमोहदायकं कुरु विचेष्टितं कामलंपटम् ॥ २ ॥ तव यशो जगच्छोकनाशनं मृदुकथामृतं प्रीतिदायकम् । स्मितसुधोक्षितं चंद्रवन्मुखं तव करोत्यलं लोकमंगलम् ॥ ३ ॥ मम पतिस्त्वयं सर्वदुर्जयो यदि तवाप्रियं कर्मणाचरेत् । जहि तदात्मनः शत्रुमुद्यतं कुरु कृपां न चेदीदृगीश्वरः ॥ ४ ॥ महदहंयुतं पंचमात्रया प्रकृतिजायया निर्मितं वपुः । तव निरीक्षणाल्लीलया जगत्स्थितिलयोदकं ब्रह्मकल्पितम् ॥ ५ ॥ भूवियन्मरुद्वारितेजसां राशिभिः शरीरेंद्रियाश्रितैः । त्रिगुणया स्वया मायया

विभो कुरु कृपां भवत्सेवनार्थिनाम् ॥ ६ ॥ तव गुणालयं नाम पावनं कलिमलापहं कीर्तयंति ये । भवभयक्षयं तापतापिता मुहुरहो जनाः संसरंति नो ॥ ७ ॥ तव जनुः सतां मानवर्धनं जिनकुलक्षयं देवपालकम् । कृतयुगार्पकं धर्मपूरकं कलिकुलांतकं शं तनोतु मे ॥ ८ ॥ मम गृहं पतिपुत्रनप्तृकं गजरथैर्ध्वजैश्चामरैर्धनैः । मणिवरासनं सत्कृतिं विना तव पदाब्जयोः शोभयंति किम् ॥ ९ ॥ तव जगद्वपुः सुंदरस्मितं मुखमनिंदितं सुंदरारवम् । यदि न मे प्रियं वल्गुचेष्टितं परिकरोत्यहो मृत्युरस्त्विह ॥ १० ॥ हयचर भयहरकरहरशरणखरतरवरशर दशबलदमन । जय हतपरभर भववरनाशन शशधरशतसमरसभरमदन ॥ ११ ॥ इति श्रीकल्किपुराणे सुशांताकृतं कल्किस्तोत्रं संपूर्णम् ॥

शैलेन्द्राद्वतारिणी निजजले मज्जज्जनोत्तारिणी

पारावारविहारिणी भवभयश्रेणीसमुत्तारणी।

शेषाहेरनुकारिणी हरशिरोवल्लीदलाकारिणी

काशीप्रान्तविहारिणी विजयते गङ्गा मनोहारिणी॥

गंगादिनदीस्तोत्राणि ।

१४२. दशहरागंगास्तुतिः ।

श्रीगणेशाय नमः ॥ ब्रह्मोवाच । नमः शिवायै गंगायै शिवदायै नमो नमः । नमस्ते रुद्ररूपिण्यै शांकर्यै ते नमो नमः ॥ १ ॥ नमस्ते विश्वरूपिण्यै ब्रह्ममूर्त्यै नमो नमः । सर्वदेवस्वरूपिण्यै नमो भेषजमूर्तये ॥ २ ॥ सर्वस्य सर्वव्याधीनां भिषक्श्रेष्ठ्यै नमोस्तु ते । स्थाणुजंगमसंभूतविषहंत्र्यै नमो नमः ॥३॥ भोगोपभोगदायिन्यै भोगवत्यै नमोनमः । मंदाकिन्यै नमस्तेस्तु स्वर्गदायै नमो नमः ॥ ४ ॥ नमस्त्रैलोक्यभूषायै जगद्धात्र्यै नमो नमः । नमस्त्रिशुक्लसंस्थायै तेजोवत्यै नमो नमः ॥ ५ ॥ नंदायै लिंगधारिण्यै नारायण्यै नमो नमः । नमस्ते विश्वमुख्यायै रेवत्यै ते नमो नमः ॥६॥ बृहत्यै ते नमस्तेऽस्तु लोकधात्र्यै नमो नमः । नमस्ते विश्वमित्रायै नंदिन्यै ते नमो नमः ॥ ७ ॥ पृथ्व्यै शिवामृतायै च सुवृषायै नमो नमः । शांतायै च वरिष्ठायै वरदायै नमो नमः ॥ ८ ॥ उस्रायै सुखदोग्ध्र्यै च संजीविन्यै नमो नमः । ब्रह्मिष्ठायै ब्रह्मदायै दुरितघ्न्यै नमो नमः । प्रणतार्तिप्रभंजिन्यै जगन्मात्रे नमोऽस्तु ते ॥ ९ ॥ सर्वापत्प्रतिपक्षायै मंगलायै नमो नमः ॥ १० ॥ शरणागतदीनार्तपरित्राणपरायणे । सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥११॥ निर्लेपायै दुर्गहंत्र्यै दक्षायै ते नमो नमः ।

शैलेन्द्रादवतारिणी निजजले मज्जनोत्तारिणी

पारावारविहारिणी भवभयश्रेणीसमुत्सारणी ।

शेषाहेरनुकारिणी हरशिरोवल्लीदलाकारिणी

काशीप्रान्तविहारिणी विजयते गंगा मनोहारिणी ॥

गंगादिनदीस्तोत्राणि ।

१४२. दशहरागंगास्तुतिः ।

श्रीगणेशाय नमः ॥ ब्रह्मोवाच । नमः शिवायै गंगायै शिवदायै नमो नमः । नमस्ते रुद्ररूपिण्यै शांकर्यै ते नमो नमः ॥ १ ॥ नमस्ते विश्वरूपिण्यै ब्रह्ममूर्त्यै नमो नमः । सर्वदेवस्वरूपिण्यै नमो भेषजमूर्तये ॥ २ ॥ सर्वस्य सर्वव्याधीनां भिषक्श्रेष्ठ्यै नमोस्तु ते । स्थाणुजंगमसंभूतविषहंत्र्यै नमो नमः ॥३॥ भोगोपभोगदायिन्यै भोगवत्यै नमोनमः । मंदाकिन्यै नमस्तेस्तु स्वर्गदायै नमो नमः ॥ ४ ॥ नमस्त्रैलोक्यभूषायै जगद्धात्र्यै नमो नमः । नमस्त्रिशुक्लसंस्थायै तेजोवत्यै नमो नमः ॥ ५ ॥ नंदायै लिंगधारिण्यै नारायण्यै नमो नमः । नमस्ते विश्वमुख्यायै रेवत्यै ते नमो नमः ॥६॥ बृहत्यै ते नमस्तेऽस्तु लोकधात्र्यै नमो नमः । नमस्ते विश्वमित्रायै नंदिन्यै ते नमो नमः ॥ ७ ॥ पृथ्व्यै शिवामृतायै च सुवृषायै नमो नमः । शांतायै च वरिष्ठायै वरदायै नमो नमः ॥ ८ ॥ उस्रायै सुखदोग्ध्र्यै च संजीविन्यै नमो नमः । ब्रह्मिष्ठायै ब्रह्मदायै दुरितघ्न्यै नमो नमः । प्रणतार्तिप्रभंजिन्यै जगन्मात्रे नमोऽस्तु ते ॥ ९ ॥ सर्वापत्प्रतिपक्षायै मंगलायै नमो नमः ॥ १० ॥ शरणागतदीनार्तपरित्राणपरायणे । सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥११॥ निर्लेपायै दुर्गहंत्र्यै दक्षायै ते नमो नमः ।

परात्परतरे तुभ्यं नमस्ते मोक्षदे सदा ॥१२॥ गंगे ममाग्रतो भूया गंगे मे देवि पृष्ठतः । गंगे मे पार्श्वयोरेहि त्वयि गंगेस्तु मे स्थितिः ॥ १३ ॥ आदौ त्वमंते मध्ये च सर्वं त्वं गां गते शिवे । त्वमेव मूलप्रकृतिस्त्वं हि नारायणः परः ॥ १४ ॥ गंगे त्वं परमात्मा च शिवस्तुभ्यं नमः शिवे ॥ १५ ॥ य इदं पठति स्तोत्रं भक्त्या नित्यं नरोपि यः । शृणुयाच्छ्रद्धया युक्तः कायवाक्चित्तसंभवैः ॥ १६ ॥ दशधा संस्थितैर्दोषैः सर्वैरेव प्रमुच्यते । सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते ॥१७॥ ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता । तस्यां दशम्यामेतच्च स्तोत्रं गंगाजले स्थितः ॥ १८ ॥ यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः । सोऽपि तत्फलमाप्नोति गंगां संपूज्य यत्नतः ॥ १९ ॥ अदत्तानामुपादानं हिंसा चैवाविधानतः । परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥२०॥ पारुष्यमनृतं चैवं पैशुन्यं चापि सर्वशः । असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥ २१ ॥ परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनम् । वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम् ॥ २२ ॥ एतानि दश पापानि हर त्वं मम जाह्नवि । दशपापहरा यस्मात्तस्माद्दशहरा स्मृता ॥ २३ ॥ त्रयस्त्रिंशच्छतं पूर्वान् पितॄनथ पितामहान् । उद्धरत्येव संसारान्मंत्रेणानेन पूजिता॥२४॥ नमो भगवत्यै

दशपापहरायै गंगायै नारायण्यै रेवत्यै शिवायै दक्षायै अमृतायै विश्वरूपिण्यै नंदिन्यै ते नमो नमः ॥२५॥सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां करधृतकलशोद्यत्सोत्पलामत्यभीष्टाम् । विधिहरिहररूपां सेंदुकोटीरजुष्टां कलितसितदुकूलां जाह्नवीं तां नमामि ॥ २६ ॥ आदावादिपितामहस्य निगमव्यापारपात्रे जलं पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् । भूयः शंभुजटाविभूषणमणिर्जह्नोर्महर्षेरियं कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते ॥ २७ ॥ गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि । मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ २८ ॥ इति धर्माब्धिस्था दशहरागंगास्तुतिः संपूर्णा ॥

१४३. शंकराचार्यकृतगंगाष्टकम् ।

श्रीगणेशाय नमः ॥ भगवति तव तीरे नीरमात्राशनोऽहं विगतविषयतृष्णः कृष्णमाराधयामि । सकलकलुषभंगे स्वर्गसोपानसंगे तरलतरतरंगे देवि गंगे प्रसीद ॥ १ ॥ भगवति भवलीलामौलिमाले तवांभः कणमणुपरिमाणं प्राणिनो ये स्पृशंति । अमरनगरनारीचामरग्राहिणीनां विगतकलिकलंकातंकमंके लुठंति ॥ २ ॥ ब्रह्मांडं खंडयंती हरशिरसि जटावल्लिमुल्लासयंती स्वर्लोकादापतंती कनकगिरिगुहागंडशैलात्स्खलंती । क्षोणीपृष्ठे लुठंती दुरितचयचमूर्निर्भरं भर्त्सयंती पाथोधिं

पूरयंती सुरनगरसरित्पावनी नः पुनातु ॥ ३ ॥ मज्जन्मातंगकुंभच्युतमदमदिरामोदमत्तालिजालं स्नानैः सिद्धांगनानां कुचयुगविगलत्कुंकुमासंगपिंगम् । सायंप्रातर्मुनीनां कुशकुसुमचयैश्छन्नतीरस्थनीरं पायान्नो गांगमंभः करिकलभकराक्रांतरंहस्तरंगम् ॥ ४ ॥ आदावादिपितामहस्य निगमव्यापारपात्रे जलं पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् । भूयः शंभुजटाविभूषणमणिर्जह्नोर्महर्षेरियं कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते ॥ ५ ॥ शैलेंद्रादवतारिणी निजजले मज्जज्जनोत्तारिणी पारावारविहारिणी भवभयश्रेणीसमुत्सारिणी । शेषाहेरनुकारिणी हरशिरोवल्लीदलाकारिणी काशीप्रांतविहारिणी विजयते गंगा मनोहारिणी ॥ ६ ॥ कुतोऽवीचिर्वीचिस्तव यदि गता लोचनपथं त्वमापीता पीतांबरपुरनिवासं वितरसि । त्वदुत्संगे गंगे पतति यदि कायस्तनुभृतां तदा मातः शातक्रतवपदलाभोऽप्यतिलघुः ॥ ७ ॥ गंगे त्रैलोक्यसारे सकलसुरवधूधौतविस्तीर्णतोये पूर्णब्रह्मस्वरूपे हरिचरणरजोहारिणि स्वर्गमार्गे । प्रायश्चित्तं यदि स्यात्तव जलकणिका ब्रह्महत्यादिपापे कस्त्वां स्तोतुं समर्थस्त्रिजगदघहरे देवि गङ्गे प्रसीद ॥ ८ ॥ मातर्जाह्नवि शंभुसंगवलिते मौलौ निधायांजलिं त्वत्तीरे वपुषोऽवसानसमये नारायणांघ्रिद्वयम् । सानंदं

स्मरतो भविष्यति मम प्राणप्रयाणोत्सवो भूयाद्भक्तिरविच्युता हरिहराद्वैतात्मिका शाश्वती ॥ ९ ॥ गंगाष्टकमिदं पुण्यं यः पठेत्प्रयतो नरः । सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ १० ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं गंगाष्टकस्तोत्रं संपूर्णम् ॥

१४४. वाल्मीकिकृतगंगाष्टकम् ।

श्रीगणेशाय नमः ॥ मातः शैलसुतासपत्नि वसुधाशृंगारहारावलि स्वर्गारोहणवैजयंति भवतीं भागीरथि प्रार्थये । त्वत्तीरे वसतस्त्वदंबु पिबतस्त्वद्वीचिषु प्रेंखतस्त्वन्नाम स्मरतस्त्वदर्पितदृशः स्यान्मे शरीरव्ययः ॥ १ ॥ त्वत्तीरे तरुकोटरांतरगतो गंगे विहंगो वरं त्वन्नीरे नरकांतकारिणि वरं मत्स्योऽथवा कच्छपः । नैवान्यत्र मदांधसिंधुरघटासंघट्टघंटारणत्कारत्रस्तसमस्तवैरिवनितालब्धस्तुतिर्भूपतिः ॥ २ ॥ उक्षा पक्षी तुरग उरगः कोऽपि वा वारणो वाऽवारीणः स्यां जननमरणक्लेशदुःखासहिष्णुः । न त्वन्यत्र प्रविरलरणत्कंकणक्काणमिश्रं वारस्त्रीभिश्चमरमरुता वीजितो भूमिपालः ॥ ३ ॥ काकैर्निष्कुषितं श्वभिः कवलितं गोमायुभिर्लुंठितं स्रोतोभिश्चलितं तटांबुलुलितं वीचीभिरांदोलितम् । दिव्यस्त्रीकरचारुचामरमरुत्संवीज्यमानः कदा द्रक्ष्येऽहं परमेश्वरि त्रिपथगे भागीरथि स्वं वपुः ॥ ४ ॥ अभिनवबिसवल्ली पादपद्मस्य विष्णोर्म-

दनमथनमौलेर्मालतीपुष्पमाला । जयति जयप ताका काप्यसौ मोक्षलक्ष्म्याः क्षपितकलिकलंका जाह्नवी नः पुनातु ॥ ५ ॥ एतत्तालतमालसालसरलव्यालोलवल्लीलताच्छन्नं सूर्यकरप्रतापरहितं शंखेंदुकुंदोज्वलम् । गंधर्वामरसिद्धकिन्नरवधूत्तुंगस्तनास्फालितं स्नानाय प्रतिवासरं भवतु मे गांगं जलं निर्मलम् ॥ ६ ॥ गांगं वारि मनोहारि मुरारिचरणच्युतम् । त्रिपुरारिशिरश्चारि पापहारि पुनातु माम् ॥ ७ ॥ पापापहारि दुरितारि तरंगधारि शैलप्रचारि गिरिराजगुहाविदारि । झंकारकारि हरिपादरजोपहारि गांगं पुनातु सततं शुभकारि वारि ॥ ८ ॥ गंगाष्टकं पठति यः प्रयतः प्रभाते वाल्मीकिना विरचितं शुभदं मनुष्यः । प्रक्षाल्य गात्रकलिकल्मषपंकमाशु मोक्षं लभेत्पतति नैव नरो भवाब्धौ ॥ ९ ॥ इति श्रीवाल्मीकिविरचितं गंगाष्टकं संपूर्णम् ॥

१४५. कालिदासकृतगंगाष्टकम् ।

श्रीगणेशाय नमः ॥ कत्यक्षीणि करोटयः कति कति द्वीपिद्विपानां त्वचः काकोलाः कति पन्नगाः कति सुधाधाम्नश्च खंडाः कति । किं च त्वं च कति त्रिलोकजननि त्वद्वारिपूरोदरे मज्जज्जंतुकदंबकं समुदयत्येकैकमादाय यत् ॥१॥ देवि त्वत्पुलिनांगणे स्थितिजुषां निर्मानिनां ज्ञानिनां स्वल्पाहारनिबद्धशुद्धवपुषां तार्णं गृहं श्रेयसे । नान्यत्र

क्षितिमंडलेश्वरशतैः संरक्षितो भूपतेः प्रासादो ललनागणैरधिगतो भोगींद्रभोगोन्नतः ॥२॥ तत्तत्तीर्थगतैः कदर्थनशतैः किं तैरनर्थाश्रितैर्ज्योतिष्टोममुखैः किमीशविमुखैर्यज्ञैरवज्ञाहतैः । सूते केशववासवादिविबुधागाराभिरामां श्रियं गंगे देवि भवत्तटे यदि कुटीवासः प्रयासं विना ॥ ३ ॥ गंगातीरमुपेत्य शीतलशिलामालंब्य हेमाचलीं यैराकर्णि कुतूहलाकुलतया कल्लोलकोलाहलः । ते शृण्वंति सुपर्वपर्वतशिलासिंहासनाध्यासनाः संगीतागमशुद्धसिद्धरमणीमंजीरधीरध्वनिम् ॥ ४ ॥ दूरं गच्छ सकच्छगं च भवतो नालोकयामो मुखं रे पाराक वराक साकमितरैर्नाकप्रदैर्गम्यताम् । सद्यः प्रोद्यतमंदमारुतरजःप्राप्ता कपोलस्थले गंगांभःकणिका विमुक्तगणिकासंगाय संभाव्यते ॥ ५ ॥ विष्णोः संगतिकारिणी हरजटाजूटाटवीचारिणी प्रायश्चित्तनिवारिणी जलकणैः पुण्यौघविस्तारिणी । भूभृत्कंदरदारिणी निजजले मज्जनोत्तारिणी श्रेयःस्वर्गविहारिणी विजयते गंगा मनोहारिणी ॥ ६ ॥ वाचालं विकलं खलं श्रितमलं कामाकुलं व्याकुलं चांडालं तरलं निपीतगरलं दोषाविलं चाखिलम् । कुंभीपाकगतं तमंतककरादाकृष्य कस्तारयेन्मातर्जह्नुनरेंद्रनंदिनि तव स्वल्पोदबिंदुं विना ॥ ७ ॥ श्लेष्मश्लेषणयानलेऽमृतबिले शोकाकुले व्याकुले कंठे घर्घरघोषनादम-

लिने काये च संमीलति । यां ध्यायन्नपि भारभंगुरतरां प्राप्नोति मुक्तिं नरः स्नातुश्चेतसि जाह्नवी निवसतां संसारसंतापहृत् ॥ ८ ॥ इति श्रीमत्कालिदासविरचितं गंगाष्टकस्तोत्रं संपूर्णम् ॥

१४६. गंगाष्टकम् ।

श्रीगणेशाय नमः ॥ नमस्तेऽस्तु गंगे त्वदंगप्रसंगाद्भुजंगास्तुरंगाः कुरंगाः प्लवंगाः । अनंगारिरंगाः ससंगाः शिवांगा भुजंगाधिपांगीकृतांगा भवंति ॥ १ ॥ नमो जह्नुकन्ये न मन्ये त्वदन्यैर्निसर्गेंदुचिह्नादिभिर्लोकभर्तुः । अतोऽहं नतोऽहं सतो गौरतोये वसिष्ठादिभिर्गीयमानाभिधेये ॥ २ ॥ त्वदामज्जनात्सज्जनो दुर्जनो वा विमानैः समानः समानैर्हि मानैः । समायाति तस्मिन्पुरारातिलोके पुरद्वारसंरुद्धदिक्पाललोके ॥ ३ ॥ स्वरावासदंभोलिदंभोऽपि रंभापरीरंभसंभावनाधीरचेताः । समाकांक्षते त्वत्तटे वृक्षवाटीकुटीरे वसन्नेतुमायुर्दिनानि ॥४॥ त्रिलोकस्य भर्तुर्जटाजूटबंधात्स्वसीमांतभागे मनाक्प्रस्खलंतः । भवान्या रुषा प्रौढसापत्नभावात्करेणाहतास्त्वत्तरंगा जयंति ॥ ५ ॥ जलोन्मज्जदैरावतोद्दानकुंभस्फुरत्प्रस्खलत्सांद्रसिंदूररागे । क्वचित्पद्मिनीरेणुभंगे प्रसंगे मनः खेलतां जह्नुकन्यातरंगे ॥ ६ ॥ भवत्तीरवानीरवातोत्थधूलीलवस्पर्शतस्तत्क्षणं क्षीणपापः । जनोऽयं जगत्पावने

त्वत्प्रसादात्पदे पौरुहूतेऽपि धत्तेऽवहेलाम् ॥ ७ ॥ त्रिसंध्यानमल्लेखकोटीरनानाविधानेकरत्नांशुबिंबप्रभाभिः । स्फुरत्पादपीठे हठेनाष्टमूर्तेर्जटाजूटवासे नताः स्मः पदं ते ॥ ८ ॥ इदं यः पठेदष्टकं जह्नुपुत्र्यास्त्रिकालं कृतं कालिदासेन रम्यम् । समायास्यतींद्रादिभिर्गीयमानं पदं कैशवं शैशवं नो लभेत्सः ॥ ९ ॥ इति श्रीकालिदासकृतं गंगाष्टकस्तोत्रं संपूर्णम् ॥

१४७. गंगास्तवः ।

श्रीगणेशाय नमः ॥ सूत उवाच ॥ शृणुध्वं मुनयः सर्वे गंगास्तवमनुत्तमम् । शोकमोहहरं पुंसामृषिभिः परिकीर्तितम् ॥१॥ ऋषय ऊचुः । इयं सुरतरंगिणी भवनवारिधेस्तारिणी स्तुता हरिपदांबुजादुपगता जगत्संसदः । सुमेरुशिखरामरप्रियजला मलक्षालिनी प्रसन्नवदना शुभा भवभयस्य विद्राविणी ॥ २ ॥ भगीरथरथानुगा सुरकरींद्रदर्पापहा महेशमुकुटप्रभा गिरिशिरःपताका सिता । सुरासुरनरोरगैरजभवाच्युतैः संस्तुता विमुक्तिफलशालिनी कलुषनाशिनी राजते ॥३॥ पितामहकमंडलुप्रभवमुक्तिबीजा लता श्रुतिस्मृतिगणस्तुतद्विजकुलालवालावृता । सुमेरुशिखराभिदा निपतिता त्रिलोकावृता सुधर्मफलशालिनी सुखपलाशिनी राजते ॥ ४ ॥ चरद्विहगमालिनी सगरवंशमुक्तिप्रदा मुनींद्रवरनंदिनी दिवि मता

च मंदाकिनी । सदा दुरितनाशिनी विमलवारिसंदर्शन-प्रणामगुणकीर्तनादिषु जगत्सु संराजते ॥ ५ ॥ महाभिषसुतांगना हिमगिरीशकूटस्तना सफेनजलहासिनी सितमरालसंचारिणी । चलल्लहरिसत्करा वरसरोजमालाधरा रसोल्लसितगामिनी जलधिकामिनी राजते ॥ ६ ॥ क्वचिन्मुनिगणैः स्तुता क्वचिदनंतसंपूजिता क्वचित्कलकलस्वना क्वचिदधीरयादोगणा । क्वचिद्रविकरोज्ज्वला क्वचिदुदग्रपाताकुला क्वचिज्जनविगाहिता जयति भीष्ममाता सती ॥ ७ ॥ स एव कुशली जनः प्रणमतीह भागीरथीं स एव तपसां निधिर्जपति जाह्नवीमादरात् । स एव पुरुषोत्तमः स्मरति साधु मंदाकिनीं स एव विजयी प्रभुः सुरतरंगिणीं सेवते ॥ ८ ॥ तवामलजलाचितं खगसृगालमीनक्षतं चलल्लहरिलोलितं रुचिरतीरजंबालितम् । कदा निजवपुर्मुदा सुरनरोरगैः संस्तुतोऽप्यहं त्रिपथगामिनि प्रियमतीव पश्याम्यहो ॥ ९ ॥ त्वत्तीरे वसतिं तवामलजलस्नानं तव प्रेक्षणं त्वन्नामस्मरणं तवोदयकथासंलापनं पावनम् । गंगे मे तव सेवनैकनिपुणोऽप्यानंदितश्चादृतः स्तुत्वा चोद्गतपातको भुवि कदा शांतश्चरिष्याम्यहम् ॥ १० ॥ इत्येतदृषिभिः प्रोक्तं गंगास्तवनमुत्तमम् । स्वर्ग्यं यशस्यमायुष्यं पठनाच्छ्रवणादपि ॥ ११ ॥ सर्वपापहरं पुंसां बलमायुर्विवर्धनम् ।

प्रातर्मध्याह्नसायाह्ने गंगासान्निध्यता भवेत् ॥ १२ ॥ इत्येतद्भार्गवाख्यानं शुकदेवान्मया श्रुतम् । पठितं श्रावितं चात्र पुण्यं धन्यं यशस्करम् ॥ १३ ॥ अवतारं महाविष्णोः कल्केः परममद्भुतम् । पठतां शृण्वतां भक्त्या सर्वाशुभविनाशनम् ॥ १४ ॥ इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे ऋषिकृतो गंगास्तवः संपूर्णः ॥

१४८. सत्यज्ञानानंदतीर्थकृतगंगाष्टकम् ।

श्रीगणेशाय नमः ॥ यदवधि तव नीरं पातकी नैति गंगे तदवधि मलजालैर्नैव मुक्तः कलौ स्यात् । तव जलकणिकाऽलं पापिनां पापशुद्धौ पतितपरमदीनांस्त्वं हि पासि प्रपन्नान् ॥ १ ॥ तव शिवजललेशं वायुनीतं समेत्य सपदि निरयजालं शून्यतामेति गंगे । शमलगिरिसमूहाः प्रस्फुटंति प्रचंडास्त्वयि सखि विशतां नः पापशंका कुतः स्यात् ॥ २ ॥ तव शिवजलजालं निःसृतं यर्हि गंगे सकलभुवनजालं पूतपूतं तदाऽभूत् । यमभटकलिवार्ता देवि लुप्ता यमोऽपि व्यधिकृतवरदेहः पूर्णकामाः सकामाः ॥ ३ ॥ मधुमधुवनपूगै रत्नपूगैर्नृपूगैर्मधुमधुवनपूगैर्देवपूगैः सपूगैः । पुरहरपरमांगे भासि मायेव गंगे शमयसि विषतापं देवदेवस्य वंद्यम् ॥ ४ ॥ चलितशशिकुलाभैरुत्तरंगैस्तरंगैरमितनदनदीनामंगसंगैरसंगैः ।

विहरसि जगदंडे खंडयंती गिरींद्रान् रमयसि निजकांतं सागरं कांतकांते ॥ ५ ॥ तव परमहिमानं चित्तवाचाम-मानं हरिहरविधिशक्रा नापि गंगे विदंति । श्रुतिकुलम-भिधत्ते शंकितं तं गुणांतं गुणगणसुविलापैर्नेति नेतीति सत्यम् ॥ ६ ॥ तव नुतिनतिनामान्यप्यघं पावयंति द-दति परमशांतिं दिव्यभोगान् जनानाम् । इति पतितश-रण्ये त्वां प्रपन्नोऽस्मि मातर्ललिततरतरंगे चांग गंगे प्रसीद ॥ ७ ॥ शुभतरकृतयोगाद्विश्वनाथप्रसादाद्भवहरव-रविद्यां प्राप्य काश्यां हि गंगे । भगवति तव तीरे नीर-सारं निपीय मुदितहृदयकंजे नंदसूनुं भजेऽहम् ॥ ८ ॥ गंगाष्टकमिदं कृत्वा भुक्तिमुक्तिप्रदं नृणाम् । सत्यज्ञाना-नंदतीर्थयतिना स्वर्पितं शिवे ॥९॥ तेन प्रीणातु भगवान् शिवो गंगाधरो विभुः । करोतु शंकरः काश्यां जनानां सततं शिवम् ॥ १० ॥ इति सत्यज्ञानानंदतीर्थयतिना विरचितं गंगाष्टकं संपूर्णम् ॥

१४९. प्रयागाष्टकम् ।

श्रीगणेशाय नमः ॥ मुनय ऊचुः । सुरमुनिदितिजेंद्रैः सेव्यते योऽस्ततंद्रैर्गुरुतरदुरितानां का कथा मानवानाम् । स भुवि सुकृतकर्तुर्वांछितावाप्तिहेतुर्जयति विजितयाग-स्तीर्थराजः प्रयागः ॥ १ ॥ श्रुतिः प्रमाणं स्मृतयः प्रमाणं पुराणमप्यत्र परं प्रमाणम् । यत्रास्ति गंगा यमुना प्रमाणं

स तीर्थराजो जयति प्रयागः ॥ २ ॥ न यत्र योगाचरण-प्रतीक्षा न यत्र यज्ञेष्टिविशिष्टदीक्षा । न तारकज्ञानगुरो-रपेक्षा स तीर्थराजो जयति प्रयागः ॥ ३ ॥ चिरं निवासं न समीक्षते यो ह्युदारचित्तः प्रददाति च क्रमात् । यः कल्पिताथांश्च ददाति पुंसः स तीर्थरा० ॥ ४ ॥ यत्राप्लु-तानां न यमो नियंता यत्रास्थितानां सुगतिप्रदाता । यत्राश्रितानाममृतप्रदाता स तीर्थराजो० ॥५॥ पुर्यः सप्त प्रसिद्धाः प्रतिवचनकरीस्तीर्थराजस्य नार्यो नैकव्यान्मुक्ति-दाने प्रभवति सुगुणा काशते ब्रह्म यस्याम् । सेयं राज्ञी प्रधाना प्रियवचनकरी मुक्तिदानेन युक्ता येन ब्रह्मांड-मध्ये स जयति सुतरां तीर्थराजः प्रयागः ॥ ६ ॥ तीर्थावली यस्य तु कंठभागे दानावली वल्गति पादमूले । व्रतावली दक्षिणपादमूले स तीर्थराजो जयति प्रयागः ॥ ७ ॥ आज्ञापि यज्ञाः प्रभवोपि यज्ञाः सप्तर्षिसिद्धाः सुकृतानभिज्ञाः । विज्ञापयंतः सततं हि काले स तीर्थ० ॥ ८ ॥ सितासिते यत्र तरंगचामरे नद्यौ विभाते मुनि-भानुकन्यके । लीलातपत्रं वट एक साक्षात्स तीर्थराजो ज० ॥ ९ ॥ तीर्थराजप्रयागस्य माहात्म्यं कथयिष्यति । शृण्वतः सततं भक्त्या वाञ्छितं फलमाप्नुयात् ॥ १० ॥ इति श्रीमत्स्यपुराणे प्रयागराजमाहात्म्याष्टकं समाप्तम् ॥

१५० काशीपंचकम् ।

श्रीगणेशाय नमः ॥ मनोनिवृत्तिः परमोपशांतिः सा तीर्थवर्या मणिकर्णिका च । ज्ञानप्रवाहा विमलादिगंगा सा काशिकाहं निजबोधरूपा ॥ १ ॥ यस्यामिदं कल्पितमिंद्रजालं चराचरं भाति मनोविलासम् । सच्चित्सुखैका परमात्मरूपा सा का० ॥२॥ कोशेषु पंचस्वधिराजमाना बुद्धिर्भवानी प्रतिदेहगेहम् । साक्षी शिवः सर्वगणोऽन्तरात्मा सा का० ॥३॥ काश्यां हि काश्यते काशी काशी सर्वप्रकाशिका । सा काशी विदिता येन तेन प्राप्ता हि काशिका ॥४॥ काशी क्षेत्रं शरीरं त्रिभुवनजननी व्यापिनी ज्ञानगंगा भक्तिः श्रद्धा गयेयं निजगुरुचरणध्यानयोगः प्रयागः । विश्वेशोऽयं तुरीयः सकलजनमनःसाक्षिभूतोंऽतरात्मा देहे सर्वं मदीये यदि वसति पुनस्तीर्थमन्यत्किमस्ति ॥ ५ ॥ इति श्रीमच्छंकराचार्यविरचितं काशीपंचकं संपूर्णम् ॥

१५१. यमुनाष्टकम् ।

श्रीगणेशाय नमः ॥ मुरारिकायकालिमाललामवारिधारिणी तृणीकृतत्रिविष्टपा त्रिलोकशोकहारिणी । मनोऽनुकूलकूलकुंजपुंजधूतदुर्मदा धुनोतु मे मनोमलं कलिंदनंदिनी सदा ॥ १ ॥ मलापहारिवारिपूरिभूरिमंडितामृता भृशं प्रपातकप्रपंचनातिपंडिता निशा । सुनंदनंदिनांगसंगरागरंजिताहिता धुनोतु० ॥ २ ॥ लसत्तरंगसंग-

धूतभूतजातपातका नवीनमाधुरीधुरीणभक्तिजातचातका । तटांतवासदासहंससंसृताह्निकामदा धुनोतु० ॥ ३ ॥ विहाररासखेदभेदधीरतीरमारुता गता गिरामगोचरे यदीयनीरचारुता । प्रवाहसाहचर्यपूतमेदिनीनदीनदा धुनोतु० ॥ ४ ॥ तरंगसंगसैकतांतरांतितं सदासिता शरन्निशाकरांशुमंजुमंजरीसभाजिता । भवार्चनाप्रचारुणांबुनाधुनाविशारदा धुनोतु० ॥ ५ ॥ जलांतकेलिकारिचारुराधिकांगरागिणी स्वभर्तुरन्यदुर्लभांगतांगतांशभागिनी । स्वदत्तसुप्तसप्तसिंधुभेदनातिकोविदा धुनोतु० ॥६॥ जलच्युताच्युतांगरागलंपटालिशालिनी विलोलराधिकाकचांतचंपकालिमालिनी । सदावगाहनावतीर्णभर्तृभृत्यनारदा धुनोतु० ॥ ७ ॥ सदैव नंदनंदकेलिशालिकुंजमंजुला तटोत्थफुल्लमल्लिकाकदंबरेणुसूज्ज्वला । जलावगाहिनां नृणां भवाब्धिसिंधुपारदा धुनोतु० ॥ ८ ॥ इति श्रीमच्छंकराचार्यविरचितं यमुनाष्टकं संपूर्णम् ॥

१५२. यमुनाष्टकम् ।

श्रीगणेशाय नमः ॥ कृपापारावारां तपनतनयां तापशमनीं मुरारिप्रेयस्यां भवभयदवां भक्तिवरदाम् । वियज्जालान्मुक्तां श्रियमपि सुखाप्तेः प्रतिदिनं सदा धीरो नूनं भजति यमुनां नित्यफलदाम् ॥ १ ॥ मधुवनचारिणि भास्करवाहिनि जाह्नविसंगिनि सिंधुसुते मधुरिपुभूषिणि

माधवतोषिणि गोकुलभीतिविनाशकृते । जगदघमोचनि मानसदायिनि केशवकेलिनिदानगते जय यमुने जय भीतिनिवारिणि संकटनाशिनि पावय माम् ॥ २ ॥ अयि मधुरे मधुमोदविलासिनि शैलविहारिणि वेगभरे परिजनपालिनि दुष्टनिपूदिनि वांछितकामविलासधरे । व्रजपुरवासिजनार्जितपातकहारिणि विश्वजनोद्धरिके जय यमुने जय भीतिनिवा० ॥ ३ ॥ अतिविपदम्बुधिमग्नजनं भवतापशताकुलमानसकं गतिमतिहीनमशेषभयाकुलमागतपादसरोजयुगम् । ऋणभयभीतिमनिष्कृतिपातककोटिशतायुतपुंजतरं जय यमुने० ॥ ४ ॥ नवजलदद्युतिकोटिलसत्तनुहेममयाभररंजितके तडिदवहेलिपदांचलचंचलशोभितपीतसुचेलधरे । मणिमयभूषणचित्रपटासनरंजितगंजितभानुकरे जय यमुने० ॥ ५ ॥ शुभपुलिने मधुमत्तयदूद्भवरासमहोत्सवकेलिभरे उच्चकुलाचलराजितमौक्तिकहारमयाभररोदसिके । नवमणिकोटिकभास्करकंचुकिशोभिततारकहारयुते जय यमुने० ॥ ६ ॥ करिवरमौक्तिकनासिकभूषणवातचमत्कृतचंचलके मुखकमलामलसौरभचंचलमत्तमधुव्रतलोचनिके । मणिगणकुंडललोलपरिस्फुरदाकुलगण्डयुगामलके जय यमुने० ॥ ७ ॥ कलरवनूपुरहेममयाचितपादसरोरुहसारुणिके धि-

मिधिमिधिमिधिमितालविनोदितमानसमंजुलपादगते । तव पदपंकजमाश्रितमानवचित्तसदाखिलतापहरे जय यमुने० ॥८॥ भवोत्तापांभोधौ निपतितजनो दुर्गतियुतो यदि स्तौति प्रातः प्रतिदिननन्याश्रयतया । हयाहेषैः कामं करकुसुमपुंजैरविरतां सदा भोक्ता भोगान्मरणसमये याति हरिताम् ॥ ९ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं यमुनाष्टकं संपूर्णम् ॥

१५३. नर्मदाष्टकम् ।

श्रीगणेशाय नमः ॥ सबिंदुसिंधुसुस्खलत्तरंगभंगरंजितं द्विषत्सु पापजातजातकारि वारिसंयुतम् । कृतांतदूतकालभूतभीतिहारिवर्मदे त्वदीयपादपंकजं नमामि देवि नर्मदे ॥ १ ॥ त्वदंबुलीनदीनमीनदिव्यसंप्रदायकं कलौ मलौघभारहारि सर्वतीर्थनायकम् । सुमत्स्यकच्छनक्रचक्रचक्रवाकशर्मदे त्वदीयपादपंकजं नमामि देवि नर्मदे ॥ २ ॥ महागभीरनीरपूरपापधूतभूतलं ध्वनत्समस्तपातकारिदारितापदाजलम् । जगल्लये महाभये मृकंडुसूनुहर्म्यदे त्वदीयपादपं० ॥ ३ ॥ गतं तदैव मे भयं त्वदंबु वीक्षितं यदा मृकंडुसूनुशौनकासुरारिसेवि सर्वदा । पुनर्भवाब्धिजन्मजं भवाब्धिदुःखवर्मदे त्वदीयपादपं० ॥ ४ ॥ अलक्षलक्षकिन्नरामरासुरादिपूजितं सुलक्षनीरतीरधीरपक्षिलक्षकूजितम् । वसिष्ठशिष्टपिप्पलादिकर्द-

मादिशर्मदे त्वदीयपाद० ॥ ५ ॥ सनत्कुमारनाचिकेत-कश्यपात्रिषट्पदैर्धृतं स्वकीयमानसेषु नारदादिषट्पदैः । रवींदुरंतिदेवदेवराजकर्मशर्मदे त्वदीयपाद० ॥ ६ ॥ अलक्षलक्षलक्षपापलक्षसारसायुधं ततस्तु जीवजंतुतंतु-भुक्तिमुक्तिदायकम् । विरिंचिविष्णुशंकरस्वकीयधामवर्म-दे त्वदीयपाद० ॥ ७ ॥ अहो मृतं स्वनं श्रुतं महेशकेशजा-तटे किरातसूतवाडवेषु पंडिते शठे नटे । दुरंतपापताप-हारिसर्वजंतुशर्मदे त्वदीयपाद० ॥ ८ ॥ इदं तु नर्मदा-ष्टकं त्रिकालमेव ये सदा पठंति ते निरंतरं न यांति दुर्गतिं कदा । सुलभ्य देहदुर्लभं महेशधामगौरवं पुन-र्भवा नरा न वै विलोकयंति रौरवम् ॥ ९ ॥ इति श्रीम-च्छंकराचार्यविरचितं नर्मदाष्टकस्तोत्रं संपूर्णम् ॥

१५४. पुष्कराष्टकम् ।

श्रीगणेशाय नमः ॥ श्रियायुतं त्रिदेहतापपापराशिना-शकं मुनींद्रसिद्धसाध्यदेवदानवैरभिष्टुतम् । तटेऽस्ति यज्ञपर्वतस्य मुक्तिदं सुखाकरं नमामि ब्रह्मपुष्करं सवै-ष्णवं सशंकरम् ॥१॥ सदार्यमासशुष्कपंचवासरे वरागतं तदन्यथांतरिक्षगं सुतंत्रभावनानुगम् । तदंबुपानमज्जनं दशां सदामृताकरं नमामि० ॥ २ ॥ त्रिपुष्कर त्रिपु-ष्कर त्रिपुष्करेति संस्मरेत्स दूरदेशगोऽपि यस्तदंगपाप-नाशनम् । प्रपन्नदुःखभंजनं सुरंजनं सुधाकरं नमामि०

॥ ३ ॥ मृकंडुमंकणौ पुलस्त्यकण्वपर्वतासिता अगस्त्य-भार्गवौ दधीचिनारदौ शुकादयः। सपद्मतीर्थपावनैक-दृष्टयो दयाकरं नमामि० ॥ ४ ॥ सदा पितामहेक्षितं व-राहविष्णुनेक्षितं तथाऽमरेश्वरेक्षितं सुरासुरैः समीक्षि-तम्। इहैव भुक्तिमुक्तिदं प्रजाकरं धनाकरं नमामि० ॥५॥ त्रिदंडिदंडिब्रह्मचारितापसैः सुसेवितं पुरार्धचंद्रमास-देवनंदिकेश्वराभिधैः। सवैद्यनाथनीलकंठसेवितं सुधा-करं नमामि० ॥६॥ सुपंचधा सरस्वती विराजते यदंतरे तथैकयोजनायतं विभाति तीर्थनायकम्। अनेकदेवप-त्रतीर्थसागरं रसाकरं नमामि० ॥ ७ ॥ यमादिसंयुतो नरस्त्रिपुष्करं निमज्जति पितामहश्च माधवोऽप्युमाधवः प्रसन्नताम्। प्रयाति तत्पदं ददात्ययत्नतो गुणाकरं न-मामि० ॥ ८ ॥ इदं हि पुष्कराष्टकं सुनीतिनीरजाश्रितं स्थितं मदीयमानसे कदापि माऽपगच्छतु। त्रिसंध्यमा पठंति ये त्रिपुष्कराष्टकं नराः प्रदीप्तदेहभूषणा भवंति मे-शकिंकराः ॥ ९ ॥ इति श्रीपुष्कराष्टकं समाप्तम् ॥

१५५. श्रीमणिकर्णिकाष्टकम्।

श्रीगणेशाय नमः ॥ त्वत्तीरे मणिकर्णिके हरिहरौ सायु-ज्यमुक्तिप्रदौ वादं तौ कुरुतः परस्परमुभौ जंतोः प्रयाणो-त्सवे। मद्रूपो मनुजोऽयमस्तु हरिणा प्रोक्तः शिवस्तत्क्ष-णात्तन्मध्याद्भृगुलांछनो गरुडगः पीतांबरो निर्गतः ॥१॥

इंद्राद्यास्त्रिदशाः पतंति नियतं भोगक्षये ते पुनर्जायंते मनुजास्ततोऽपि पशवः कीटाः पतंगादयः । ये मातर्मणिकर्णिके तव जले मज्जंति निष्कल्मषाः सायुज्येऽपि किरीटकौस्तुभधरा नारायणाः स्युर्नराः ॥ २ ॥ काशी धन्यतमा विमुक्तिनगरी सालंकृता गंगया तत्रेयं मणिकर्णिका सुखकरी मुक्तिर्हि तत्किंकरी । स्वर्लोकस्तुलितः सहैव विबुधैः काश्या समं ब्रह्मणा काशी क्षोणितले स्थिता गुरुतरा स्वर्गो लघुः खे गतः ॥ ३ ॥ गंगातीरमनुत्तमं हि सकलं तत्रापि काश्युत्तमा तस्यां सा मणिकर्णिकोत्तमतमा यत्रेश्वरो मुक्तिदः । देवानामपि दुर्लभं स्थलमिदं पापौघनाशक्षमं पूर्वोपार्जितपुण्यपुंजगमकं पुण्यैर्जनैः प्राप्यते ॥ ४ ॥ दुःखांभोनिधिमग्नजंतुनिवहास्तेषां कथं निष्कृतिर्ज्ञात्वैतद्धि विरंचिना विरचिता वाराणसी शर्मदा । लोकाः स्वर्गसुखास्ततोपि लघवो भोगांतपातप्रदाः काशी मुक्तिपुरी सदा शिवकरी धर्मार्थकामोत्तरा ॥ ५ ॥ एको वेणुधरो धराधरधरः श्रीवत्सभूषाधरो योऽप्येकः किल शंकरो विषधरो गंगाधरो माधरः । ये मातर्मणिकर्णिके तव जले मज्जंति ते मानवा रुद्रा वा हरयो भवंति बहवस्तेषां बहुत्वं कथम् ॥ ६ ॥ त्वत्तीरे मरणं तु मंगलकरं देवैरपि श्लाघ्यते शक्रस्तं मनुजं सहस्रनयनैर्द्रष्टुं सदा तत्परः । आयांतं

सविता सहस्रकिरणैः प्रत्युद्गतोऽभूत्सदा पुण्योऽसौ वृषगोऽथवा गरुडगः किं मंदिरं यास्यति ॥ ७ ॥ मध्याह्ने मणिकर्णिकास्नपनजं पुण्यं न वक्तुं क्षमः स्वीयैरब्दशतैश्चतुर्मुखसुरो वेदार्थदीक्षागुरुः । योगाभ्यासबलेन चंद्रशिखरस्तत्पुण्यपारं गतस्त्वत्तीरे प्रकरोति सुप्तपुरुषं नारायणं वा शिवम् ॥ ८ ॥ कृच्छ्रैः कोटिशतैः स्वपापनिधनं यच्चाश्वमेधैः फलं तत्सर्वं मणिकर्णिकास्नपनजे पुण्ये प्रविष्टं भवेत् । स्नात्वा स्तोत्रमिदं नरः पठति चेत्संसारपाथोनिधिं तीर्त्वा पल्वलवत्प्रयाति सदनं तेजोमयं ब्रह्मणः ॥९॥ इति श्रीमच्छंकराचार्यविरचितं मणिकर्णिकाष्टकस्तोत्रं संपूर्णम् ॥

१५६. आत्मपंचकम् ।

श्रीगणेशाय नमः ॥ नाहं देहो नेंद्रियाण्यंतरंगं नाहंकारः प्राणवर्गो न बुद्धिः । दारापत्यक्षेत्रवित्तादिदूरः साक्षी नित्यः प्रत्यगात्मा शिवोऽहम् ॥१॥ रज्ज्वज्ञानाद्भाति रज्जुर्यथाहिः स्वात्माज्ञानादात्मनो जीवभावः । आप्तोक्त्या हि भ्रांतिनाशे स रज्जुर्जीवो नाहं देशिकोक्त्या शिवोऽहम् ॥ २ ॥ आभातीदं विश्वमात्मन्यसत्यं सत्यज्ञानानंदरूपे विमोहात् । निद्रामोहात्स्वप्नवत्तन्न सत्यं शुद्धः पूर्णो नित्य एकः शिवोऽहम् ॥ ३ ॥ मत्तो नान्यत्किंचिदत्रास्ति विश्वं सत्यं बाह्यं वस्तु मायोपक्लृप्तम् । आदर्शांतर्भासमानस्य तुल्यं मय्यद्वैते भाति तस्माच्छिवोऽहम् ॥ ४ ॥ नाहं जातो न प्रवृद्धो न नष्टो देहस्योक्ताः प्राकृताः सर्वधर्माः । कर्तृत्वादिश्चिन्मयस्यास्ति नाहंकारस्यैव ह्यात्मनो मे शिवोऽहम् ॥ ५ ॥ नाहं जातो जन्ममृत्यू कुतो मे नाहं प्राणः क्षुत्पिपासे कुतो मे । नाहं चित्तं शोकमोहौ कुतो मे नाहं कर्ता बंधमोक्षौ कुतो मे ॥ ६ ॥ इति श्रीमच्छंकराचार्यविरचितमात्मपंचकस्तोत्रं संपूर्णम् ॥

१५७. वैराग्यपंचकम् ।

श्रीगणेशाय नमः ॥ शिलं किमनलं भवेदनलमौदरं बाधितुं पयः प्रसृतिपूरकं किमु न धारकं सारसम् । अ-

यत्नमल्पमल्पकं पथि पटच्चरं कच्चरं भजंति विबुधा सुधा
अहह कुक्षितः कुक्षितः ॥ १ ॥ दुरीश्वरद्वारबहिर्वितर्दि-
कादुरासिकायै रचितोऽयमंजलिः । यदंजनाभं निरपाय-
मस्ति नो धनंजयस्यंदनभूषणं धनम् ॥ २ ॥ काचाय नीचं
कमनीयवाचा मोचाफलस्वादमुचा न याचे । दयाकु-
चेले धनदत्कुचेले स्थितेऽकुचेले श्रितमाकुचेले ॥ ३ ॥
क्षोणीकोणशतांशपालनखलद्दुर्वारवर्गानलक्षुभ्यत्क्षुद्रनरेंद्र-
चाटुरचनां धन्यां न मन्यामहे । देवं सेवितुमेव निश्चि-
नुमहे योऽसौ दयालुः पुरा धानामुष्टिमुचे कुचेलमु-
नये धत्ते स्म वित्तेशताम् ॥ ४ ॥ शरीरपतनावधि प्रभु-
निषेवणापादनादबिंधनधनंजयप्रशमदं धनं दंधनम् ।
धनंजयविवर्धनं धनमुदूढगोवर्धनं सुसाधनमबाधनं सुम-
नसां समाराधनम् ॥ ५ ॥ इति श्रीसर्वतंत्रस्वतंत्रवेदां-
ताचार्यकृतं वैराग्यपंचकं संपूर्णम् ॥

१५८. धन्याष्टकम् ।

श्रीगणेशाय नमः ॥ तज्ज्ञानं प्रशमकरं यदिंद्रियाणां
तज्ज्ञेयं यदुपनिषत्सु निश्चितार्थम् । ते धन्या भुवि पर-
मार्थनिश्चितेहाः शेषास्तु भ्रमनिलये परिभ्रमंति ॥ १ ॥
आदौ विजित्य विषयान्मदमोहरागद्वेषादिशत्रुगणमाहृ-
तयोगराज्याः । ज्ञात्वाऽमतं समनुभूय परात्मविद्याकां-
तासुखा बत गृहे विचरंति धन्याः ॥ २ ॥ त्यक्त्वा गृहे

रतिमतो गतिहेतुभूतामात्मेच्छयोपनिषदर्थरसं पिबंतः। वीतस्पृहा विषयभोगपदे विरक्ता धन्याश्चरंति विजनेषु विरक्तसंगाः ॥३॥ त्यक्त्वा ममाहमिति बंधकरे पदे द्वे मानावमानसदृशाः समदर्शिनश्च । कर्तारमन्यमवगम्य तदर्पितानि कुर्वंति कर्मपरिपाकफलानि धन्याः ॥ ४ ॥ त्यक्त्वेषणात्रयमवेक्षितमोक्षमार्गा भैक्षामृतेन परिकल्पितदेहयात्राः । ज्योतिः परात्परतरं परमात्मसंज्ञं धन्या द्विजा रहसि हृद्यवलोकयंति ॥ ५ ॥ नासन्न सन्न सदसन्न महन्न चाणु न स्त्री पुमान्न च नपुंसकमेकबीजम् । यैर्ब्रह्म तत्समनुपासितमेकचित्ता धन्या विरेजुरितरे भवपाशबद्धाः ॥ ६ ॥ अज्ञानपंकपरिमग्नमपेतसारं दुःखालयं मरणजन्मजरावसक्तम् । संसारबंधनमनित्यमवेक्ष्य धन्या ज्ञानासिना तदवशीर्य विनिश्चयंति ॥ ७ ॥ शान्तैरनन्यमतिभिर्मधुरस्वभावैरेकत्वनिश्चितमनोभिरपेतमोहैः । साकं वनेषु विजितात्मपदस्वरूपं शास्त्रेषु सम्यगनिशं विमृशंति धन्याः ॥ ८ ॥ अहिमिव जनयोगं सर्वदा वर्जयेद्यः कुणपमिव सुनारीं त्यक्तुकामो विरागी। विषमिव विषयान्यो मन्यमानो दुरंतान् जयति परमहंसो मुक्तिभावं समेति ॥९॥ संपूर्णं जगदेव नंदनवनं सर्वेऽपि कल्पद्रुमा गांगं वारि समस्तवारिनिवहः पुण्याः समस्ताः क्रियाः। वाचः प्राकृतसंस्कृताः श्रुतिशिरो वाराणसी मेदिनी सर्वा-

धस्थितिरस्य वस्तुविषया दृष्टे परब्रह्मणि ॥ १० ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं धन्याष्टकस्तोत्रं संपूर्णम् ॥

१५९. विज्ञाननौका।

श्रीगणेशाय नमः ॥ तपोयज्ञदानादिभिः शुद्धबुद्धिर्विरक्तो नृपादौ पदे तुच्छबुद्ध्या। परित्यज्य सर्वं यदाप्नोति तत्त्वं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ १ ॥ दयालुं गुरुं ब्रह्मनिष्ठं प्रशांतं समाराध्य मत्या विचार्य स्वरूपम्। यदाप्नोति तत्त्वं निदिध्यास्य विद्वान्परं ब्रह्म० ॥ २ ॥ यदानंदरूपं प्रकाशस्वरूपं निरस्तप्रपंचं परिच्छेदशून्यम्। अहंब्रह्मवृत्त्यैकगम्यं तुरीयं परं ब्रह्म० ॥३॥ यदज्ञानतो भाति विश्वं समस्तं विनष्टं च सद्यो यदात्मप्रबोधे। मनोवागतीतं विशुद्धं विमुक्तं परं ब्रह्म० ॥४॥ निषेधे कृते नेति नेतीति वाक्यैः समाधिस्थितानां यदाभाति पूर्णम्। अवस्थात्रयातीतमेकं तुरीयं परं ब्रह्म० ॥ ५ ॥ यदानंदलेशैः समानंदि विश्वं यदाभाति सत्त्वे तदाभाति सर्वम्। यदालोचने रूपमन्यत्समस्तं परं ब्रह्म० ॥ ६ ॥ अनंतं विभुं सर्वयोनिं निरीहं शिवं संगहीनं यदोंकारगम्यम्। निराकारमत्युज्ज्वलं मृत्युहीनं परं ब्रह्म० ॥७॥ यदानंदसिंधौ निमग्नः पुमान्स्यादविद्याविलासः समस्तप्रपंचः। यदा न स्फुरत्यद्भुतं यन्निमित्तं परं ब्रह्म० ॥ ८ ॥ स्वरूपानुसंधानरूपां स्तुतिं यः

पठेदादराद्भक्तिभावो मनुष्यः। शृणोतीह वा नित्यमुद्युक्तचित्तो भवेद्विष्णुरत्रैव वेदप्रमाणात् ॥ ९ ॥ विज्ञाननावं परिगृह्य कश्चित्तरेद्यदज्ञानमयं भवाब्धिम्। ज्ञानासिना यो हि विच्छिद्य तृष्णां विष्णोः पदं याति स एव धन्यः ॥ १० ॥ इति श्रीशंकराचार्यविरचिता विज्ञाननौका संपूर्णा ॥

१६०. द्वादशपंजरिकास्तोत्रम्।

श्रीगणेशाय नमः ॥ मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम्। यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥ १ ॥ अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम्। पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता नीतिः ॥ २ ॥ का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः। कस्य त्वं कः कुत आयातस्तत्त्वं चिंतय यदिदं भ्रातः ॥ ३ ॥ मा कुरु जनधनयौवनगर्वं हरति निमेषात्कालः सर्वम्। मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा ॥ ४ ॥ कामं क्रोधं मोहं लोभं त्यक्त्वात्मानं भावय कोऽहम्। आत्मज्ञानविहीना मूढास्ते पच्यंते नरकनिगूढाः ॥ ५ ॥ सुरमंदिरतरुमूलनिवासः शय्या भूतलमजिनं वासः। सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥६॥ शत्रौ मित्रे पुत्रे बंधौ मा कुरु यत्नं विग्रहसंधौ। भव सम-

वित्तः सर्वत्र त्वं वांछस्यचिराद्यदि विष्णुत्वम् ॥७॥ त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि सर्वसहिष्णुः। सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम् ॥ ८ ॥ प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम्। जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम् ॥ ९ ॥ नलिनीदलगतसलिलं तरलं तद्वज्जीवितमतिशयचपलम्। विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम् ॥१०॥ का तेऽष्टादशदेशे चिंता वातुल तव किं नास्ति नियंता। यस्त्वां हस्ते सुदृढनिबद्धं बोधयति प्रभवादिविरुद्धम् ॥ ११ ॥ गुरुचरणांबुजनिर्भरभक्तः संसारादचिराद्भव मुक्तः। सेंद्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम् ॥ १२ ॥ द्वादशपंजरिकामय एष शिष्याणां कथितो ह्युपदेशः। येषां चित्ते नैव विवेकस्ते पच्यंते नरकमनेकम् ॥१३॥ इति श्रीमच्छंकराचार्यविरचितं द्वादशपंजरिकास्तोत्रं संपूर्णम् ॥

१६१. चर्पटपंजरिकास्तोत्रम्।

श्रीगणेशाय नमः ॥ दिनमपि रजनी सायं प्रातः शिशिरवसंतौ पुनरायातः। कालः क्रीडति गच्छत्यायुस्तदपि न मुंचत्याशावायुः ॥ १ ॥ भज गोविंदं भज गोविंदं भज गोविंदं मूढमते। प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृञ्करणे। (ध्रुवपदम्)। अग्रे वह्निः पृष्ठे भानू

रात्रौ चुबुकसमर्पितजानुः । करतलभिक्षा तरुतलवासस्तदपि न मुंचत्याशापाशः । भज गो० ॥ २ ॥ यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः । पश्चाद्धावति जर्जरदेहे वार्तां पृच्छति कोपि न गेहे । भज गोविंदं भज० ॥ ३ ॥ जटिलो मुंडी लुंचितकेशः काषायांबरबहुकृतवेषः । पश्यन्नपि च न पश्यति मूढ उदरनिमित्तं बहुकृतवेषः । भज गोविं० ॥ ४ ॥ भगवद्गीता किंचिदधीता गंगाजललवकणिका पीता । सकृदपि यस्य मुरारिसमर्चा तस्य यमः किं कुरुते चर्चा । भज गोविंदं भज० ॥ ५ ॥ अंगं गलितं पलितं मुंडं दशनविहीनं जातं तुंडम् । वृद्धो याति गृहीत्वा दंडं तदपि न मुंचत्याशा पिंडम् । भज गोविंदं भ० ॥ ६ ॥ बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः। वृद्धस्तावच्चिंतामग्नः परे ब्रह्मणि कोपि न लग्नः । भज गोविंदं भज० ॥ ७ ॥ पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् । इह संसारे खलु दुस्तारे कृपयाऽपारे पाहि मुरारे । भज गोविंदं भज० ॥ ८ ॥ पुनरपि रजनी पुनरपि दिवसः पुनरपि पक्षः पुनरपि मासः । पुनरप्ययनं पुनरपि वर्षं तदपि न मुंचत्याशामर्षम् । भज गोविंदं भज० ॥ ९ ॥ वयसि गते कः कामविकारः शुष्के नीरे कः कासारः । नष्टे द्रव्ये कः परिवारो ज्ञाते तत्त्वे कः संसारः । भज गोविंदं भज० ॥ १० ॥ नारीस्तनभरनाभिनिवेशं

मिथ्यामायामोहावेशम् । एतन्मांसवसादिविकारं मनसि विचारय वारंवारम् । भज गोविंदं भज गो० ॥ ११ ॥ कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः । इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम् । भज गोविंदं भज० ॥ १२ ॥ गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् । नेयं सज्जनसंगे चित्तं देयं दीनजनाय च वित्तम् । भज गोविंदं० ॥ १३ ॥ यावज्जीवो निवसति देहे कुशलं तावत्पृच्छति गेहे । गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये । भज गोविंदं भज० ॥१४॥ सुखतः क्रियते रामाभोगः पश्चाद्धंत शरीरे रोगः । यद्यपि लोके मरणं शरणं तदपि न मुंचति पापाचरणम् । भज गोविंदं भज० ॥ १५ ॥ रथ्याचर्पटविरचितकंथः पुण्यापुण्यविवर्जितपंथः । नाहं न त्वं नायं लोकस्तदपि किमर्थं क्रियते शोकः । भज गोविंदं भज० ॥ १६ ॥ कुरुते गंगासागरगमनं व्रतपरिपालनमथवा दानम् । ज्ञानविहीने सर्वमनेन मुक्तिर्न भवति जन्मशतेन । भज गोविंदं भज० ॥ १७ ॥ इति श्रीमच्छंकराचार्यविरचितं चर्पटपंजरिकास्तोत्रं संपूर्णम् ॥

१६२. हस्तामलकस्तोत्रम् ।

श्रीगणेशाय नमः ॥ कस्त्वं शिशो कस्य कुतोऽसि गंता किं नाम ते त्वं कुत आगतोऽसि । एतन्मयोक्तं वद चार्भ-

क स्त्वं मत्प्रीतये प्रीतिविवर्धनोऽसि ॥ १ ॥ हस्तामलक उवाच । नाहं मनुष्यो न च देवयक्षौ न ब्राह्मणक्षत्रियवैश्यशूद्रः । न ब्रह्मचारी न गृही वनस्थो भिक्षुर्न चाहं निजबोधरूपः ॥ २ ॥ निमित्तं मनश्चक्षुरादिप्रवृत्तौ निरस्ताखिलोपाधिराकाशकल्पः । रविर्लोकचेष्टानिमित्तं यथा यः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ३ ॥ यमग्न्युष्णवन्नित्यबोधस्वरूपं मनश्चक्षुरादीन्यबोधात्मकानि । प्रवर्तंत आश्रित्य निष्कंपमेकं स नित्योपलब्धिस्वरूपोऽह० ॥ ४ ॥ मुखाभासको दर्पणे दृश्यमानो मुखत्वात्पृथक्त्वेन नैवास्तु वस्तु । चिदाभासको धीषु जीवोऽपि तद्वत्स नित्योपलब्धिस्वरूपो० ॥ ५ ॥ यथा दर्पणाभाव आभासहानौ मुखं विद्यते कल्पनाहीनमेकम् । तथा धीवियोगे निराभासको यः स नित्योप० ॥ ६ ॥ मनश्चक्षुरादेर्वियुक्तः स्वयं यो मनश्चक्षुरादेर्मनश्चक्षुरादिः । मनश्चक्षुरादेरगम्यस्वरूपः स नित्योप० ॥ ७ ॥ य एको विभाति स्वतः शुद्धचेताः प्रकाशस्वरूपोऽपि नानेव धीषु । शरावोदकस्थो यथा भानुरेकः स नित्योपल० ॥ ८ ॥ यथाऽनेकचक्षुःप्रकाशो रविर्न क्रमेण प्रकाशीकरोति प्रकाश्यम् । अनेका धियो यस्तथैकः प्रबोधः स नित्योपल० ॥ ९ ॥ विवस्वत्प्रभातं यथारूपमक्षं प्रगृह्णाति नाभातमेवं विवस्वान् । यदाभात आभासयत्यक्षमेकः स नित्यो-

पल० ॥ १० ॥ यथा सूर्य एकोप्स्वनेकश्चलासु स्थिरास्व- प्यनन्यद्विभाव्यस्वरूपः । चलासु प्रभिन्नः सुधीष्वेक एव स नित्योपल० ॥ ११ ॥ घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा निष्प्रभं मन्यते चातिमूढः । तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपल० ॥ १२ ॥ समस्तेषु वस्तुष्वनुस्यू- तमेकं समस्तानि वस्तूनि यन्न स्पृशंति । वियद्वत्सदा शुद्धमच्छस्वरूपं स नित्यो० ॥ १३ ॥ उपाधौ यथा भेदता सन्मणीनां तथा भेदता बुद्धिभेदेषु तेऽपि । यथा चंद्रिकाणां जले चंचलत्वं तथा चंचलत्वं तवापीह विष्णो ॥ १४ ॥ इति श्रीमच्छंकराचार्यकृतहस्तामलकसंवादस्तोत्रं संपूर्णम् ॥

१६३. आत्मबोधः ।

श्रीगणेशाय नमः ॥ तपोभिः क्षीणपापानां शांतानां वीत- रागिणाम् । मुमुक्षूणामपेक्ष्योयमात्मबोधो विधीयते ॥१॥ बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम् । पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिद्ध्यति ॥ २ ॥ अविरो- धितया कर्म नाविद्यां विनिवर्तयेत् । विद्याऽविद्यां निहं- त्येव तेजस्तिमिरसंघवत् ॥ ३ ॥ परिच्छिन्नमिवाज्ञानात्त- न्नाशे सति केवलः । स्वयं प्रकाशते ह्यात्मा मेघापायेंऽशु- मानिव ॥ ४ ॥ अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्धि नि- र्मलम् । कृत्वाऽज्ञानं स्वयं नश्येज्जलं कतकरेणुवत् ॥ ५ ॥

संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः । स्वकाले सत्यवद्भाति प्रबोधे सत्यसद्भवेत् ॥ ६ ॥ तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा । यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमद्वयम् ॥७॥ सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पिताः । व्यक्तयो विविधाः सर्वा हाटके कटकादिवत् ॥ ८ ॥ यथाकाशो हृषीकेशो नानोपाधिगतो विभुः । तद्भेदाद्भिन्नवद्भाति तन्नाशे सति केवलः ॥ ९ ॥ नानोपाधिवशादेव जातिवर्णाश्रमादयः । आत्मन्यारोपितास्तोये रसवर्णादिभेदवत् ॥ १० ॥ पंचीकृतमहाभूतसंभवं कर्मसंचितम् । शरीरं सुखदुःखानां भोगायतनमुच्यते ॥ ११ ॥ पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितम् । अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनम् ॥ १२ ॥ अनाद्यविद्याऽनिर्वाच्या कारणोपाधिरुच्यते । उपाधित्रितयादन्यमात्मानमवधारयेत् ॥१३॥ पंचकोशादियोगेन तत्तन्मय इव स्थितः । शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा ॥ १४ ॥ वपुस्तुषादिभिः कोशैर्युक्तं युक्त्यावघाततः । आत्मानमंतरं शुद्धं विविच्यात्तंदुलं यथा ॥ १५ ॥ सदा सर्वगतोऽप्यात्मा न सर्वत्रावभासते । बुद्धावेवावभासेत स्वच्छेषु प्रतिबिंबवत् ॥ १६ ॥ देहेंद्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम् । तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा ॥१७॥ व्यापृतेष्विंद्रियेष्वात्मा व्यापारीवाविवेकिनाम् । दृश्यतेऽभ्रेषु धा-

वस्तु धावन्निव यथा शशी ॥ १८ ॥ आत्मचैतन्यमा-
श्रित्य देहेंद्रियमनोधियः । स्वकीयार्थेषु वर्तंते सूर्यालोकं
यथा जनाः ॥१९॥ देहेन्द्रियगुणान्कर्माण्यमले सच्चिदा-
त्मनि । अध्यस्यंत्यविवेकेन गगने नीलतादिवत् ॥ २० ॥
अज्ञानान्मनसोपाधेः कर्तृत्वादीनि चात्मनि । कल्प्यंतेऽम्बु-
गते चंद्रे चलनादि यथांभसः ॥२१॥ रागेच्छासुखदुःखा-
दि बुद्धौ सत्यां प्रवर्तते । सुषुप्तौ नास्ति तन्नाशे तस्माद्बु-
द्धेस्तु नात्मनः ॥ २२ ॥ प्रकाशोऽर्कस्य तोयस्य शैत्यम-
ग्नेर्यथोष्णता । स्वभावः सच्चिदानंदनित्यनिर्मलतात्मनः
॥ २३ ॥ आत्मनः सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्वयम् ।
संयोज्य चाविवेकेन जानामीति प्रवर्तते ॥ २४ ॥ आ-
त्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्विति । जीवः स-
र्वमलं ज्ञात्वा कर्ता द्रष्टेति मुह्यति ॥ २५ ॥ रज्जुसर्पवदा-
त्मानं जीवं ज्ञात्वा भयं वहेत् । नाहं जीवः परात्मेति
ज्ञातं चेन्निर्भयो भवेत् ॥ २६ ॥ आत्मावभासयत्येको
बुद्ध्यादीनींद्रियाणि हि । दीपो घटादिवत्स्वात्मा जडैस्तै-
र्नावभास्यते ॥ २७ ॥ स्वबोधे नान्यबोधेच्छा बोधरूपत-
यात्मनः । न दीपस्यान्यदीपेच्छा यथा स्वात्मा प्रकाशते
॥ २८ ॥ निषिध्य निखिलोपाधीन्नेति नेतीति वाक्यतः ।
विद्यादैक्यं महावाक्यैर्जीवात्मपरमात्मनोः ॥ २९ ॥ आवि-
द्यकं शरीरादि दृश्यं बुद्बुदवत्क्षरम् । एतद्विलक्षणं विद्या-

दहं ब्रह्मेति निर्मलम् ॥ ३० ॥ देहान्यत्वान्न मे जन्मजराकार्श्यलयादयः । शब्दादिविषयैः संगो निरिंद्रियतया न च ॥ ३१ ॥ असनस्त्वान्न मे दुःखरागद्वेषभयादयः । अप्राणो ह्यमनाः शुभ्र इत्यादिश्रुतिशासनात् ॥ ३२ ॥ निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरंजनः । निर्विकारो निराकारो नित्यमुक्तोऽस्मि निर्मलः ॥ ३३ ॥ अहमाकाशवत्सर्वबहिरंतर्गतोऽच्युतः । सदा सर्वसमः शुद्धो निःसंगो निर्मलोऽचलः ॥ ३४ ॥ नित्यशुद्धविमुक्तैकमखंडानंदमद्वयम् । सत्यं ज्ञानमनंतं यत्परं ब्रह्माहमेव तत् ॥ ३५ ॥ एवं निरंतराभ्यस्ता ब्रह्मैवास्मीति वासना । हरत्यविद्याविक्षेपान् रोगानिव रसायनम् ॥ ३६ ॥ विविक्तदेश आसीनो विरागो विजितेंद्रियः । भावयेदेकमात्मानं तमनंतमनन्यधीः ॥ ३७ ॥ आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः । भावयेदेकमात्मानं निर्मलाकाशवत्सदा ॥ ३८ ॥ रूपवर्णादिकं सर्वं विहाय परमार्थवित् । परिपूर्णचिदानंदस्वरूपेणावतिष्ठते ॥ ३९ ॥ ज्ञातृज्ञानज्ञेयभेदः परात्मनि न विद्यते । चिदानंदैकरूपत्वाद्दीप्यते स्वयमेव हि ॥४०॥ एवमात्मारणौ ध्यानमंथने सततं कृते । उदितावगतिर्ज्वाला सर्वाज्ञानेंधनं दहेत् ॥ ४१ ॥ अरुणेनेव बोधेन पूर्वसंतमसे हृते । तत आविर्भवेदात्मा स्वयमेवांशुमानिव ॥ ४२॥ आत्मा तु सततं प्राप्तोऽप्यप्राप्तवदविद्यया ।

तन्नाशे भासवद्भाति स्वकंठाभरणं यथा ॥ ४३ ॥ स्थाणौ पुरुषवद्भ्रांत्या कृता ब्रह्मणि जीवता । जीवस्य तात्विके रूपे तस्मिन् दृष्टे निवर्तते ॥ ४४ ॥ तत्त्वस्वरूपानुभवादुत्पन्नं ज्ञानमंजसा । अहं ममेति चाज्ञानं बाधते दिग्भ्रमादिवत् ॥ ४५ ॥ सम्यग्विज्ञानवान्योगी स्वात्मन्येवाखिलं स्थितम् । एवं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा ॥ ४६ ॥ आत्मैवेदं जगत्सर्वमात्मनोऽन्यन्न विद्यते । मृदो यद्वद्घटादीनि स्वात्मानं सर्वमीक्षते ॥ ४७ ॥ जीवन्मुक्तस्तु तद्विद्वान्पूर्वोपाधिगुणांस्त्यजेत् । सच्चिदानंदरूपत्वाद्भवेद्भ्रमरकीटवत् ॥ ४८ ॥ तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान् । योगी शांतिसमायुक्तो ह्यात्मारामो विराजते ॥ ४९ ॥ उपाधिस्थोऽपि तद्धर्मैर्न लिप्तो व्योमवन्मुनिः । सर्वविन्मूढवत्तिष्ठेदसक्तो वायुवच्चरेत् ॥ ५० ॥ बाह्यां नित्यसुखासक्तिं हित्वाऽत्मसुखनिर्वृतः । घटस्थदीपवत्स्वच्छः स्वांतरेव प्रकाशते ॥ ५१ ॥ उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः । जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथा ॥ ५२ ॥ यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम् । यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ॥ ५३ ॥ यद्दृष्ट्वा न परं दृश्यं यद्भूत्वा न पुनर्भवः । यज्ज्ञात्वा न परं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ॥ ५४ ॥ तिर्यगूर्ध्वमधः पूर्णं सच्चिदानंदमव्ययम् । अनंतं नित्यमेकं यत्-

ब्रह्मेत्यवधारयेत् ॥ ५५ ॥ अतद्व्यावृत्तिरूपेण वेदांतैर्लक्ष्यतेऽव्ययम् । अखंडानंदमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥ ५६ ॥ अखंडानंदरूपस्य तस्यानंदलवाश्रिताः । ब्रह्माद्यास्तारतम्येन भवंत्यानंदिनोऽखिलाः ॥ ५७ ॥ तद्युक्तमखिलं वस्तु व्यवहारस्तदन्वितः । तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ॥ ५८ ॥ अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययम् । अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत् ॥ ५९ ॥ यद्भासा भासतेऽर्कादि भास्यैर्यत्तु च भास्यते । येन सर्वमिदं भाति तद्ब्रह्मेत्यावधारयेत् ॥६०॥ स्वयमंतर्बहिर्व्याप्य भासयन्नखिलं जगत् । ब्रह्म प्रकाशते वह्निप्रतप्तायसपिंडवत् ॥ ६१ ॥ जगद्विलक्षणं ब्रह्म ब्रह्मणोऽन्यन्न किंचन । ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका ॥ ६२ ॥ दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत् । तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानंदमद्वयम् ॥ ६३ ॥ सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्ष्यते । अज्ञानचक्षुर्नेक्षेत भास्वंतं भानुमंधवत् ॥ ६४ ॥ श्रवणादिभिरुद्दीप्तो ज्ञानाग्निपरितापितः । जीवः सर्वमलान्मुक्तः स्वर्णवद्द्योतते स्वयम् ॥ ६५ ॥ हृदाकाशोदितो ह्यात्मा बोधभानुस्तमोपहृत् । सर्वव्यापी सर्वधारी भाति सर्वं प्रकाशते ॥ ६६ ॥ दिग्देशकालाद्यनपेक्ष्य सर्वगं शीतादिहृन्नित्यसुखं निरंजनम् । यः स्वात्मतीर्थं भजते विनिष्क्रियः स सर्ववित्सर्वगतोऽमृतो भवेत्

॥ ६७ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यकृत आत्मबोधः समाप्तः ॥

१६४. साधनपंचकम्।

श्रीगणेशाय नमः ॥ वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम्। पापौघः परिधूयतां भवसुखे दोषोऽनुसंधीयतामात्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥१॥ संगः सत्सु विधीयतां भगवतो भक्तिर्दृढा धीयतां शांत्यादिः परिचीयतां दृढतरं कर्माशु संत्यज्यताम्। सद्विद्वानुपसर्प्यतां प्रतिदिनं तत्पादुके सेव्यतां ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समाकर्ण्यताम् ॥२॥ वाक्यार्थश्च विचार्यतां श्रुतिशिरःपक्षः समाश्रीयतां दुस्तर्कात्सुविरम्यतां श्रुतिमतस्तर्कोऽनुसंधीयताम्। ब्रह्मैवास्मि विभाव्यतामहरहर्गर्वः परित्यज्यतां देहेहंमतिरुज्झ्यतां बुधजनैर्वादः परित्यज्यताम् ॥३॥ क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां स्वाद्वन्नं न तु याच्यतां विधिवशात्प्राप्तेन संतुष्यताम्। शीतोष्णादि विषह्यतां न तु वृथा वाक्यं समुच्चार्यतामौदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यताम् ॥ ४ ॥ एकांते सुखमास्यतां परतरे चेतः समाधीयतां पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम्। प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्यताम्।

तां प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम् ॥ ५ ॥ यः श्लोकपंचकमिदं पठते मनुष्यः संचिंतयत्यनुदिनं स्थिरतामुपेत्य । तस्याशु संसृतिदवानलतीव्रघोरतापः प्रशान्तिमुपयाति चितिप्रसादात् ॥ ६ ॥ इति श्रीमच्छंकराचार्यविरचितं साधनपंचकं संपूर्णम् ॥

१६५. मनीषापंचकम् ।

श्रीगणेशाय नमः ॥ सत्याचार्यस्य गमने कदाचिन्मुक्तिदायकम् । काशीक्षेत्रं प्रति सहगौर्या मार्गे तु शंकरम् ॥ १ ॥ अंत्यवेषधरं दृष्ट्वा गच्छ गच्छेति चाब्रवीत् । शंकरः सोऽपि चांडालस्तं पुनः प्राह शंकरम् ॥ २ ॥ अन्नमयादन्नमयं ह्यथवा चैतन्यमेव चैतन्यात् । द्विजवर दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति ॥ ३ ॥ किं गंगांबुनि बिंबितेंबरमणौ चंडालवाटीपयःपूरे चांतरमस्ति कांचनघटीमृत्कुंभयोर्वांबरे । प्रत्यग्वस्तुनि निस्तरंगसहजानंदावबोधाम्बुधौ विप्रोऽयं श्वपचोऽयमित्यपि महान् कोऽयं विभेदभ्रमः ॥ ४ ॥ जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृम्भते या ब्रह्मादिपिपीलिकांततनुषु प्रोता जगत्साक्षिणी । सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञापि यस्यापि चेच्चांडालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ॥ ५ ॥ ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्रविस्तारितं सर्वं चैतदविद्यया त्रिगुणयाशेषं मया कल्पितम् । इत्थं यस्य

दृढा मतिः सुखतरे नित्ये परे निर्मले चांडालोऽस्तु स तु० ॥ ६ ॥ शश्वन्नश्वरमेव विश्वमखिलं निश्चित्य वाचा गुरो-र्नित्यं ब्रह्म निरंतरं विमृशता निर्व्याजशांतात्मना । भूतं भावि च दुष्कृतं प्रदहता संविन्मये पावके प्रारब्धाय समर्पितं स्ववपुरित्येषा मनीषा मम ॥ ७ ॥ या तिर्यङ्न-रदेवताभिरहमित्यंतः स्फुटा गृह्यते यद्भासा हृदयाक्षदेह-विषया भांति स्वतोऽचेतनाः । तां भास्यैः पिहितार्कमं-डलनिभां स्फूर्तिं सदा भावयन्योगी निर्वृतमानसो हि गुरुरित्येषा मनीषा मम ॥ ८ ॥ यत्सौख्यांबुधिलेशलेशत इमे शक्रादयो निर्वृता यच्चित्ते नितरां प्रशांतकलने लब्ध्वा मुनिर्निर्वृतः । यस्मिन्नित्यसुखांबुधौ गलितधी-र्ब्रह्मैव न ब्रह्मविद्यः कश्चित्स सुरेंद्रवंदितपदो नूनं मनीषा मम ॥ ९ ॥ इति मनीषापंचकं संपूर्णम् ।

१६६. वाक्यवृत्तिः ।

श्रीगणेशाय नमः ॥ सर्गस्थितिप्रलयहेतुमचिंत्यशक्तिं विश्वेश्वरं विदितविश्वमनंतमूर्तिम् । निर्मुक्तबंधनमपारसु-खांबुराशिं श्रीवल्लभं विमलबोधघनं नमामि ॥ १ ॥ यस्य प्रसादादहमेव विष्णुर्मय्येव सर्वं परिकल्पितं च । इत्थं विजानामि सदात्मरूपस्तस्यांघ्रिपद्मं प्रणतोस्मि नित्यम् ॥ २ ॥ तापत्रयार्कसंतप्तः कश्चिदुद्विग्नमानसः । शमादि-साधनैर्युक्तः सद्गुरुं परिपृच्छति ॥ ३ ॥ अनायासेन येना-

स्यान्मुच्येयं भवबंधनात् । तन्मे संक्षिप्य भगवन्कैवल्यं कृपया वद ॥ ४ ॥ साध्वी ते वचनव्यक्तिः प्रतिभाति वदामि ते । इदं तदिति विस्पष्टं सावधानमनाः शृणु ॥ ५ ॥ तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः । तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनम् ॥६॥ को जीवः कः परश्चात्मा तादात्म्यं वा कथं तयोः । तत्त्वमस्यादिवाक्यं वा कथं तत्प्रतिपादयेत् ॥ ७ ॥ अत्र ब्रूमः समाधानं कोऽन्यो जीवस्त्वमेव हि । यस्त्वं पृच्छसि मां कोहं ब्रह्मैवासि न संशयः ॥ ८ ॥ पदार्थमेव जानामि नाद्यापि भगवन् स्फुटम् । अहंब्रह्मेति वाक्यार्थं प्रतिपद्ये कथं वद ॥ ९ ॥ सत्यमाह भवानत्र विज्ञानं नैव विद्यते । हेतुः पदार्थबोधो हि वाक्यार्थावगतेरिह ॥ १० ॥ अंतःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः । आनंदरूपः सत्यः सन् किं नात्मानं प्रपद्यसे ॥ ११ ॥ सत्यानंदस्वरूपं धीसाक्षिणं बोधविग्रहम् । चिंतयात्मतया नित्यं त्यक्त्वा देहादिगां धियम् ॥ १२ ॥ रूपादिमान्यतः पिंडस्ततो नात्मा घटादिवत् । वियदादिमहाभूतविकारत्वाच्च कुंभवत् ॥ १३ ॥ अनात्मा यदि पिण्डोऽयमुक्तहेतुबलान्मतः । करामलकवत्साक्षादात्मानं प्रतिपादय ॥ १४ ॥ घटद्रष्टा घटाद्भिन्नः सर्वथा न घटो यथा । देहद्रष्टा तथा देहो नाहमित्यवधारय ॥१५॥ एवमिंद्रियदृङ्नाहमिंद्रियाणीति निश्चिनु ।

मनो बुद्धिस्तथा प्राणो नाहमित्यवधारय ॥ १६ ॥ संघा-तो हि तथा नाहमिति दृश्यविलक्षणम् । द्रष्टारमनुमानेन निपुणं संप्रधारय ॥ १७ ॥ देहेंद्रियादयो भावा हाना-दिव्यापृतिक्षमाः । यस्य सन्निधिमात्रेण सोऽहमित्यवधा-रय ॥ १८ ॥ अन्नादन्नविकारः सन्नयस्कांतवदेव यः । वृद्ध्यादींश्चालयेत्प्रत्यक् सोऽहमित्यवधारय ॥ १९ ॥ अजडा-त्मवदाभांति यत्सान्निध्याज्जडा अपि । देहेंद्रियमनःप्राणाः सोऽहमित्यवधारय ॥ २० ॥ अगमन्मे मनोऽन्यत्र सांप्रतं च स्थिरीकृतम् । एवं यो वेत्ति धीवृत्तिं सोऽहमित्यवधारय ॥ २१ ॥ स्वप्नजागरिते सुप्तिं भावाभावौ धियां तथा । यो वेत्त्यविक्रियः साक्षात्सोऽहमित्यवधारय ॥ २२ ॥ घटावभासको दीपो घटादन्यो यथेष्यते । देहावभासको देही तथाहं बोधविग्रहः ॥ २३ ॥ पुत्रवित्तादयो भावा यस्य शेषतया प्रियाः । द्रष्टा सर्वप्रियतमः सोऽहमि-त्यवधारय ॥ २४ ॥ परप्रेमास्पदतया मा न भूवमहं सदा- । भूयासमिति यो द्रष्टा सोऽहमित्यवधारय ॥२५॥ यः साक्षिलक्षणो बोधस्त्वंपदार्थः स उच्यते । साक्षित्व-मपि बोद्धृत्वमविकारितयाऽऽत्मनः ॥ २६ ॥ देहेंद्रिय-मनःप्राणाहंकृतिभ्यो विलक्षणः । प्रोज्झिताशेषषड्भाव-विकारस्त्वंपदाभिधः ॥ २७ ॥ त्वमर्थमेवं निश्चित्य तदर्थं चिंतयेत्पुनः । अतद्व्यावृत्तिरूपेण साक्षाद्वि-

धिमुखेन च ॥ २८ ॥ निरस्ताशेषसंसारदोषोऽस्थूलादिलक्षणः । अदृश्यत्वादिगुणकः पराकृततमोमलः ॥ २९ ॥ निरस्तातिशयानंदः सत्यप्रज्ञानविग्रहः । सत्तास्वलक्षणः पूर्णः परमात्मेति गीयते ॥ ३० ॥ सर्वज्ञत्वं परेशत्वं तथा संपूर्णशक्तिता । वेदैः समर्थ्यते यस्य तद्ब्रह्मेत्यवधारय ॥ ३१ ॥ यज्ज्ञानात्सर्वविज्ञानं श्रुतिषु प्रतिपादितम् । मृदाद्यनेकदृष्टांतैस्तद्ब्रह्मेत्यवधारय ॥ ३२ ॥ यदानंत्यं प्रतिज्ञाय श्रुतिस्तत्सिद्धये जगौ । तत्कार्यत्वं प्रपंचस्य तद्ब्रह्मेत्यवधारय ॥ ३३ ॥ विजिज्ञास्यतया यच्च वेदांतेषु मुमुक्षुभिः । समर्थ्यतेऽतियत्नेन तद्ब्रह्मेत्यवधारय ॥ ३४ ॥ जीवात्मना प्रवेशश्च नियंतृत्वं च तान् प्रति । श्रूयते यस्य वेदेषु तद्ब्रह्मेत्यवधारय ॥ ३५ ॥ कर्मणां फलदातृत्वं यस्यैव श्रूयते श्रुतौ । जीवानां हेतुकर्तृत्वं तद्ब्रह्मेत्यवधारय ॥ ३६ ॥ तत्त्वंपदार्थौ निर्णीतौ वाक्यार्थश्चिन्त्यतेऽधुना । तादात्म्यमत्र वाक्यार्थस्तयोरेव पदार्थयोः ॥ ३७ ॥ संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः । अखंडैकरसत्वेन वाक्यार्थो विदुषां मतः ॥ ३८ ॥ प्रत्यग्बोधो य आभाति सोऽद्वयानंदलक्षणः । अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः ॥ ३९ ॥ इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् । अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ॥ ४० ॥ तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ।

पूर्णानंदैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥ ४१ ॥ तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने । लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादाय प्रवर्तते ॥ ४२ ॥ हित्वा द्वौ शबलौ वाच्यौ वाक्यं वाक्यार्थबोधने । यथा प्रवर्ततेऽस्माभिस्तथा व्याख्यातमादरात् ॥ ४३ ॥ आलंबनतया भाति योऽस्मत्प्रत्ययशब्दयोः । अंतःकरणसंभिन्नबोधः स त्वंपदाभिधः ॥ ४४ ॥ मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः । पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः ॥ ४५ ॥ प्रत्यक् परोक्षतैकस्य सद्वितीयत्वपूर्णता । विरुध्यते यतस्तस्माल्लक्षणा संप्रवर्तते ॥ ४६ ॥ मानांतरविरोधे तु मुख्यार्थस्य परिग्रहे । मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते ॥४७॥ तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा । सोऽहमित्यादिवाक्यस्थपदयोरिव नापरा ॥ ४८ ॥ अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढीभवेत् । शमादिसहितस्तावदभ्यसेच्छ्रवणादिकम् ॥ ४९ ॥ श्रुत्याचार्यप्रसादेन दृढो बोधो यदा भवेत् । निरस्ताशेषसंसारनिदानः पुरुषस्तदा ॥५०॥ विशीर्णकार्यकरणो भूतसूक्ष्मैरनावृतः । विमुक्तकर्मनिगडः सद्य एव विमुच्यते ॥ ५१ ॥ प्रारब्धकर्मवेगेन जीवन्मुक्तो यदा भवेत् । किंचित्कालमनारब्धकर्मबंधस्य संक्षये ॥ ५२ ॥ निरस्तातिशयानंदं वैष्णवं परमं पदम् । पुनरावृत्तिरहितं कैवल्यं प्रतिपद्यते ॥ ५३ ॥ इति श्रीम-

त्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचिता वाक्यवृत्तिः समाप्ता ॥

१६७. परापूजा ।

श्रीगणेशाय नमः ॥ पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् । स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ॥१॥ निर्मलस्य कुतः स्नानं वस्त्रं विश्वोदरस्य च । निरालंबस्योपवीतं पुष्पं निर्वासनस्य च ॥ २ ॥ निर्लेपस्य कुतो गंधो रम्यस्याभरणं कुतः । नित्यतृप्तस्य नैवेद्यस्तांबूलं च कुतो विभोः ॥ ३ ॥ प्रदक्षिणा ह्यनंतस्य ह्यद्वयस्य कुतो नतिः । वेदवाक्यैरवेद्यस्य कुतः स्तोत्रं विधीयते ॥ ४ ॥ स्वयं प्रकाशमानस्य कुतो नीराजनं विभोः । अंतर्बहिश्च पूर्णस्य कथमुद्वासनं भवेत् ॥ ५ ॥ एवमेव परा पूजा सर्वावस्थासु सर्वदा । एकबुद्ध्या तु देवेशे विधेया ब्रह्मवित्तमैः ॥ ६ ॥ इति परापूजा समाप्ता ॥

संकीर्णस्तोत्राणि ।

१६८. भगवत्प्रातःस्मरणम् ।

श्रीगणेशाय नमः ॥ प्रातः स्मरामि फणिराजतनौ शयानं नागामरासुरनरादिजगन्निदानम् । वेदैः सहागमगणैरुपगीयमानं कांतारकेतनवतां परमं निधानम् ॥ १ ॥ प्रातर्भजामि भवसागरवारिपारं देवर्षिसिद्धनिवहैर्विहितोपहारम् । संदृप्तदानवकदंबमदापहारं सौंदर्यराशिजलराशिसुताविहारम् ॥ २ ॥ प्रातर्नमामि शरदंबरकांतिकांतं पादारविंदमकरंदजुषां भवांतम् । नानावतारहृतभूमिभरं कृतांतं पाथोजकंबुरथ पादकरं प्रशांतम् ॥ ३ ॥ श्लोकत्रयमिदं पुण्यं ब्रह्मानंदेन कीर्तितम् । यः पठेत्प्रातरुत्थाय सर्वपापैः प्रमुच्यते ॥ ४ ॥ इति श्रीपरमहंसस्वामिब्रह्मानंदविरचितं श्रीभगवत्प्रातःस्मरणं संपूर्णम् ॥

१६९. प्रातःस्मरणस्तोत्रम् ।

श्रीगणेशाय नमः ॥ प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं सच्चित्सुखं परमहंसगतिं तुरीयम् । यत्स्वप्नजागरसुषुप्तमवैति नित्यं तद्ब्रह्म निष्कलमहं न च भूतसंघः ॥ १ ॥ प्रातर्भजामि च मनोवचसामगम्यं वाचो विभांति निखिला यदनुग्रहेण । यं नेति नेति वचनैर्निगमा अवो-

चुस्तं देवदेवमजमच्युतमाहुरग्र्यम् ॥ २ ॥ प्रातर्नमामि तमसः परमर्कवर्णं पूर्णं सनातनपदं पुरुषोत्तमाख्यम् । यस्मिन्निदं जगदशेषमशेषभूतौ रज्ज्वां भुजंगम इव प्रतिभासितं वै ॥ ३ ॥ श्लोकत्रयमिदं पुण्यं लोकत्रयविभूषणम् । प्रातःकाले पठेद्यस्तु स गच्छेत्परमं पदम् ॥४॥ इति श्रीभगवत्पादाचार्यविरचितं प्रातःस्मरणस्तोत्रं संपूर्णम् ।

१७०. अश्वत्थस्तोत्रम् ।

श्रीगणेशाय नमः ॥ श्रीनारद उवाच । अनायासेन लोकोऽयं सर्वान्कामानवाप्नुयात् । सर्वदेवात्मकं चैकं तन्मे ब्रूहि पितामह ॥ १ ॥ ब्रह्मोवाच । शृणु देवमुनेऽश्वत्थं शुद्धं सर्वात्मकं तरुम् । यत्प्रदक्षिणतो लोकः सर्वान्कामान्समश्नुते ॥ २ ॥ अश्वत्थाद्दक्षिणे रुद्रः पश्चिमे विष्णुरास्थितः । ब्रह्मा चोत्तरदेशस्थः पूर्वे त्विन्द्रादिदेवताः ॥३॥ स्कंधोपस्कंधपत्रेषु गोविप्रमुनयस्तथा । मूलं वेदाः पयो यज्ञाः संस्थिता मुनिपुंगव ॥ ४ ॥ पूर्वादिदिक्षु संयाता नदीनदसरोऽब्धयः । तस्मात्सर्वप्रयत्नेन ह्यश्वत्थं संश्रयेद्बुधः ॥ ५ ॥ त्वं क्षीर्यफलकश्चैव शीतलश्च वनस्पते । त्वामाराध्य नरो विंद्यादैहिकामुष्मिकं फलम् ॥ ६ ॥ चलद्दलाय वृक्षाय सर्वदाश्रितविष्णवे । बोधितत्वाय देवाय ह्यश्वत्थाय नमो नमः ॥ ७ ॥ अश्वत्थ यस्मात्त्वयि

वृक्षराज नारायणस्तिष्ठति सर्वकाले । अतः श्रुतस्त्वं सततं तरूणां धन्योऽसि चारिष्टविनाशकोऽसि ॥ ८ ॥ क्षीरदस्त्वं च येनेह येन श्रीस्त्वां निषेवते । सत्येन तेन वृक्षेंद्र मामपि श्रीर्निषेवताम् ॥९॥ एकादशात्मरुद्रोऽसि वसुनाथशिरोमणिः । नारायणोऽसि देवानां वृक्षराजोऽसि पिप्पल ॥ १० ॥ अग्निगर्भः शमीगर्भो देवगर्भः प्रजापतिः । हिरण्यगर्भो भूगर्भो यज्ञगर्भो नमोऽस्तु ते ॥ ११ ॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च । ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ १२ ॥ सततं वरुणो रक्षेत्त्वामाराद्वृष्टिराश्रयेत् । परितस्त्वां निषेवंतां तृणानि सुखमस्तु ते ॥ १३ ॥ अक्षिस्पंदं भुजस्पंदं दुःस्वप्नं दुर्विचिंतनम् । शत्रूणां च समुत्थानं ह्यश्वत्थ शमय प्रभो ॥ १४ ॥ अश्वत्थाय वरेण्याय सर्वैश्वर्यप्रदायिने । नमो दुःस्वप्ननाशाय सुस्वप्नफलदायिने ॥ १५ ॥ मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे । अंततः शिवरूपाय वृक्षराजाय ते नमः ॥ १६ ॥ यं दृष्ट्वा मुच्यते रोगैः स्पृष्ट्वा पापैः प्रमुच्यते । यदाश्रयाच्चिरंजीवी तमश्वत्थं नमाम्यहम् ॥ १७ ॥ अश्वत्थ सुमहाभाग सुभग प्रियदर्शन । इष्टकामांश्च मे देहि शत्रुभ्यश्चापराभवम् ॥ १८ ॥ आयुः प्रजां धनं धान्यं सौभाग्यं सर्वसंपदम् । देहि देव महावृक्ष त्वामहं शरणं गतः ॥ १९ ॥ ऋग्यजुः-

साममंत्रात्मा सर्वरूपी परात्परः । अश्वत्थो वेदमूलोऽसा-
वृषिभिः प्रोच्यते सदा ॥ २० ॥ ब्रह्महा गुरुहा चैव
दरिद्रो व्याधिपीडितः । आवृत्य लक्षसंख्यं तत्स्तोत्रमे-
तत्सुखी भवेत् ॥ २१ ॥ ब्रह्मचारी हविष्याशी त्वधः-
शायी जितेंद्रियः । पापोपहतचित्तोऽपि व्रतमेतत्समाचरेत्
॥ २२ ॥ एकहस्तं द्विहस्तं वा कुर्याद्गोमयलेपनम् । अर्चे-
पुरुषसूक्तेन प्रणवेन विशेषतः ॥ २३ ॥ मौनी प्रदक्षिणं
कुर्यात्प्रागुक्तफलभाग्भवेत् । विष्णोर्नामसहस्रेण ह्यच्युत-
स्यापि कीर्तनात् ॥ २४ ॥ पदे पदांतरं गत्वा करचेष्टा-
विवर्जितः । वाचा स्तोत्रं मनो ध्याने चतुरंगं प्रदक्षिणम्
॥ २५ ॥ अश्वत्थः स्थापितो येन तत्कुलं स्थापितं ततः ।
धनायुषां समृद्धिस्तु नरकात्तारयेत्पितॄन् ॥ २६ ॥ अश्व-
त्थमूलमाश्रित्य शाकान्नोदकदानतः । एकस्मिन्भोजिते
विप्रे कोटिब्राह्मणभोजनम् ॥ २७ ॥ अश्वत्थमूलमाश्रित्य
जपहोमसुरार्चनात् । अक्षयं फलमाप्नोति ब्रह्मणो वचनं
तथा ॥२८॥ एवमाश्वासितोऽश्वत्थः सदाश्वासाय कल्पते ।
यज्ञार्थं छेदितेऽश्वत्थे ह्यक्षयं स्वर्गमाप्नुयात् ॥२९॥ छिन्नो
येन वृथाश्वत्थश्छेदिताः पितृदेवताः । अश्वत्थः पूजितो
यत्र पूजिताः सर्वदेवताः ॥ ३० ॥ इति ब्रह्मनारदसंवादे
अश्वत्थस्तोत्रं संपूर्णम् ॥

१७१. नवग्रहस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् । तमोरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥१॥ दधिशंखतुषाराभं क्षीरोदार्णवसंभवम् । नमामि शशिनं सोमं शंभोर्मुकुटभूषणम् ॥ २ ॥ धरणीगर्भसंभूतं विद्युत्कांतिसमप्रभम् । कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् ॥ ३ ॥ प्रियंगुकलिकाश्यामं रूपेणाप्रतिमं बुधम् । सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ॥ ४ ॥ देवानां च ऋषीणां च गुरुं कांचनसन्निभम् । बुद्धिभूतं त्रिलोकस्य तं नमामि बृहस्पतिम् ॥ ५ ॥ हिमकुंदमृणालाभं दैत्यानां परमं गुरुम् । सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥ ६ ॥ नीलांजनसमाभासं रविपुत्रं यमाग्रजम् । छायामार्तंडसंभूतं तं नमामि शनैश्चरम् ॥ ७ ॥ अर्धकायं महावीर्यं चंद्रादित्यविमर्दनम् । सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम् ॥ ८ ॥ पलाशपुष्पसंकाशं तारकाग्रहमस्तकम् । रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥९॥ इति व्यासमुखोद्गीतं यः पठेत्सुसमाहितः । दिवा वा यदि वा रात्रौ विघ्नशांतिर्भविष्यति ॥ १० ॥ नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनम् । ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम् ॥ ११ ॥ ग्रहनक्षत्रजाः पीडास्तस्कराग्निसमुद्भवाः । ताः सर्वाः प्रशमं यांति व्यासो ब्रूते

न संशयः ॥ १२ ॥ इति श्रीव्यासविरचितं नवग्रहस्तोत्रं संपूर्णम् ॥

१७२. नवनागस्तोत्रम् ।

श्रीगणेशाय नमः ॥ अनंतं वासुकिं शेषं पद्मनाभं च कंबलम् । शंखपालं धृतराष्ट्रं तक्षकं कालियं तथा ॥ १ ॥ एतानि नव नामानि नागानां च महात्मनाम् । सायंकाले पठेन्नित्यं प्रातःकाले विशेषतः । तस्य विषभयं नास्ति सर्वत्र विजयी भवेत् ॥ २ ॥ इति श्रीनवनागस्तोत्रं संपूर्णम् ॥

१७३. शनिस्तोत्रम् ।

श्रीगणेशाय नमः । अस्य श्रीशनैश्चरस्तोत्रस्य । दशरथ ऋषिः । शनैश्चरो देवता । त्रिष्टुप्छंदः । शनैश्चरप्रीत्यर्थं जपे विनियोगः । दशरथ उवाच । कोणोऽतको रौद्रयमोऽथ बभ्रुः कृष्णः शनिः पिंगलमंदसौरिः । नित्यं स्मृतो यो हरते च पीडां तस्मै नमः श्रीरविनंदनाय ॥ १ ॥ सुरासुराः किंपुरुषोरगेंद्रा गंधर्वविद्याधरपन्नगाश्च । पीड्यंति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनंदनाय ॥ २ ॥ नरा नरेंद्राः पशवो मृगेंद्रा वन्याश्च ये कीटपतंगभृंगाः । पीड्यंति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनंदनाय ॥ ३ ॥ देशाश्च दुर्गाणि वनानि यत्र सेनानिवेशाः पुरपत्तनानि । पीड्यंति सर्वे विषमस्थितेन तस्मै नमः श्रीर-

विनंदनाय ॥ ४ ॥ तिलैर्यवैर्माषगुडान्नदानैर्लोहेन नीलांबरदानतो वा । प्रीणाति मंत्रैर्निजवासरे च तस्मै नमः श्रीरविनंदनाय ॥५॥ प्रयागकूले यमुनातटे च सरस्वतीपुण्यजले गुहायाम्। यो योगिनां ध्यानगतोऽपि सूक्ष्मस्तस्मै नमः श्रीरविनंदनाय ॥ ६ ॥ अन्यप्रदेशात्स्वगृहं प्रविष्टस्तदीयवारे स नरः सुखी स्यात् । गृहाद्गतो यो न पुनः प्रयाति तस्मै नमः श्रीरविनंदनाय ॥ ७ ॥ स्रष्टा स्वयंभूर्भुवनत्रयस्य त्राता हरीशो हरते पिनाकी । एकस्त्रिधा ऋग्यजुःसाममूर्तिस्तस्मै नमः श्रीरविनंदनाय ॥८॥ शन्यष्टकं यः प्रयतः प्रभाते नित्यं सुपुत्रैः पशुबांधवैश्च । पठेत्तु सौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाणपदं तदंते ॥ ९ ॥ कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रोंऽतको यमः । सौरिः शनैश्चरो मंदः पिप्पलादेन संस्तुतः ॥१०॥ एतानि दश नामानि प्रातरुत्थाय यः पठेत् । शनैश्चरकृता पीडा न कदाचिद्भविष्यति ॥११॥ इति श्रीशनैश्चरस्तोत्रं संपूर्णम् ॥

१७४. ऋणमोचकमंगलस्तोत्रम् ।

श्रीगणेशाय नमः ॥ मंगलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः । स्थिरासनो महाकायः सर्वकर्मविरोधकः ॥ १ ॥ लोहितो लोहिताक्षश्च सामगानां कृपाकरः । धरात्मजः कुजो भौमो भूतिदो भूमिनंदनः ॥ २ ॥ अंगारको यमश्चैव सर्वरोगापहारकः । वृष्टेः कर्ताऽपहर्ता च सर्वका-

मफलप्रदः ॥ ३ ॥ एतानि कुजनामानि नित्यं यः श्रद्धया पठेत् । ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात् ॥ ४ ॥ धरणीगर्भसंभूतं विद्युत्कांतिसमप्रभम् । कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् ॥ ५ ॥ स्तोत्रमंगारकस्यैतत्पठनीयं सदा नृभिः । न तेषां भौमजा पीडा स्वल्पापि भवति क्वचित् ॥६॥ अंगारक महाभाग भगवन्भक्तवत्सल । त्वां नमामि ममाशेषमृणमाशु विनाशय ॥ ७ ॥ ऋणरोगादिदारिद्र्यं ये चान्ये ह्यपमृत्यवः । भयक्लेशमनस्तापा नश्यंतु मम सर्वदा ॥८॥ अतिवक्र दुराराध्य भोगमुक्तजितात्मनः । तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥ ९ ॥ विरिंचिशक्रविष्णूनां मनुष्याणां तु का कथा । तेन त्वं सर्वसत्त्वेन ग्रहराजो महाबलः ॥ १० ॥ पुत्रान्देहि धनं देहि त्वामस्मि शरणं गतः । ऋणदारिद्र्यदुःखेन शत्रूणां च भयात्ततः ॥ ११ ॥ एभिर्द्वादशभिः श्लोकैर्यः स्तौति च धरासुतम् । महतीं श्रियमाप्नोति ह्यपरो धनदो युवा ॥ १२ ॥ इति श्रीस्कंदपुराणे भार्गवप्रोक्तं ऋणमोचकमंगलस्तोत्रं संपूर्णम् ॥ ॥

१७५. तुलसीकवचम् ।

श्रीगणेशाय नमः ॥ अस्य श्रीतुलसीकवचस्तोत्रमंत्रस्य । श्रीमहादेव ऋषिः । अनुष्टुप्छंदः । श्रीतुलसी देवता । मनसीप्सितकामनासिद्ध्यर्थं जपे विनियोगः । तुलसि

श्रीमहादेवि नमः पंकजधारिणि । शिरो मे तुलसी पातु भालं पातु यशस्विनी ॥ १ ॥ दृशौ मे पद्मनयना श्रीसखी श्रवणे मम । घ्राणं पातु सुगंधा मे मुखं च सुमुखी मम ॥ २ ॥ जिह्वां मे पातु शुभदा कंठं विद्यामयी मम । स्कंधौ कह्लारिणी पातु हृदयं विष्णुवल्लभा ॥ ३ ॥ मध्यं मे पुण्यदा पातु नाभिं सौभाग्यदायिनी । कटिं कुंडलिनी पातु ऊरू नारदवंदिता ॥ ४ ॥ जननी जानुनी पातु जंघे सकलवंदिता । नारायणप्रिया पादौ सर्वांगं सर्वरक्षिणी ॥ ५ ॥ संकटे विषमे दुर्गे भये वादे महाहवे । नित्यं हि संध्ययोः पातु तुलसी सर्वतः सदा ॥ ६ ॥ इतीदं परमं गुह्यं तुलस्याः कवचामृतम् । मर्त्यानाममृतार्थाय भीतानामभयाय च ॥ ७ ॥ मोक्षाय च मुमुक्षूणां ध्यायिनां ध्यानयोगकृत् । वशाय वश्यकामानां विद्यायै वेदवादिनाम् ॥ ८ ॥ द्रविणाय दरिद्राणां पापिनां पापशांतये ॥ ९ ॥ अन्नाय क्षुधितानां च स्वर्गाय स्वर्गमिच्छताम् । पशव्यं पशुकामानां पुत्रदं पुत्रकांक्षिणाम् ॥ १० ॥ राज्याय भ्रष्टराज्यानामशांतानां च शांतये । भक्त्यर्थं विष्णुभक्तानां विष्णौ सर्वांतरात्मनि ॥ ११ ॥ जाप्यं त्रिवर्गसिद्ध्यर्थं गृहस्थेन विशेषतः । उद्यंतं चंडकिरणमुपस्थाय कृतांजलिः ॥ १२ ॥ तुलसीकानने तिष्ठन्नासीनो वा जपेदिदम् । सर्वान्कामानवाप्नोति तथैव

मम सन्निधिम् ॥ १३ ॥ मम प्रियकरं नित्यं हरिभक्तिविवर्धनम् । या स्यान्मृतप्रजा नारी तस्या अंगं प्रमार्जयेत् ॥ १४ ॥ सा पुत्रं लभते दीर्घजीविनं चाप्यरोगिणम् । वंध्याया मार्जयेदंगं कुशैर्मंत्रेण साधकः ॥ १५ ॥ साऽपि संवत्सरादेव गर्भं धत्ते मनोहरम् । अश्वत्थे राजवश्यार्थी जपेदग्नेः सुरूपभाक् ॥ १६ ॥ पलाशमूले विद्यार्थी तेजोर्थ्यभिमुखो रवेः । कन्यार्थी चंडिकागेहे शत्रुहत्यै गृहे मम ॥ १७ ॥ श्रीकामो विष्णुगेहे च उद्याने स्त्री वशा भवेत् । किमत्र बहुनोक्तेन शृणु सैन्येश तत्त्वतः ॥ १८ ॥ यं यं काममभिध्यायेत्तं तं प्राप्नोत्यसंशयम् । मम गेहगतस्त्वं तु तारकस्य वधेच्छया ॥ १९ ॥ जपन् स्तोत्रं च कवचं तुलसीगतमानसः । मंडलात्तारकं हंता भविष्यति न संशयः ॥ २० ॥ इति श्रीब्रह्मांडपुराणे तुलसीमाहात्म्ये तुलसीकवचं नाम स्तोत्रं संपूर्णम् ॥

१७६. तुलसीस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जगद्धात्रि नमस्तुभ्यं विष्णोश्च प्रियवल्लभे । यतो ब्रह्मादयो देवाः सृष्टिस्थित्यंतकारिणः ॥ १ ॥ नमस्तुलसि कल्याणि नमो विष्णुप्रिये शुभे । नमो मोक्षप्रदे देवि नमः संपत्प्रदायिके ॥ २ ॥ तुलसी पातु मां नित्यं सर्वापद्भ्योऽपि सर्वदा । कीर्तितापि स्मृता वापि पवित्रयति मानवम् ॥ ३ ॥ नमामि शिरसा देवीं

तुलसीं विलसत्तनुम् । यां दृष्ट्वा पापिनो मर्त्या मुच्यंते सर्वकिल्बिषात् ॥ ४ ॥ तुलस्या रक्षितं सर्वं जगदेतच्चराचरम् । या विनिर्हंति पापानि दृष्टा वा पापिभिर्नरैः ॥ ५ ॥ नमस्तुलस्यतितरां यस्यै बद्ध्वा बलिं कलौ । कलयंति सुखं सर्वं स्त्रियो वैश्यास्तथापरे ॥ ६ ॥ तुलस्या नापरं किंचिद्दैवतं जगतीतले । यथा पवित्रितो लोको विष्णुसंगेन वैष्णवः ॥ ७ ॥ तुलस्याः पल्लवं विष्णोः शिरस्यारोपितं कलौ । आरोपयति सर्वाणि श्रेयांसि वरमस्तके ॥ ८ ॥ तुलस्यां सकला देवा वसंति सततं यतः । अतस्तामर्चयेल्लोके सर्वान्देवान्समर्चयन् ॥ ९ ॥ नमस्तुलसि सर्वज्ञे पुरुषोत्तमवल्लभे । पाहि मां सर्वपापेभ्यः सर्वसंपत्प्रदायिके ॥ १० ॥ इति स्तोत्रं पुरा गीतं पुंडरीकेण धीमता । विष्णुमर्चयता नित्यं शोभनैस्तुलसीदलैः ॥ ११ ॥ तुलसी श्रीमहालक्ष्मीर्विद्याविद्या यशस्विनी । धर्म्या धर्मानना देवी देवदेवमनःप्रिया ॥ १२ ॥ लक्ष्मीः प्रियसखी देवी द्यौर्भूमिरचला चला । षोडशैतानि नामानि तुलस्याः कीर्तयेन्नरः ॥ १३ ॥ लभते सुतरां भक्तिमंते विष्णुपदं लभेत् । तुलसी भूर्महालक्ष्मीः पद्मिनी श्रीहरिप्रिया ॥१४॥ तुलसि श्रीसखि शुभे पापहारिणि पुण्यदे । नमस्ते नारदनुते नारायणमनःप्रिये ॥ १५ ॥ इति श्रीपुंडरीककृतं तुलसीस्तोत्रं संपूर्णम् ॥

१७७. श्रीवेदव्यासाष्टकम् ।

श्रीगणेशाय नमः ॥ कलिमलास्तविवेकदिवाकरं समवलोक्य तमोवलितं जनम् । करुणया भुवि दर्शितविग्रहं मुनिवरं तमहं सततं भजे ॥ १ ॥ भरतवंशसमुद्धरणेच्छया स्वजननीवचसा परिनोदितः । अजनयत्तनयत्रितयं प्रभुर्मुनिवरं तमहं सततं भजे ॥ २ ॥ मतिबलादि निरीक्ष्य कलौ नृणां लघुतरं कृपया निगमांबुधेः । समकरोदिह भागमनेकधा मुनिवरं तमहं सततं भजे ॥ ३ ॥ सकलधर्मनिरूपणसागरं विविधचित्रकथासमलंकृतम् । व्यरचयच्च पुराणकदंबकं मुनिवरं तमहं सततं भजे ॥ ४ ॥ श्रुतिविरोधसमन्वयदर्पणं निखिलवादिमतांध्यविदारणम् । ग्रथितवानपि सूत्रसमूहकं मुनिवरं तमहं सततं भजे ॥ ५ ॥ यदनुभाववशेन दिवं गतः समधिगम्य महास्त्रसमुच्चयम् । कुरुचमूमजयद्विजयो द्रुतं मुनिवरं तमहं सततं भजे ॥ ६ ॥ समरवृत्तविबोधसमीहया कुरुवरेण मुदा कृतयाचनः । सपदि सूतमदादमलेक्षणं मुनिवरं तमहं सततं भजे ॥ ७ ॥ वननिवासपरौ कुरुदंपती सुतशुचा तपसा च विकर्शितौ । मृततनूजगणं समदर्शयन्मुनिवरं तमहं सततं भजे ॥ ८ ॥ व्यासाष्टकमिदं पुण्यं ब्रह्मानन्देन कीर्तितम् । यः पठेन्मनुजो नित्यं स भवेच्छास्त्रपारगः ॥ ९ ॥

इति श्रीमत्परमहंसस्वामिब्रह्मानंदविरचितं श्रीवेदव्यासाष्टकं संपूर्णम् ॥

१७८. अभिलाषाष्टकम् ।

श्रीगणेशाय नमः ॥ कदा पक्षींद्रांसोपरि गतमजं कंजनयनं रमासंश्लिष्टांगं गगनरुचमापीतवसनम् । गदाशंखांभोजारिवरकरमालोक्य सुचिरं गमिष्यत्येतन्मे ननु सफलतां नेत्रयुगलम् ॥ १ ॥ कदा क्षीराब्ध्यंतः सुरतरुवनांतर्मणिमये समासीनं पीठे जलधितनयालिंगिततनुम् । स्तुतं देवैर्नित्यं मुनिवरकदंबैरभिनुतं स्तवैः संस्तोष्यामि श्रुतिवचनगर्भैः सुरगुरुम् ॥ २ ॥ कदा मामाभीतं भयजलधितस्तापसतनुं गता रागं गंगातटगिरिगुहावाससहनम् । लपंतं हे विष्णो सुरवर रमेशेति सततं समभ्येत्योदारं कमलनयनो वक्ष्यति वचः ॥ ३ ॥ कदा मे हृत्पद्मे भ्रमर इव पद्मे प्रतिवसन् सदा ध्यानाभ्यासादनिशमुपहूतो विभुरसौ । स्फुरज्ज्योतीरूपो रविरिव रमासेव्यचरणो हरिष्यत्यज्ञानाज्जनिततिमिरं तूर्णमखिलम् ॥४॥ कदा मे भोगाशा निबिडभवपाशादुपरतं तपःशुद्धं बुद्धं गुरुवचनतोदैरचपलम् । मनो मौनं कृत्वा हरिचरणयोश्चारु सुचिरं स्थितिं स्थाणुप्रायां भवभयहरां यास्यति पराम् ॥ ५ ॥ कदा मे संरुद्धाखिलकरणजालस्य परितो जिताशेषप्राणानिलपरिकरस्य प्रजपतः । सदोंकारं

चित्तं हरिपदसरोजे धृतवतः समेष्यत्युल्लासं मुहुरखिल-रोमावलिरियम् ॥ ६ ॥ कदा प्रारब्धांते परिशिथिलतां गच्छति शनैः शरीरे चाक्षौघेप्युपरतवति प्राणपवने । वदत्यूर्ध्वं श्श्वन्मम वदनकंजे मुहुरहो करिष्यत्यावासं हरिरिति पदं पावनतमम् ॥ ७ ॥ कदा हित्वा जीर्णां त्वच-मिव भुजंगस्तनुमिमां चतुर्बाहुश्चक्रांबुजदरकरः पीतवस-नः । घनश्यामो दूतैर्गगनगतिनीतो नतिपरैर्गमिष्यामी-शस्यांतिकमखिलदुःखांतकमिति ॥ ८ ॥ इति श्रीमत्पर-महंसस्वामिब्रह्मानंदविरचितमभिलाषाष्टकं संपूर्णम् ॥

१७९. श्रीहरिशरणाष्टकम् ।

श्रीगणेशाय नमः ॥ ध्येयं वदंति शिवमेव हि केचिदन्ये शक्तिं गणेशमपरे तु दिवाकरं वै । रूपैस्तु तैरपि विभासि यतस्त्वमेव तस्मात्त्वमेव शरणं मम शंखपाणे ॥ १ ॥ नो सोदरो न जनको जननी न जाया नैवात्म-जो न च कुलं विपुलं बलं वा । संदृश्यते न किल कोऽपि सहायको मे तस्मात्त्वमेव शरणं मम शंखपाणे ॥ २ ॥ नोपासिता मदमपास्य मया महांतस्तीर्थानि चास्तिक-धिया नहि सेवितानि । देवार्चनं च विधिवन्न कृतं कदापि तस्मात्त्वमेव शरणं मम शंखपाणे ॥ ३ ॥ दुर्वा-सना मम सदा परिकर्षयंती चित्तं शरीरमपि रोगगणा दहंति । संजीवनं च परहस्तगतं सदैव तस्मात्त्वमेव

शरणं मम शंखपाणे ॥ ४ ॥ पूर्वं कृतानि दुरितानि मया तु यानि स्मृत्वाऽखिलानि हृदयं परिकंपते मे । ख्याता च ते पतितपावनता तु यस्मात् तस्मात्त्वमेव शरणं मम शंखपाणे ॥ ५ ॥ दुःखं जराजननजं विविधाश्च रोगाः काकश्वसूकरजनीर्निरये च पातः । ते विस्मृतेः फलमिदं विततं हि लोके तस्मात्त्वमेव शरणं मम शंखपाणे ॥ ६ ॥ नीचोऽपि पापवलितोऽपि विनिंदितोऽपि ब्रूयात्तवाहमिति यस्तु किलैकवारम् । तं यच्छसीश निजलोकमिति व्रतं ते तस्मात्त्वमेव शरणं मम शंखपाणे ॥ ७ ॥ वेदेषु धर्मवचनेषु तथागमेषु रामायणेपि च पुराणकदंबके वा । सर्वत्र सर्वविधिना गदितस्त्वमेव तस्मात्त्वमेव शरणं मम शंखपाणे ॥ ८ ॥ इति श्रीपरमहंसस्वामिब्रह्मानंदविरचितं श्रीहरिशरणाष्टकं संपूर्णम् ॥

१८०. चतुःश्लोकीभागवतम् ।

श्रीगणेशाय नमः ॥ श्रीभगवानुवाच । ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् । सरहस्यं तदंगं च गृहाण गदितं मया ॥१॥ यावानहं यथाभावो यद्रूपगुणकर्मकः । तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥ २ ॥ अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् । पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥ ३ ॥ ऋतेऽर्थं यत्प्रतीयेत न

प्रतीयेत चात्मनि । तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥ ४ ॥ यथा महांति भूतानि भूतेषूच्चावचेष्वनु । प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥ ५ ॥ एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः। अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ॥ ६ ॥ एतन्मतं समातिष्ठ परमेण समाधिना । भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥ ७ ॥ इति श्रीमद्भागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां वैयासिक्यां द्वितीयस्कंधे भगवद्ब्रह्मसंवादे चतुःश्लोकीभागवतं समाप्तम् ॥

१८१. सप्तश्लोकी गीता ।

श्रीगणेशाय नमः ॥ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् । यः प्रयाति त्यजन्देहं स याति परमां गतिं ॥ १ ॥ स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च । रक्षांसि भीतानि दिशो द्रवंति सर्वे नमस्यंति च सिद्धसंघाः ॥ २ ॥ सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् । सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥३॥ कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः । सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात् ॥४॥ ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् । छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ ५ ॥ सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च । वेदैश्च सर्वैरहमेव

वेद्यो वेदांतकृद्वेदविदेव चाहम् ॥ ६ ॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ७ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सप्तश्लोकी गीता संपूर्णा ॥

१८२. पांडवगीता ।

श्रीगणेशाय नमः ॥ पांडव उवाच । प्रह्लादनारदपराशरपुण्डरीकव्यासांबरीषशुकशौनकभीष्मदाल्भ्यान् । रुक्मांगदार्जुनवसिष्ठविभीषणादीन्पुण्यानिमान्परमभागवतान्स्मरामि ॥ १ ॥ लोमहर्षण उवाच । धर्मो विवर्धति युधिष्ठिरकीर्तनेन पापं प्रणश्यति वृकोदरकीर्तनेन । शत्रुर्विनश्यति धनंजयकीर्तनेन माद्रीसुतौ कथयतां न भवंति रोगाः ॥ २ ॥ ब्रह्मोवाच । ये मानवा विगतरागपरावरज्ञा नारायणं सुरगुरुं सततं स्मरंति । ध्यानेन तेन हतकिल्बिषचेतनास्ते मातुः पयोधररसं न पुनः पिबंति ॥ ३ ॥ इंद्र उवाच । नारायणो नाम नरो नराणां प्रसिद्धचोरः कथितः पृथिव्याम् । अनेकजन्मार्जितपापसंचयं हरत्यशेषं स्मरतां सदैव ॥ ४ ॥ युधिष्ठिर उवाच । मेघश्यामं पीतकौशेयवासं श्रीवत्सांकं कौस्तुभोद्भासितांगम् । पुण्योपेतं पुंडरीकायताक्षं विष्णुं वंदे सर्वलोकैकनाथम् ॥ ५ ॥ भीमसेन उवाच । जलौघमग्ना सच-

राचरा धरा विषाणकोट्याखिलविश्वमूर्तिना। समुद्धृता येन वराहरूपिणा स मे स्वयंभूर्भगवान् प्रसीदताम् ॥ ६ ॥ अर्जुन उवाच। अचिंत्यमव्यक्तमनंतमव्ययं विभुं प्रभुं भावितविश्वभावनम्। त्रैलोक्यविस्तारविचारकारकं हरिं प्रपन्नोऽस्मि गतिं महात्मनाम् ॥ ७ ॥ नकुल उवाच। यदि गमनमधस्तात्कालपाशानुबद्धो यदि च कुलविहीने जायते पक्षिकीटे। कृमिशतमपि गत्वा जायते चांतरात्मा मम भवतु हृदिस्थे केशवे भक्तिरेका ॥ ८ ॥ सहदेव उवाच। तस्य यज्ञवराहस्य विष्णोरतुलतेजसः। प्रणामं ये प्रकुर्वंति तेषामपि नमो नमः ॥९॥ कुंत्युवाच। स्वकर्मफलनिर्दिष्टां यां यां योनिं व्रजाम्यहम्। तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढाऽस्तु मे ॥ १० ॥ माद्र्युवाच। कृष्णे रताः कृष्णमनुस्मरंति रात्रौ च कृष्णं पुनरुत्थिता ये। ते भिन्नदेहाः प्रविशंति कृष्णं हविर्यथा मंत्रहुतं हुताशे ॥११॥ द्रुपद उवाच। कीटेषु पक्षिषु मृगेषु सरीसृपेषु रक्षःपिशाचमनुजेष्वपि यत्र यत्र। जातस्य मे भवतु केशव त्वत्प्रसादात्त्वय्येव भक्तिरचलाऽव्यभिचारिणी च ॥१२॥ सुभद्रोवाच। एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः। दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥१३॥ अभिमन्युरुवाच। गोविंद गोविंद हरे मुरारे गोविंद गोविंद रथांगपाणे। गो-

विंद गोविंद मुकुंद कृष्ण गोविंद गोविंद नमो नमस्ते॥ १४॥ धृष्टद्युम्न उवाच । श्रीराम नारायण वासुदेव गोविंद वैकुंठ मुकुंद कृष्ण । श्रीकेशवानंत नृसिंह विष्णो मां त्राहि संसारभुजंगदष्टम् ॥ १५ ॥ सात्यकिरुवाच । अप्रमेय हरे विष्णो कृष्ण दामोदराच्युत । गोविंदानंत सर्वेश वासुदेव नमोऽस्तु ते ॥ १६ ॥ उद्धव उवाच । वासुदेवं परित्यज्य योऽन्यं देवमुपासते । तृषितो जाह्नवीतीरे कूपं वाञ्छति दुर्भगः ॥१७॥ धौम्य उवाच । अपां समीपे शयनासनस्थं दिवा च रात्रौ च यथाधिगच्छताम् । यद्यस्ति किंचित्सुकृतं कृतं मया जनार्दनस्तेन कृतेन तुष्यतु ॥१८॥ संजय उवाच । आर्ता विषण्णाः शिथिलाश्च भीता घोरेषु व्याघ्रादिषु वर्तमानाः । संकीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवंति ॥ १९ ॥ अक्रूर उवाच । अहं तु नारायणदासदासदासस्य दासस्य च दासदासः । अन्येभ्य ईशो जगतो नराणामस्मादहं चान्यतरोऽस्मि लोके ॥२०॥ विदुर उवाच । वासुदेवस्य ये भक्ताः शांतास्तद्गतमानसाः । तेषां दासस्य दासोऽहं भवे जन्मनि जन्मनि ॥२१॥ भीष्म उवाच । विपरीतेषु कालेषु परिक्षीणेषु बंधुषु । त्राहि मां कृपया कृष्ण शरणागतवत्सल ॥२२॥ द्रोणाचार्य उवाच । ये ये हताश्चक्रधरेण राजंस्त्रैलोक्यनाथेन जनार्दनेन । ते ते गता विष्णुपुरीं प्रयाताः

क्रोधोऽपि देवस्य वरेण तुल्यः ॥२३॥ कृपाचार्य उवाच। मज्जन्मनः फलमिदं मधुकैटभारे मत्प्रार्थनीयमदनुग्रह एष एव। त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्यभृत्यस्य भृत्य इति मां स्मर लोकनाथ ॥ २४ ॥ अश्वत्थामोवाच। गोविंद केशव जनार्दन वासुदेव विश्वेश विश्व मधुसूदन विश्वनाथ। श्रीपद्मनाभ पुरुषोत्तम पुष्कराक्ष नारायणाच्युत नृसिंह नमो नमस्ते ॥ २५ ॥ कर्ण उवाच। नान्यं वदामि न शृणोमि न चिंतयामि नान्यं स्मरामि न भजामि न चाश्रयामि। भक्त्या त्वदीयचरणांबुजमंतरेण श्रीश्रीनिवास पुरुषोत्तम देहि दास्यम् ॥ २६ ॥ धृतराष्ट्र उवाच। नमो नमः कारणवामनाय नारायणायामितविक्रमाय। श्रीशार्ङ्गचक्राब्जगदाधराय नमोऽस्तु तस्मै पुरुषोत्तमाय ॥ २७ ॥ गांधार्युवाच। त्वमेव माता च पिता त्वमेव त्वमेव बंधुश्च सखा त्वमेव। त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥ २८ ॥ द्रौपद्युवाच। यज्ञेशाच्युत गोविंद माधवानंत केशव। कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तु ते ॥२९॥ जयद्रथ उवाच। नमः कृष्णाय देवाय ब्रह्मणेऽनंतमूर्तये। योगेश्वराय योगाय त्वामहं शरणं गतः ॥ ३० ॥ विकर्ण उवाच। कृष्णाय वासुदेवाय देवकीनंदनाय च। नंदगोपकुमाराय गोविंदाय नमो नमः ॥ ३१ ॥ सोमदत्त उवाच। नमः परम-

कल्याण नमस्ते विश्वभावन । वासुदेवाय शांताय यदूनां पतये नमः ॥ ३२ ॥ विराट उवाच । नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविंदाय नमोनमः ॥ ३३ ॥ शल्य उवाच । अतसीपुष्पसंकाशं पीतवाससमच्युतम् । ये नमस्यंति गोविंदं न तेषां विद्यते भयम् ॥ ३४ ॥ बलभद्र उवाच । कृष्ण कृष्ण कृपालुस्त्वमगतीनां गतिर्भव । संसारार्णवमग्नानां प्रसीद पुरुषोत्तम ॥ ३५ ॥ श्रीकृष्ण उवाच । कृष्ण कृष्णेति कृष्णेति यो मां स्मरति नित्यशः । जलं भित्त्वा यथा पद्मं नरकादुद्धराम्यहम् ॥३६॥ सत्यं ब्रवीमि मनुजाः स्वयमूर्ध्वबाहुर्यो मां मुकुंद नरसिंह जनार्दनेति । जीवो जपत्यनुदिनं मरणे रणे वा पाषाणकाष्ठसदृशाय ददाम्यभीष्टम् ॥ ३७ ॥ सूत उवाच । तत्रैव गंगा यमुना च वेणी गोदावरी सिंधुसरस्वती च । तत्रैव तीर्थानि वसंति तत्र यत्राच्युतोदारकथाप्रसंगः ॥ ३८ ॥ यम उवाच । नरके पच्यमानं तु यमेन परिभाषितम् । किं त्वया नार्चितो देवः केशवः क्लेशनाशनः ॥३९॥ नारद उवाच । जन्मांतरसहस्रेण तपोध्यानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥ ४० ॥ प्रह्लाद उवाच । नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम् । तेषु तेष्वचलाभक्तिरच्युताऽस्तु सदा त्वयि ॥४१॥ या प्रीतिरविवेकानां

विषयेष्वनपायिनी । त्वामनुस्मरतः सा मे हृदयान्माऽपसर्पतु ॥ ४२ ॥ विश्वामित्र उवाच । किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः । यो नित्यं ध्यायते देवं नराणां मनसि स्थितम् ॥ ४३ ॥ जमदग्निरुवाच । नित्योत्सवस्तदा तेषां नित्यश्रीर्नित्यमंगलम् । येषां हृदिस्थो भगवान्मंगलायतनं हरिः ॥ ४४ ॥ भरद्वाज उवाच । लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिंदीवरश्यामो हृदयस्थो जनार्दनः ॥४५॥ गौतम उवाच । गोकोटिदानं ग्रहणेषु काशी प्रयागगंगाऽयुतकल्पवासः । यज्ञागतं मेरुसुवर्णदानं गोविंदनाम्ना न कदापि तुल्यम् ॥ ४६ ॥ अत्रिरुवाच । गोविंदेति सदा स्नानं गोविंदेति सदा जपः । गोविंदेति सदा ध्यानं सदा गोविंदकीर्तनम् ॥ ४७ ॥ अक्षरं हि परं ब्रह्म गोविंदेत्यक्षरत्रयम् । तस्मादुच्चरितं येन ब्रह्मभूयाय कल्पते ॥ ४८ ॥ श्रीशुक उवाच । अच्युतः कल्पवृक्षोऽसावनंतः कामधेनवः । चिंतामणिश्च गोविंदो हरिनाम विचिंतयेत् ॥४९॥ हरिरुवाच । जयति जयति देवो देवकीनंदनोऽयं जयति जयति कृष्णो वृष्णिवंशप्रदीपः । जयति जयति मेघश्यामलः कोमलाङ्गो जयति जयति पृथ्वीभारनाशो मुकुंदः ॥ ५० ॥ पिप्पलायन उवाच । श्रीमन्नृसिंहविभवे गरुडध्वजाय तापत्रयोपशमनाय भवौषधाय । कृष्णाय वृश्चिकजलाग्निभुजंगरोगक्ले-

शव्ययाय हरये गुरवे नमस्ते ॥५१॥ आविर्होत्र उवाच । कृष्ण त्वदीयपदपंकजपंजरांते अद्यैव मे विशतु मानसराज-हंसः । प्राणप्रयाणसमये कफवातपित्तैः कंठावरोधनविधौ स्मरणं कुतस्ते ॥ ५२ ॥ विदुर उवाच । हरेर्नामैव नामैव नामैव मम जीवनम् । कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥ ५३ ॥ वसिष्ठ उवाच । कृष्णेति मंगलं नाम यस्य वाचि प्रवर्तते । भस्मीभवंति तस्याशु महा-पातककोटयः ॥ ५४ ॥ अरुंधत्युवाच । कृष्णाय वासुदे-वाय हरये परमात्मने । प्रणतक्लेशनाशाय गोविंदाय नमो नमः ॥ ५५ ॥ कश्यप उवाच । कृष्णानुस्मरणादेव पाप-संघातपंजरः । शतधा भेदमाप्नोति गिरिर्वज्रहतो यथा ॥ ५६ ॥ दुर्योधन उवाच । जानामि धर्मं न च मे प्रवृ-त्तिर्जानाम्यधर्मं न च मे निवृत्तिः । केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि ॥ ५७ ॥ यन्त्र स्वगुणदोषेण क्षम्यतां मधुसूदनः । अहमेवमहं हंतुं मम दोषो न विद्यते ॥५८॥ भृगुरुवाच । नामैव तव गोविंद कलौ त्वत्तः शताधिकम् । ददात्युच्चारणान्मुक्तिं विना ह्यष्टांगयोगतः ॥ ५९ ॥ लोमहर्षण उवाच । नमामि नारायणपादपंकजं करोमि नारायणपूजनं सदा । वदामि नारायणनाम निर्मलं स्मरामि नारायणतत्त्वमव्ययम् ॥६०॥ शौनक उवाच । स्मृत्वा सकलकल्याणभाजनं यत्र जायते ।

पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥ ६१ ॥ गर्ग उवाच । नारायणेति मंत्रोऽस्ति वागस्ति वशवर्तिनी । तथापि नरके घोरे पतंतीत्येतदद्भुतम् ॥ ६२ ॥ दाल्भ्य उवाच । किं तस्य बहुभिर्मंत्रैर्भक्तिर्यस्य जनार्दने । नमो नारायणायेति मंत्रः सर्वार्थसाधकः ॥ ६३ ॥ वैशंपायन उवाच । यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ६४ ॥ अंगिरा उवाच । हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः । अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः ॥ ६५ ॥ पराशर उवाच । सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् । बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥ ६६ ॥ पौलस्त्य उवाच । हे जिह्वे रससारज्ञे सर्वदा मधुरप्रिये । नारायणाख्यं पीयूषं पिब जिह्वे निरंतरम् ॥ ६७ ॥ व्यास उवाच । सत्यं सत्यं पुनः सत्यं भुजमुत्थाप्य चोच्यते । न वेदाच्च परं शास्त्रं न देवः केशवात्परः ॥ ६८ ॥ धन्वंतरिरुवाच । अच्युतानंत गोविंद नामोच्चारणभेषजात् । नश्यंति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ ६९ ॥ मार्कंडेय उवाच । सा हानिस्तन्महच्छिद्रं सा चांधजडमूढता । यन्मुहूर्तं क्षणं वापि वासुदेवं न चिंतयेत् ॥ ७० ॥ अगस्त्य उवाच । निमिषं निमिषार्धं वा प्राणिनां विष्णुचिंतनम् । क्रतुकोटिसहस्राणां ध्यानमेकं

विशिष्यते ॥ ७१ ॥ मनसा कर्मणा वाचा ये स्मरंति जनार्दनम् । तत्र तत्र कुरुक्षेत्रं प्रयागो नैमिषं वनम् ॥ ७२ ॥ श्रीशुक उवाच । आलोड्य सर्वशास्त्राणि विचार्यैवं पुनः पुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥ ७३ ॥ श्रीमहादेव उवाच । शरीरं च नवच्छिद्रं व्याधिग्रस्तं कलेवरम् । औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः ॥ ७४ ॥ शौनक उवाच । भोजनाच्छादने चिंतां वृथा कुर्वंति वैष्णवाः । योऽसौ विश्वंभरो देवः स भक्तान् किमुपेक्षते ॥ ७५ ॥ एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः । कीर्तयंति सुरश्रेष्ठं देवं नारायणं विभुम् ॥ ७६ ॥ सनत्कुमार उवाच । यस्य हस्ते गदा चक्रं गरुडो यस्य वाहनम् । शंखः करतले यस्य स मे विष्णुः प्रसीदतु ॥ ७७ ॥ इदं पवित्रमायुष्यं पुण्यं पापप्रणाशनम् । यः पठेत्प्रातरुत्थाय वैष्णवं स्तोत्रमुत्तमम् ॥ ७८ ॥ सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् । धर्मार्थकाममोक्षार्थं पांडवैः परिकीर्तितम् ॥७९॥ आकाशात्पतितं तोयं यथा गच्छति सागरम् । सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥ ८० ॥ इति श्रीपांडवकृता प्रपन्नगीता संपूर्णा ॥

१८३. भारतसावित्रीस्तोत्रम् ।

श्रीगणेशाय नमः ॥ व्यास उवाच—मातापितृसहस्राणि पुत्रदारशतानि च । संसारेष्वनुभूतानि यान्ति यास्यन्ति चापरे ॥ १ ॥ हर्षस्थानसहस्राणि भयस्थानशतानि च । दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ २ ॥ ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे । धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥ ३ ॥ न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः । नित्यो धर्मः सुखदुःखे त्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्यः ॥ ४ ॥ इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् । स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ॥ ५ ॥ इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां स्वर्गारोहणपर्वणि भारतसावित्रीस्तोत्रं संपूर्णम् ॥ श्रीकृष्णार्पणमस्तु ॥

संस्कृत पुस्तकें.

ललितासहस्रनाम।

किंमत १॥ रु., ट. ख. ४ आ.

रेणुकासहस्रनाम व कवच।

किंमत १॥ आ., ट. ख. १ आ.

त्रैलोक्यमोहनकवच।

किंमत २ आ., ट. ख. १ आ.

मकरन्दस्तवराजस्तोत्र।

किंमत १ आ., ट. ख. १ आ.

कर्पूरस्तवराजस्तोत्र।

किंमत ३ आ., ट. ख. १ आ.

पांडुरंग जावजी,
निर्णयसागर छापखान्याचे मालक, मुंबई.